CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुरु-गङ्गेश्वर-ग्रन्थमालाया द्वादशं पुष्पम्

शुक्लयजुःसंहितासमन्वयभाष्यम्

प्रथमोऽध्यायः

भाष्यकाराः

स्वामिश्रीगङ्गेश्वरानन्दोदासीनाः

सम्पादकाः

श्रीसुरजनदासस्वामिनः, एम्. ए., आचार्याः

सहसम्पादकौ

स्वामिश्रीगोविन्दानन्दो वेदान्ताचार्यः

स्वामिश्रीआनन्दभास्करश्च

गुरुगङ्गेश्वर चतुर्वेद प्रकाशन संस्थान,

योगेश्वर गुरुगङ्गेश्वर चैरिटेबिल ट्रस्ट

दिल्ली-बम्बई

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुरु-गङ्गेश्वर-ग्रन्थमालाया द्वादशं पुष्पम्

शुक्लयजुःसंहितासमन्वयभाष्यम्

★

प्रथमोऽध्यायः

वेददर्शनाचार्य-महामण्डलेश्वर-
श्री १०८ स्वामिश्रीगंगेश्वरानन्दोदासीनकृत-
समन्वयभाष्यसमलङ्कृतः

★

सम्पादकाः
श्रीसुरजनदासस्वामिनः, एम्. ए., आचार्याः

सहसम्पादकौ
स्वामिश्रीगोविन्दानन्दो वेदान्ताचार्यः,
स्वामिश्रीआनन्दभास्करश्च

भारतीय विद्या भवन, नई दिल्ली

गुरुगंगेश्वर चतुर्वेद प्रकाशन संस्थान,
योगेश्वर गुरुगंगेश्वर चैरिटेबिल ट्रस्ट
दिल्ली-बम्बई

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
Bharatiya Vidya
1042

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मूल्यम् : रूप्यकपञ्चकम्

प्रथमावृत्ति : वि० सं० २०३२
मुद्रक : हितशरण अग्रवाल,
सरस्वती प्रेस, मथुरा, उ० प्र० (भारत)

Bhawan's Sri Sankara... Sanskrit
...ratiya Vidya...
1042

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रास्ताविकम्

सुविदितमेवैतत्तत्रभवतां प्रेक्षावतां वेदशास्त्रनदीष्णानां विपश्चिदपश्चिमानां यत् प्रत्यक्षानुमित्यादिप्रमाणागोचरस्य धर्मस्य ज्ञानाय वेदमन्तरा न कोऽप्युपायो वरीवर्ति । स एव प्रत्यक्षादिप्रमाणाविषयं तत्त्वं बोधयितुं समर्थः । एतदेव हि वेदस्य वेदत्वम् । अत एवोक्तमभियुक्तैः—

'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥'

अत एव 'मनुर्वै यत्किञ्चावदत्तद्भेषजम्' (मै० २. १. ५) इति श्रुत्या जेगीयमानो मनुः 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः' (म० स्मृ० २. १३), 'वेदोऽखिलो धर्ममूलम्' (म० स्मृ० २. ६), 'वेदाद्धर्मो हि निर्बभौ' (म० स्मृ० २. १०) इत्यादिभिर्वचनैर्धर्मस्य वेदैकवेद्यतां प्रतिपादयति । धर्मज्ञानार्थं वेदस्यापेक्षणीयत्वादेव मनुना—

'वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः ।' (म० स्मृ० ४. १४७)
'वेदमेव सदाऽभ्यस्येत्तपस्तप्स्यन् द्विजोत्तमः ।' (म० स्मृ० २. १६६)
'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥' (म० स्मृ० २. १६८)

इत्यादिवचनैर्धर्मं जिज्ञासमानाय ब्राह्मणाय वेदस्यावश्याध्येयत्वं प्रत्यपादि । इममेवार्थं महाभाष्यकारोऽप्युपोद्बलयति—

'ब्राह्मणेन निष्कारणं धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।' (महाभाष्य १)

नहि वेदानामध्ययनाध्यापनप्रचारमन्तरा विश्वजनीनस्य भारतीयस्य धर्मस्य विश्ववाराया वा भारतीयसंस्कृतेः संरक्षणं, नापि च भारतस्य भारतेत्यभिख्यायाः सार्थक्यमिति मनसिकृत्य कालप्रभावाद्वा दैवदुर्विपाकाद्वा भारतीयानां प्रमादाद्वा बहोः कालात् समुपेक्षितस्य विलुप्ताध्ययनाध्यापनप्रचारस्य वेदराशेः समुद्धारे पुनःप्रचारे च विहितामन्दाभियोगैः वेदवेदान्तनिष्णातैर्महामण्डलेश्वराभिख्यामलंकुर्वाणैरुदासीनप्रवरैः श्रीगङ्गेश्वरानन्दस्वामिपादैर्महता परिश्रमेण चतुर्णां वेदानां समष्टिरूपस्य 'भगवान् वेदः' इति ग्रन्थस्य प्रामाणिकं सुन्दरं हृदयहारि च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ता हि परमे स्थाने तिष्ठन्ति' (श० ब्रा० ८. २. ३. १३) इति च श्रुतेः । 'अर्कम्' पृथिव्यग्निम् 'अग्निर्वा अर्कः' (श० ब्रा० २. ५. १. ४) इति श्रुतेः, उपेत्य तस्थुः । 'बृहद्ध तस्थौ भुवनेष्वन्तः' बृहद् बृहत्यामधिरूढः सूर्याग्निः 'बृहत्यां वा असावादित्यः श्रियां प्रतिष्ठायां प्रतिष्ठितस्तपति' (गो० ब्रा० २. ५. ७) 'अद उ एव बृहद् भुवनेष्वन्तरसावादित्यः' (ऐ० आ० २. १. १) 'आदित्यो वै विश्वस्य हृदय'मित्यादिश्रुतिभ्यः, अन्तःस्थितः केन्द्रस्थित इत्यर्थः, बहिरेति । 'पवमानो हरित आविवेश' इति । 'हरितः' दिक्षु स्थितः 'हरितो वै दिशः' (श० ब्रा० २. ५. १. ५) इति श्रुतेः । 'पवमानः' पवित्रः पवमानः सोमः 'आ विवेश' बहिष्टो नाभिं प्रविशति । पवित्रस्यास्य पवमानसोमस्य द्युलोकादुपरितने ब्रह्मणस्पतिलोके स्थितिमृक्श्रुतिः प्रतिपादयति—

तपोष्पवित्रं विततं दिवस्पदे शोचन्ते अस्य तन्तवो व्यस्थिरन् ।
अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधितिष्ठन्ति चेतसा ॥
(ऋ० ९. ८३. २)

अत्र सोमस्य 'दिवस्पदे' 'दिवस्पृष्ठम्' इति पदाभ्यां दिवोऽप्युपरितने प्रदेशे स्थितिरुक्ता । 'तृतीयस्यामितो दिवि सोम आसीत्' (तै० ब्रा० ३. २. १) इति श्रुतिरपि तृतीयस्यां दिवि ब्रह्मणस्पतिलोके सोमस्य सत्तां वक्तीति ।

दिग्दर्शनमात्रमेतद् । अन्यत्रापि मन्त्रेषु बहुत्र एषैव स्थितिः । अत एव ब्राह्मणग्रन्थेषु—'एतदध्यात्मम्' 'एतदधिदैवतम्' 'एतदधियज्ञम्' इत्यादिभिर्वचनैर्मन्त्रव्याख्यासु विभिन्नाः पक्षाः प्रदर्शिताः ।

सम्पूर्णस्य शुक्लयजुःसंहितासमन्वयभाष्यस्य प्रकाशनं भूयांसं समयं व्ययञ्चापेक्षते इति निध्याय प्रथममाद्यानां त्रयाणामध्यायानामेव समन्वयभाष्यं सदसद्व्यक्तिहेतूनां विवेचकानां पुरतः समुपस्थाप्यते ।

देवयाजिपक्षानुसारं यजुःसंहितायाः प्रायः सर्वेषामेव मन्त्राणां विभिन्नेषु यागेषु विनियोगः । यज्ञाश्च श्रौताः पञ्चधा विभक्ताः 'स एष यज्ञः पञ्चविधः—अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमः' इति श्रुतेः (ऐ० आ० २. ३. ३) । तत्र पूर्वपूर्वकर्मानुष्ठानानन्तरमेवोत्तरोत्तरकर्मण्यधिकारो लभ्यते इति सर्वतः प्रथमं गार्हपत्याहवनीयदक्षिणाग्निरूपस्य श्रौताग्नित्रयस्य 'वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः' इत्यादिवचनानुसारं तत्तदृतुष्वाधानानन्तरमेवाधानसिद्धेषु वैतानिकाग्निषु यावज्जीवं सायंप्रातरनुष्ठीयमानेऽग्निहोत्राख्ये कर्मण्यधिकारं लभते द्विजातिः । समनुष्ठिताग्निहोत्रश्च दर्शपूर्णमासयोरधिकृतो भवति । एवञ्च सर्वतः प्रथममग्न्याधानाग्निहोत्रमन्त्राणां पाठो विधेय आसीत् संहितायाम् । अत्र तु प्रथमेऽध्याये द्वितीयेऽध्याये चाष्टाविंशतिकण्डिकान्तं दर्शपूर्णमासमन्त्राणां पाठो विहितः । तत्रेदमेव कारणं यदग्न्याधाने पवमानेष्टयो विधेयत्वेनोपदिश्यन्ते, ता विनाऽग्न्याधानस्यानुपपत्तेः । पवमानेष्टीनाञ्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दर्शपूर्णमासविकृतित्वेन¹ विकृतेश्च ²प्रकृतिसापेक्षत्वात् पूर्वं दर्शपूर्णमासयागे विनियुक्ता एव मन्त्राः पठिताः। ततो द्वितीयाध्यायस्योनत्रिंशत्कण्डिकामारभ्य आ अध्यायसमाप्तेः पिण्डपितृयज्ञे विनियुक्ता मन्त्राः, तृतीयाध्याये चाग्न्याधानाग्न्युपस्थान-वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीय-पित्र्येष्टि-त्र्यम्बकेष्टिविषयका मन्त्राः पठिताः।

अत्र प्रथमाध्याये संहितायामेकत्रिंशत् कण्डिका वर्तन्ते । तासु कण्डिकासु शाखा-निष्पत्ति-दोहन-ग्रहण-प्रोक्षणावघात-कपाल-पेषण-श्रपण-वेद्याज्याभिधा दशानुवाका विद्यन्ते। तदुक्तम्—

आद्यो दशानुवाकाख्यस्तेषामर्थो विविच्यते ।
शाखानिष्पत्तिराख्याता दोहनं ग्रहणोक्षणे ॥ १ ॥
अवघातः कपालानि पेषणं श्रपणं तथा ।
वेदिराज्यग्रहश्चैतेऽनुवाकार्थाः प्रकीर्तिताः ॥ २ ॥

तत्र प्रत्यनुवाकं विभिन्नानां क्रियाणां निरूपणं विहितम् । ताश्च क्रियाश्चतुर्विंशत्युत्तरैकशतम्, तत्प्रतिपादका मन्त्राश्च त्रयस्त्रिंशदुत्तरैकशतं वर्तन्ते । मन्त्रेषु तत्प्रतिपादितक्रियासु च संख्या-वैषम्यस्येदमेव कारणं यत् काश्चित् क्रिया एकाधिकमन्त्रैः प्रतिपादिताः। तद्यथा—दोहनानुवाके 'कामधुक्षः' इति प्रश्नस्योत्तररूपा एकैव क्रिया चतुर्थकण्डिकास्थैः 'सा विश्वायुः' 'सा विश्वकर्मा' 'सा विश्वधायाः' इति त्रिभिर्मन्त्रैः प्रतिपादिता। एवमेव ग्रहणानुवाके व्रतोपायनरूपैका क्रिया 'अग्ने व्रतपते' 'इदमहम्' इति द्वाभ्यां मन्त्राभ्याम्, हविर्ग्रहणरूपा एकैव क्रिया नवमकण्डिका-स्थेन 'यच्छन्तां पञ्च' इति मन्त्रेण दशमकण्डिकास्थाभ्यां 'देवस्य त्वा' 'अग्नीषोमाभ्यां त्वा' इति द्वाभ्यां मन्त्राभ्याञ्चेति सम्भूय त्रिभिर्मन्त्रैः, अवघातानुवाके हविःप्रोक्षणरूपैका क्रिया त्रयो-दशकण्डिकास्थाभ्याम् 'अग्नये त्वा जुष्टं प्रोक्षामि' 'अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि' इति द्वाभ्यां मन्त्राभ्याम्, श्रपणानुवाके च पिण्डालम्भनरूपैका क्रिया द्वाविंशकण्डिकास्थाभ्याम् 'इदमग्ने' 'इदमग्नीषोमयोः' इति द्वाभ्यां मन्त्राभ्यां, पात्र्यङ्गुलिप्रक्षालनजलस्याप्त्येभ्यो निनयनरूपैका क्रिया च त्रयोविंशकण्डिकास्थैः 'त्रिताय त्वा' 'द्विताय त्वा' 'एकताय त्वा' इति त्रिभिर्मन्त्रैर्निरूपिता।

तत्रैककण्डिकात्मके प्रथमे शाखानिष्पत्त्यनुवाके पञ्चभिर्मन्त्रैः शाखाच्छेदनादिकाः पञ्च क्रियाः, कण्डिकात्रयात्मके द्वितीये दोहनानुवाके एकादशमन्त्रैः शाखायां पवित्रबन्धनाद्याः नव क्रियाः, कण्डिकाद्वयात्मके तृतीये ग्रहणानुवाके ऊनविंशत्या मन्त्रैर्व्रतोपायनाद्याः षोडश क्रियाः,

---

१. यत्र विशेषाङ्गमात्रमुपदिश्यतेऽङ्गान्तराणि तु 'प्रकृतिवद्विकृतिः कर्त्तव्या' इत्यतिदेशतोऽतिदिश्यन्ते सा विकृतिः।

२. यत्र समग्राङ्गोपदेशः सा प्रकृतिः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कण्डिकाद्वयात्मके चतुर्थे प्रोक्षणानुवाके सप्तभिर्मन्त्रैर्दर्भच्छेदनादिकाः सप्त क्रियाः, कण्डिकात्रयात्मके पञ्चमेऽवघातानुवाके पञ्चदशभिर्मन्त्रैरजिनादानादयश्चतुर्दश क्रियाः, कण्डिकाद्वयात्मके षष्ठे कपालानुवाके दशभिर्मन्त्रैरुपवेषग्रहाद्या दश क्रियाः, कण्डिकाद्वयात्मके सप्तमे पेषणानुवाके त्रयोदशभिर्मन्त्रैः कृष्णाजिनादानादयस्त्रयोदश क्रियाः, कण्डिकात्रयात्मकेऽष्टमे श्रपणानुवाके पञ्चदशभिर्मन्त्रैः पिष्टावापादयो द्वादश क्रियाः, पञ्चकण्डिकात्मके नवमे वेद्यनुवाके चतुर्विशत्या मन्त्रैः स्फ्यादानादयश्चतुर्विंशतिः क्रियाः, कण्डिकात्रयात्मके दशमे आज्यानुवाके च चतुर्दशभिर्मन्त्रैः स्रुवप्रतपनादयश्चतुर्दश क्रिया इति सम्भूयैकत्रिंशत्कण्डिकासु वर्तमानैस्त्रयस्त्रिंश-दुत्तरैकशतमन्त्रैश्चतुर्विंशत्युत्तरैकशतं क्रियाः प्रतिपादिताः। प्रतिमन्त्रं प्रतिपाद्यमानानां क्रियाणां नामग्राहमुल्लेखो विस्तरभिया न विधीयते। प्रतिकण्डिकमुपक्रम एव ताः क्रिया निर्दिष्टास्तत एव ता अवगन्तव्याः सुधीभिः। एष समासेन निरूपितः प्रथमाध्यायस्य विषयो येन ग्रन्थाध्ययनात्पूर्वं सामान्येनैतदध्यायप्रतिपादितानां विषयाणामवबोधः सौकर्येण सम्पद्येत।

अत्र संशोधनादिकार्येषु श्रीमहेशदत्तशुक्लमहोदयैर्मुद्रणादिकार्येषु च सरस्वतीमुद्रणा-लयाध्यक्षैः श्रीहितशरणअग्रवालमहोदयैर्यन्महत् साहाय्यमाचरितं तदर्थमहमतिशयकृतज्ञता-मावहामि।

बुद्धेर्मान्द्याद्वा, प्रमादाद्वा, त्वरितमुद्रणवशाद्वात्र जातानि स्खलितानि गुणैकपक्षपातिभिः सद्भिः संशोध्यानि संसूचनीयानि च येनागामिनि संस्करणे तेषां संशोधनं विधीयेतेति शम्।

विदुषां विधेयः
—सुरजनदासः स्वामी

नववर्षारम्भः
वि० सं० २०३२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माध्यन्दिनीय-

शुक्लयजुःसंहितासमन्वयभाष्यम्

प्रथमोऽध्यायः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मङ्गलाचरणम्

वन्दे रामं रमानाथं विनयोत्साहदानतः ।
सत्यसन्धं महाधीरं हिन्दूभावनिदर्शनम् ॥
कृष्णावसनविस्तारिकृष्णं कृष्णसखं भजे ।
कल्पद्रुमं प्रपन्नानां सात्वन्मानसमन्दिरम् ॥
विश्ववन्द्यपदो वन्दे विबुधान् देवविश्रुतान् ।
पञ्च हेरम्बवैकुण्ठशक्तिशङ्करभास्करान् ॥
हंसाप्तहंसविज्ञानं हंसं हंसविदुत्तमम् ।
औदास्यप्रथमाचार्यं कुमारं वैधसं भजे ॥
वेदिवंशसमुद्भूतो वेदमार्गप्रवर्तकः ।
भक्तिवित्तिसमुच्चेता श्रीचन्द्रः पातु नः सदा ॥
हार्दं तमो निराकुर्वन् वेदविज्ञानभानुना ।
सर्वं समीहितं देयाद् रामानन्दो दिवाकरः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ हरिः ॐ ॥

शुक्लयजुःसंहितासमन्वयभाष्यम्

अथ प्रथमोऽध्यायः

शाखानिष्पत्त्यनुवाकः

इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा व स्तेन ईशत माघशꣳसो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ १ ॥

देवयाजिपक्षभाष्यम्

अत्र तावत् प्रथमकण्डिकायां पञ्च मन्त्राः। 'इषे त्वा' इति प्रथमः। 'ऊर्जे त्वा' इति द्वितीयः। 'वायव स्थ' इति तृतीयः। 'देवो वः सविता' इत्यारभ्य 'गोपतौ स्यात बह्वीः' इत्यन्तश्चतुर्थः। 'यजमानस्य पशून् पाहि' इति च पञ्चमः। प्रकृतायां दर्शपूर्णमासेष्टौ भूतिमिच्छता षट् प्रधानयागा अवश्यानुष्ठेयाः। अग्निदेवत्यः, अष्टभिः कपालैः साधनैः संस्कृतः, अष्टसु कपालेषु वा संस्कृतः पुरोडाशोऽत्र हविरिति पुरोडाशहविष्को यागः, विष्णुप्रजापत्यग्नीषोमान्यतमदेवत्य आज्यद्रव्यक उपांशुयाजाख्यो यागः, अग्नीषोमदेवत्य एकादशकपालः पुरोडाशहविष्कश्च याग इति त्रयः प्रधानयागाः पौर्णमास्यामनुष्ठेयाः। आग्नेयः पुरोडाशहविष्को यागः, ऐन्द्रो दधियागः, ऐन्द्र एव पयोयाग इति दर्शेऽमावास्यायामनुष्ठेयास्त्रयः प्रधानयागाः।

तत्रामावास्यायां चिकीर्षित ऐन्द्रे दधियागे पयोयागे वा सान्नाय्यहविषः सिद्ध्यर्थं चतुर्दश्यां रात्रौ दध्यातञ्चनार्थं गवां पय इष्यते। तत्र दधिपयसी शास्त्रविधिना पृथक् पृथक्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पाद्य तयोरुभयोर्मिलितयोः सन्नयनं सम्मेलनं सान्नाय्य इति याज्ञिकानां ख्यातिः। धेनुभि-र्वत्सानां संसर्गं विना पयो दुर्लभमिति मातृभिः प्राग् वत्सान् संसृज्य मातॄणां मध्य एकां व्याकृत्य पृथक् कृत्वा वत्सापाकरणार्थं पालाशो दण्डोऽपेक्षितः। तत्र पलाशशाखां चिच्छित्सुः प्रथमं मन्त्रं पठति—'इषे त्वा' इति।

एष द्विपदो मन्त्रः। एतस्य त्र्यक्षरत्वाद्दैवी अनुष्टुप् छन्दः, परमेष्ठी प्राजापत्य ऋषिः, शाखा देवता, शाखाच्छेदने विनियोगः। 'इष्यते' अन्नाद्यर्थं सर्वैरभिकाङ्क्ष्यते इति इट् वृष्टिः। कर्मणि क्विप् प्रत्ययः। 'वृष्ट्यै तदाह यदाहेषे त्वा' इति हि ब्राह्मणम् (श० ब्रा० १. ७. १. २)। 'इषे त्वा' इति क्रियासाकाङ्क्षमित्यतः 'छिनद्मि' इति क्रियाध्याहारः। 'व्रीह्यादिधान्यसंपत्तिकामो इषे वृष्ट्यै त्वा छिनद्मि' इति च मन्त्रार्थः।

द्वितीयो मन्त्रः 'ऊर्जे त्वा' इति। ऋषिच्छन्दोदेवतानां प्राग्वदूहः। शाखासंनमनेऽयं मन्त्रो विनियुक्तः। शाखासंनमनं नाम शाखाया ऋजूकरणम्, शाखालग्नधूल्याद्यपनयनं वेति महीधरः। वृष्टिजलात्मको रसो हि ऊर्क् पदवाच्यः। 'ऊर्ज बलप्राणनयोः' (चुरादिः प० १५५०)। ऊर्जति पानादिना प्राणिनो बलवतः करोति, प्राणयति जीवयति वेत्यूर्ग् रसः। कर्तरि क्विप्। 'यो वृष्टाद् ऊर्ग् रसो जायते तस्मै तदाह' (श० ब्रा० १. ७. १. २)। ऊर्जे वृष्टिजनितगोपयसो रसस्य सम्पत्तये पर्णशाखे ! त्वां संनमयामीति मन्त्रार्थः।

'इषे त्वोर्जे त्वा' इति द्वावपि मन्त्रौ क्रियासाकाङ्क्षौ। 'छिनद्मि' इति क्रियैवोभयत्रा-ध्याहर्तव्या, 'इषे त्वा छिनद्मि, ऊर्जे त्वा छिनद्मि' इत्येकः पक्षः। मन्त्रद्वयं पृथक् क्रिया-द्वयापेक्षम् इत्यन्यः। अत्र 'इषे त्वा' इत्यनेन 'छिनद्मि' इति क्रियाया अध्याहारः 'इषे त्वा छिनद्मि' इति। 'ऊर्जे त्वा' इत्यनेन 'संनमयामि' इति क्रियाध्याहर्तव्या 'ऊर्जे त्वा संनमयामि' इति। अत आह कात्यायनः—'छिनद्मीति वोभयोः साकाङ्क्षत्वात्' 'संनमयामीति वोत्तरे' (का० श्रौ० ४. २. २-३)। शतपथब्राह्मणस्य प्रथम एव पक्षोऽभिमत इत्यत आह— 'तामाच्छिनत्ति इषे त्वोर्जे त्वेति' (श० ब्रा० १. ७. १. २)।

एतन्मन्त्रद्वयपाठेनाध्वर्युरिष्यमाणमन्नं वृष्टिजनितक्षीरादिरसं च सौलभ्येन यजमाने दधातीत्यत एव तैत्तिरीयाः समामनन्ति—'इषे त्वोर्जे त्वेत्याहेषमेवोर्जं यजमाने दधाति' इति।

मन्त्रद्वयेन वत्सापाकरणीयां पर्णशाखां साधयित्वा प्राक् पयोदोहनार्थं वत्सान् मातृभिः संसृजति। संसृज्य च पर्णशाखया वत्समुपस्पृशति।[1] अत आह ब्राह्मणम्—'अथ मातृभिर्वत्सान् समवार्जन्ति, स वत्सं शाखयोपस्पृशति—वायव स्थ इति' (श० ब्रा० १. ७. १. ३)।

१. मातृभिर्वत्सान् संसृज्य वत्सं शाखयोपस्पृशति 'वायव स्थ' इति। (का० श्रौ० सू० ४. २. ७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वायव स्थेति द्विपदो मन्त्रश्चतुरक्षरा दैवी बृहती छन्दः, परमेष्ठी प्राजापत्य ऋषिः, वायुर्देवता, गवामाप्यायने विनियोगः।

'वा गतिगन्धनयोः'। वान्ति स्तन्योन्मुखा मातृसमीपे गच्छन्तीति वायवः। हे वत्साः! यूयं वायव स्थ। यद्वा यथा वायुरन्तरिक्षस्थानो वृष्टिप्रेरणया सम्पादितपुष्कलघासादिना गवाम् आप्यायक एवं यूयमपि स्तन्यलाभाकृष्टा इवोत्कूर्दनैः प्रायेणान्तरिक्षे चरन्तः प्रस्नुतिद्वारेणास्मद्यागाप्यायका भवथेति भावः।

'अयं वै वायुर्योऽयं पवत एष वा इदं सर्वं प्रप्याययति यदिदं किञ्च वर्षत्येष वा एतासां प्रप्याययिता तस्मादाह—वायव स्थेति' (श० ब्रा० १. ७. १. ३)। तैत्तिरीयाः 'वायव स्थ उपायव स्थ' इत्यामनन्ति। हे वत्साः! यूयम् उपायव स्थ। उपयन्ति स्तन्यपानेच्छया मातरमित्युपायवः। नैतन् माध्यन्दिना अभिनन्दन्ति, तदेवाह ब्राह्मणम्—'उपायव स्थेत्यु हैक आहुरुप हि द्वितीयोऽवतीति, तदु तथा न ब्रूयात्' (श० ब्रा० १. ७. १. ३)।

अथ चतुर्थेन 'देवो वः सविता' इत्यादिना मन्त्रेण मातॄणामेकां गां स्ववत्साद् व्याकृत्य वियोज्य शाखयोपस्पृशति।[1] अस्य मन्त्रस्य परमेष्ठी प्राजापत्य ऋषिः, याजुषी बृहती छन्दः, सविता देवता। मातॄणामेकस्या वियोजने विनियोगः। हे गावः! 'वः' युष्मान् सर्वस्य प्रसविता 'सविता देवः' 'श्रेष्ठतमाय कर्मणे' सांनाय्यहविर्निष्पादनद्वारा यज्ञसंपत्तये 'प्रार्पयतु' प्रेरयतु। 'सवितृप्रसूता यज्ञं संभरानिति तस्मादाह' (श० ब्रा० १. ७. १. ४)।

चतुर्विधं हि कर्म—अप्रशस्तं, प्रशस्तं, श्रेष्ठं, श्रेष्ठतमम्। तत्र लोकविरुद्धं चौर्यादिकं कर्म अप्रशस्तम्। लोकश्लाघ्यं बन्धुवर्गपोषणादिकं कर्म प्रशस्तम्। स्मृत्युक्तं वापीकूपादिलोकोपकारिकार्यानुष्ठानं श्रेष्ठं, वेदोक्तं यज्ञानुष्ठानं श्रेष्ठतमम्। तदाह—'श्रेष्ठतमाय कर्मणे' 'यज्ञो वै श्रेष्ठतमं कर्म' (श० ब्रा० १. ७. १. ५) इति। यज्ञसंपत्तय इत्यर्थः। 'अघ्न्याः'—नञि उपपदे हन्तेर्यक्प्रत्ययान्तो निपातः। 'अघ्न्यादयश्च' (उ० सू० ४. ११२)। यद्वा हननं घ्नः, 'घञर्थे कविधानम्' (वा०. ३. ३. ५८) इति वार्तिकेन भावे कः प्रत्ययः। 'गमहनजनखनघसां०' (पा० ६. ४. ९८) इति हन्तेरुपधाकारस्य लोपः। घ्नं वधमर्हन्ति घ्न्या आरण्याः पशवः। न घ्न्याः अघ्न्याः, हे अहन्तव्या गावः! यूयं 'इन्द्राय भागम्' इन्द्रमुद्दिश्य भागं करिष्यमाणसांनाय्योपकारकं स्वक्षीरम् आप्यायध्वम् सर्वतोभावेन वर्धयध्वम्। वत्सप्रस्नुतदोहाः प्रभूतक्षीरा भवतेत्यभिसन्धिः। 'ओप्यायी वृद्धौ' णिचो लोपः। 'प्रजावतीः' बह्वपत्याः परम्परितानेकधेनुप्रस्वः। केवलमात्मक्षीरेणैवास्माकं यज्ञं नाप्याययत, अपि तु धेनुपरम्परया यावज्जीवमस्मान् निवृत्तक्षीरचिन्तान् कुरुतेति ध्वनितम्।

---

१. 'देवो वः' इति मातॄणामेकां व्याकृत्य। (का० श्रौ० सू० ४. २. ६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'अनमीवाः' अमीवा कृमिदष्टादिजन्यः क्षुद्रो व्याधिस्तद्रहिताः। 'अयक्ष्माः' यक्ष्मा रोगराजः, मारकमहाव्याधिस्तद्रहिताश्च सतीः। सर्वथा नीरोगाणामेव गवां क्षीरं स्वास्थ्यकरं भवतीत्यनेन व्यज्यते। एवंभूताः 'वः' युष्मान् 'मा स्तेन ईशत' नापहर्तुम् ईश्वरो भवेत्। 'ईशत' 'ईश ऐश्वर्ये', लोडर्थे लङ्, माङि अडभावः। 'मा' 'अघशंसः' सिंहवृकादिः, अघं वधरूपं पापमेव शंसति अनुध्यायतीत्यघशंसः, कर्मण्युपपदे कर्तरि शंसेरण् प्रत्ययः। पूर्वपदप्रकृतिस्वरत्वं दासी-भारादित्वाद् (पा० ६. २. ४२) उन्नेयम्। 'ध्रुवाः' चौरादिभिरनपहृता वन्यहिंसकैश्चाप्रधर्षिता अकुतोभयाः स्थिरजीवनाः सत्यः हे गावः! 'अस्मिन् गोपतौ' गवां पत्यौ यज्ञकर्मप्रवृत्ते यजमाने 'बह्वीः' अनेकाः 'स्यात' भवतेति।

अथ पञ्चमेन मन्त्रेणाहवनीयागारस्य गार्हपत्यागारस्य वा प्राच्यां दिशि तां पर्णशाखाम् उपगूहति।[1] 'यजमानस्य पशून् पाहि' इति। अस्य मन्त्रस्यापि परमेष्ठी प्राजापत्य ऋषिः, याजुषी बृहती छन्दः, शाखा देवता, शाखोपगूहने विनियोगः। हे पर्णशाखे! त्वं सुरक्षिते स्थाने स्थिता निरुपद्रवाः सुरक्षिता मम गाः पालयस्व। 'यजमानस्य पशून् पाहीति तद्ब्रह्मणैवैतद्यज-मानस्य पशून् परिददाति गुप्त्यै' इति ब्राह्मणम् (श० ब्रा० १. ७. १. ८) इति।

आत्मयाजिपक्षभाष्यम्

चतुर्थ्याः कण्डिकाया अत्र 'विष्णो' इत्यामन्त्रितमनुषज्यते। हे विष्णो! 'इषे' गगन-मण्डलस्थसहस्रदलकमलाद् अमृतवृष्ट्यै 'अमृतं वा आपः' (श० ब्रा० १. ६. ३. ७) 'त्वा' सहस्रदलकमले विराजमानं त्वां नौमीति शेषः। 'ऊर्जे' ज्ञानामृतरसलाभाय, 'आपो ज्योती रसोऽमृतम्' इति श्रुतेः। 'त्वा' त्वां नौमीति शेषः। हे प्राणाः! यूयं 'वायवः' ब्रह्मणि गन्तारः ब्रह्मणि लिलीषवः; 'वायुर्य एवायमात्मन्प्राणः' (श० ब्रा० ७. १. २. ७) 'स्थ'। अधिभूताधि-दैवाध्यात्मभेदेन त्रिविधाः हे बुद्धयः! 'देवः' द्योतमानः स्वयंप्रकाशज्योतिः 'सविता' स्वस्व-व्यापारे प्रेरकः परमात्मा, 'षू प्रेरणे' (तुदा० १४०६) 'श्रेष्ठतमाय कर्मणे' ज्ञानयज्ञाय 'वः' युष्मान् 'प्रार्पयतु' ब्रह्मालये हृदयाकाशे गमयतु। 'अघ्न्याः' भक्तिज्ञानयोगसाधनकर्तृत्वेनावध्याः हे बुद्धयः! 'इन्द्राय भागम्' षष्ठ्यर्थे चतुर्थी, परमेश्वरस्यांशं जीवम्। यद्वा इन्द्राय परमेश्वर-मधिगन्तुं प्रयतमानं भागं तदीयांशं जीवम्, 'ममैवांशो जीवलोके जीवभूतः सनातनः' (गीता १५. ७) इतीश्वरस्मृतेः। 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (पा० २. ३. १४) इति चतुर्थी।

'आप्यायध्वम्' ब्रह्मज्ञानेन समन्ताद् वर्धयध्वम्। 'स्तेनः' चौरः कामोद्रेकः, 'प्रजावतीः' शमदमादिपुत्रवतीः, 'अनमीवाः' अज्ञानादिरोगरहिताः, 'अयक्ष्माः' 'यः' भ्रममोहौ शङ्का च,

---

१. 'यजमानस्य पशून्' इत्यग्न्यगारस्यान्यतरस्य पुरस्ताच्छाखामुपगूहति। (का० श्रौ० सू० ४. २. ११)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'क्षः' कोपकाममहाक्षोभाः 'मः' मानः, वीतशङ्काभ्रममोहकोपकामक्षोभाभिमानाः, 'बह्वीः' शमदमप्रत्याहारधारणाध्यानसमाध्यादिगुणैरनेकशः संपन्नाः, 'वः' युष्मान् अपहर्तुं 'मा ईशत' समर्थो मा भूत्, छान्दसं बहुवचनम्। 'अघशंसः' पापाचारोऽधर्मः मा ईशत। यूयं साधकाः 'अस्मिन् गोपतौ' गवाम् इन्द्रियाणां पत्यौ यजमाने आत्मनि, 'आत्मा वै यज्ञस्य यजमानः' (श० ब्रा० ६. ५. २. १६)। 'ध्रुवाः' निश्चलाः 'स्यात'। हे परमात्मन्! अस्य 'यजमानस्य' योगिनः 'पशून्' इन्द्रियाणि, 'प्राणाः इन्द्रियाणि' (ता० ब्रा० २. १४. २), 'प्राणो वै पशुः' (श० ब्रा० ३. ८. ३. १५), 'पाहि' संसाराद् रक्ष।

आत्मयाजिपक्ष एव अपरा व्याख्या—'इषे' 'इष गतौ' (दिवादिः परस्मैपदी ११२७) 'इष इच्छायाम्' (तुदादिः प० १३५२) वा, कर्मणि क्विप्। इष्यते, गम्यते, प्राप्यते ज्ञातुमिष्यते जिज्ञास्यते इति गन्तव्यं जिज्ञासितव्यं वा ब्रह्म। 'अथातो ब्रह्मजिज्ञासा' (ब्र० सू० १. १. १) इति। तस्मै, तुमर्थे चतुर्थी। तद् ब्रह्म गन्तव्यं जिज्ञासितव्यं वा साक्षात्कर्तुम्। 'त्वा' त्वाम्, शु० यजुः० सं० १.५ कण्डिकातः 'उपैमि' इत्यपकृष्यते। तथा च गुरो! अहं शिष्यः 'त्वा' त्वाम् 'उपैमि' विधिवदुपसन्नोऽस्मीति पर्यवस्यति।

ननु 'नायमात्मा बलहीनेन लभ्यः' (मु० उ० ३. २. ४) इति श्रुतेः ब्रह्मात्मा शमादि-साधनसम्पत्तिमन्तरा कथं साक्षात्कर्तव्य इत्यत आह—'ऊर्जे' इति। ऊर्ग् बलम्, शमदमादि-साधनसम्पत्तिलक्षणम्, तस्मै तदवाप्तुं 'त्वा' त्वाम् उपैमि इति सम्बन्धः। गुरुकृपातः किन्न कर्तुं पार्यते। त्वयि प्रसीदति सर्वं साधनजातं सुप्रापमिति भावः। गुरुर्ब्रूते—भो शिष्याः! मदा-श्रमस्थिताः! कार्यं साधयितुं गुरुकृपा इव आत्मकृपापि सततमपेक्ष्यते। 'उद्धरेदात्मनात्मानम्' इति भगवद्वचनात्, इत्यभिप्रायेणाह—'वायव' इति। मदन्तेवासिनः सर्वे यूयं 'वायवः' वायु-तुल्याः, तद्वत् सततं प्रयतमानाः 'स्थ' भवथ। एतेन आत्मकृपा ध्वनिता। पूर्वत्र जात्यभिप्राये-णैकवचनम्। अत्र व्यक्त्यभिप्रायेण बहुवचनमिति न विरोधः। गुरुपादाः! भवत्प्रसादाद् वयं प्रयतामहे। विजानन्त्येव भवन्तः यत् सर्वत्र ईश्वरप्रसादोऽपेक्षितः। तदाहुः खण्डनखण्ड-खाद्यकाराः—

'ईश्वरानुग्रहादेषा पुंसामद्वैतवासना।
महाभयकृतत्राणा द्वित्राणां यदि जायते॥'

तस्माद् भगवत्प्रसादः सम्पादनीयः। तमन्तरा किमपि न कार्यं सेत्स्यति, इत्याशंक्य समाधत्ते 'देवः' इति गुरोर्वाक्यम् आशीर्लक्षणम्। 'देवः' द्योतमानः दानादिगुणयुक्तो वा परमात्मा। 'सविता' जगदुत्पादकः प्रेरको वा। 'वः' युष्मान् मदन्तेवासिनः 'श्रेष्ठतमाय कर्मणे' सर्वोत्तम-कार्याय, आत्मसाक्षात्काराय। तदुक्तं याज्ञवल्क्येन—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥'

'प्रार्पयतु' प्रगमयतु, आत्मदर्शने सोत्साहान् सततं प्रयतमानान् विधत्ताम् । एतेन भगवत्कृपा सूचिता । लब्धगुरुजगदीश्वरप्रसादः साधकः श्रवणादिना सर्वान् प्रतिबन्धान् निरस्य स्वात्मानं सच्चिदानन्दाखण्डैकरसब्रह्मात्मना साक्षात्कर्तुं प्रभवेदित्याशीर्व्याजेन गुरुराह—आप्यायध्वमिति । 'प्रजावतीः' प्रजावत्यः 'प्रजा स्यात् सन्ततौ जने' इति कोशात् । सन्ततियुक्ताः सन्तता धारावाहिन्यो मध्ये विच्छेदवर्जिता अव्यवहिता निरन्तरा याः सजातीयप्रत्ययप्रवाहरूपाः । 'अघ्न्याः' हन्तुमशक्या विजातीयप्रत्ययैः तिरस्कर्तुमशक्या निदिध्यासनात्मिकाः, 'अनमीवाः' अमीवा क्षुद्रो व्याधिः प्रमाणप्रमेयसंशयलक्षणस्तद्वर्जिताः । एतेन श्रवणेन प्रमाणसंशयः, मननेन च प्रमेयसंशयः निरसनीय इति सूचितम् । 'अयक्ष्माः' यक्ष्मा रोगराजो विपरीतभावनाख्यस्तद्वर्जिताः । श्रवणमननाभ्यां द्विविधसंशयरूपाऽसम्भावना निरस्ता निदिध्यासनेन च विपर्ययाख्या विपरीतभावना निरस्तेति ध्वन्यते । तथा च असम्भावनाख्यसंशयविपरीतभावनारूपविपर्ययशून्या ब्रह्मप्रमात्मिका ब्रह्माकाराखण्डसाक्षात्कारवृत्तिः, ताम् । 'आप्यायध्वम्' पोषयध्वम्, पुष्टां कुरुत भो शिष्याः ! अयमभिसन्धिः—गुरुमुखात् श्रुतवेदान्तवाक्यस्यापि मुमुक्षोः परोक्षज्ञाने जातेऽपि साक्षात्कारस्तावन्नोत्पद्यते, यावत् साधकेन श्रवणाद्यभ्यासात् प्रतिबन्धो न दूरीक्रियते । निरस्ते प्रतिबन्धे सद्यः साक्षात्कारः संजायते इत्येकं मतम् । गुरुमुखाद् वेदान्तवाक्यश्रवणसमसमयमेव साक्षात्कारो बोभवीति । परमसौ तावत्कार्यं कर्तुं न क्षमते, यावत् प्रतिबन्धो न दूरीक्रियते । अप्रतिबद्धः सन्नेवात्मसाक्षात्कारः सविलासाविद्यानिवारणाय क्षमत इत्यपरम् । सर्वथापि प्रतिबन्धो निरसनीयो मुमुक्षुणा इत्यायाति । प्रतिबन्धस्तावत् त्रिविधः भूतवर्तमानागामिभेदात् । वर्तमानः पुनश्चतुर्विधः—विषयासक्तिप्रमाणसंशय-प्रमेयसंशय-विपर्ययभेदात् । यदाहुर्वार्तिककाराः श्रीसुरेश्वराचार्याः—

'प्रतिबन्धो वर्तमानो विषयासक्तिलक्षणः ।
बुद्धिमान्द्यं कुतर्कश्च विपर्ययदुराग्रहः ॥'

तत्र आत्मविषयकश्रवणमनननिदिध्यासनातिरिक्तेषु सांसारिकेषु शब्दस्पर्शादिषु इन्द्रियाणां मनसश्च प्रवृत्तिर्विषयासक्तिः, सा च शमदमादिभिः साधनैर्दूरीक्रियते । बुद्धिमान्द्यं बुद्धिदौर्बल्यम्, प्रमाणभूतानामद्वैतवाक्यानां तात्पर्यानवधारणम् । अयमेव श्रवणनिरसनीयः प्रमाणसंशय इत्युच्यते । कुतर्कः प्रमेयसंशयः, वेदविरोधिकुतर्ककलापेन वेदप्रतिपाद्यार्थे संशयः । इमामेव संशयद्वयीं विद्वांसः असम्भावना-इत्याचक्षते । विपर्ययदुराग्रहः देहादावनात्मनि हठादात्मबुद्धिः, एष एव विपरीतभावना विपर्यय इति च व्यपदिश्यते । तदेवं शमादिसाधनसन्दोहनिरस्तविषयासक्तिप्रतिबन्धः, श्रवणमनननिदिध्यासनैश्च दूरीकृतासम्भावनाविपरीतभावनः, समुत्प-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्नात्मसाक्षात्कारः सुतरां विमुच्यत इति। विस्तरस्तु वार्तिकाद्याकरग्रन्थेषु द्रष्टव्यः।

ननु तावद् आस्तां ज्ञानेनाज्ञानाख्याया अविद्याया विनिवृत्तिः। 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः' (५. १६) इति गीतावाक्ये अविद्याया एव ज्ञाननिवर्त्यत्वप्रतिपादनात्। दैव्यास्त्रिगुणात्मिकाया मायाया ज्ञाननिवर्त्यत्वाप्रतिपादनात् कथं तस्या अपनुत्तिरिति चेत्, भगवत्प्रतिपत्त्या तस्या अपि विनिवृत्तिः। अत एव पार्थसारथिर्भगवान् श्रीकृष्णः स्वयमेव गीतायां तस्या भगवत्प्रतिपत्त्येकापनोद्यतामाह—'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' (गीता ८. ४) इति। अत्र भगवच्छरणागतेर्मायासंतरणहेतुत्वम्, तदपनोदकत्वं, तदपसारकत्वं च समभिप्रेतम्। अन्यथा प्रपद्यन्त इत्यस्य स्थाने प्रपश्यन्तीति ब्रूयात्। तथाविधाने छन्दोभङ्ग-भीतिरपि न समुदेति इत्याशंक्याह—'इन्द्राय भागम्' इति। 'इन्द्राय' इन्द्रस्य, षष्ठ्यर्थे चतुर्थी, 'भागः' भक्तिः श्रवणकीर्तनादिलक्षणा, तां कुरुतेति शेषः।

इदमत्राकूतम्—द्विविधो हि बन्धः अविद्यामायाभेदात्। व्यष्टिबन्धो हि अविद्याख्यो जैवः, स च ज्ञानान्निवर्तते। यथा स्वसदनपिधानयन्त्रं स्वकुशी(कुञ्चिका)संगमनेन उद्घाट्यते, नगरद्वारन्तु राजप्रसादलब्धादेशपरिपत्रमन्तरा नोद्घाटयितुं शक्यम्, तथा जैवे व्यष्टिबन्धे ज्ञानेन निवृत्तेऽपि नगरद्वारकल्पं मायाख्यं समष्टिबन्धनं नापसरति भगवत्प्रसादादृते। ऊचे च नन्दनन्दनः—'नाहं प्रकाशः सर्वस्य योगमायासमावृतः' (गीता ८. २५)। योगमाया भगवत्संकल्पवशवर्तिनी माया, एतेन भगवद्वशंवदा पतिव्रताचक्रचूडामणिर्माया तावन्नापसरति, यावद् भक्तवत्सलो भगवान् नादिशति—देवि! मुञ्चैनं मत्पादपद्मप्रपन्नम्, मत्स्नेहभाजनं जनमिति व्यज्यते। तदेवं न केवलाज् ज्ञानान्मोक्षः, नापि केवलाया भक्तेः, किं तर्हि भक्ति-समुच्चिताज् ज्ञानात्। अयमेवार्थः 'आप्यायध्वम्' 'इन्द्राय भागम्' इतिवाक्यद्वयेन प्रतिपाद्यत इति।

अपि च 'तौ ह्यस्य परिपन्थिनौ' (गीता ३. १४) इति वचनाद् रागद्वेषादि-लक्षणश्चौरो दस्युर्वा साधकस्य सर्वस्वं ब्रह्मचर्यादिलक्षणं धनम् अपहरति। स हि अतिक्रूरो लुण्टाकः। तत एनं साधकं स्वाङ्के निधाय भक्तिजननी परित्रायते। तावदयं रागादिचौरः आक्रामति, यावत् साधको भगवन्तं न प्रपद्यते। आह च मुनिपुङ्गवो मतिमान् भगवान् कृष्णद्वैपायनः —

'तावद् रागादयः स्तेनास्तावत् कारागृहं गृहम्।
तावन्मोहाङ्घ्रिनिगडो यावत् कृष्ण न ते जनः॥'

'स्तेनः' रागादिः, 'वः' युष्मान्, 'मा ईशत' नैवेष्टाम्, न क्षमतां, समर्थो मा भूद् इत्यर्थः। 'ईश ऐश्वर्ये' (अदादिः, आ० १०२०) ततः 'छन्दसि लङ्लुङ्लिटः' (पा० ३. ४. ४) इति सार्वकालिको लङ्। छान्दसः शपोऽलुक् आडभावश्च। 'मा अघशंसः' शंसनं शंसः, अघस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शंसः परानिष्टस्य परापकारस्य चिकीर्षा इति । ईशत इति पूर्वेण सम्बन्धः । साधकहृदये परानिष्टचिन्तनं कदापि नोदियादिति भावः । साधकसर्वस्वलुण्टाकस्य रागादेः एक एव पलायनोपायः इति मनसि निधाय ब्रूते—'ध्रुवा' इति । 'अस्मिन् गोपतौ' गोपाले श्रीकृष्णे 'ध्रुवाः' स्थिरा अनन्यचेतस्काः स्यात । यूयं साधका भवत । अतोऽपि रागादिदस्युवर्गाद् रक्षिका भक्तिरवश्यानुष्ठेयेति भावः । आशीराशिना साधकान् योजयितुं गुरुः प्रार्थयते भगवन्तम् 'यजमानस्य' इति । 'यजमानस्य' प्रभो ! त्वाम् उपासीनस्य साधकगणस्य 'पशून्' प्राणान् तदुपलक्षितानि इन्द्रियाणि 'पाहि' रक्ष, कुपथान्निवार्य सुपथे स्थापय इति भावः ।

केचिदन्यदपि अर्थत्रयं कण्डिकाया अस्या वर्णयन्ति व्याकरणविचक्षणा धीधनाः । तथाहि—'इषे' 'इषश्चोर्जश्च शारदावृतू' इति अग्रे वक्ष्यति, तदनुसारेण 'इषे' आश्विने मासे, 'ऊर्जे' कार्तिकमासे 'त्वा' त्वां यजमानं वायवो रक्षन्तु इति अध्याहारः ।

आश्विन-कार्तिकयोरेव दूषितवातप्रभावात् नानाविधाः शारदिका ज्वरादिरोगाः समुत्पद्यन्ते इति आयुर्वेदविदां समयः । अतः यूयं वेदभक्ताः 'वायवः' वायुतुल्याः सर्वम् उड्डाययितुमीशाः 'स्थ' भवथ, किमुत ज्वरादिरोगान् इत्याकूतम् । 'वायवः' इत्यावर्त्यते सम्बोधनात्मना परिणम्यते च 'वायवः' वायुदेवाः ! 'वः' युष्मान् 'श्रेष्ठतमाय कर्मणे' यजमानेन श्रेष्ठतमं कर्म कारयितुम्, 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (पा० २. ३. १३) इति चतुर्थी, 'सविता देवः' परमात्मा, 'प्रार्पयतु' प्रचालयतु । तथा अनुकूला वाताः प्रवहन्तु यथा यजमानः स्वसमीहितं कर्तुं प्रभवेत् । तस्माद् अनुकूलवातप्रचालकं भगवन्तम् उपाध्वमिति निष्कर्षः । आज्यादिकं विना यज्ञो न निष्पद्यते, अतः प्रार्थनीया गाव इत्याह—'अघ्न्याः' हन्तुमनर्हा गावः 'अघ्न्या इति गोनाम' (निघ० २. ११. १), 'इन्द्राय' इन्द्रार्थं, 'भागम्' भजनीयमंशम्, आज्य-दधिपयोलक्षणं हविः सम्पादयन्त्यः, 'आप्यायध्वम्' वर्धध्वम् । यतो वयमप्याप्यायामहे । ता विशिनष्टि, 'अनमीवाः' नीरोगाः, 'अयक्ष्माः' 'अयः' शुभावहो विधिस्तद्युक्ता क्ष्मा भूमिर्यासां तथाविधाः । यत्र गावस्तिष्ठन्ति तां भूमिं ता गोमयादिना पुनन्तीति । अथवा—'अयः' गमनम्, एतेरच् । तेन गमनेन निजपादार्पणेन भूषिता क्ष्मा याभिस्तथाविधा इति मध्यमपदलोपी समासः ।

अपि च 'प्रजावतीः' प्रजावत्यः प्रशस्तवत्सापत्ययुक्ताः 'वा छन्दसि' (पा० ६. १. १०४) इति पूर्वसवर्णदीर्घः । किञ्च 'स्तेनः' चौरः, 'अघशंसः' अनिष्टचिन्तको हिंस्रो व्याघ्रादिः, 'वः' युष्माकम्, 'अधीगर्थदयेशां कर्मणि' (पा० २. ३. ५२) इति षष्ठी, 'मा ईशत' नैव समर्थः अभूत् 'छन्दसि लुङ्लङ्लिटः' (पा० ३. ४. ६) इति सार्वकालिको लङ्, 'बहुलं छन्दसि' (पा० २. ४. ७६) इति शपो लुगभावः । 'अस्मिन् गोपतौ', 'बह्वीः' बह्व्यः स्वपुत्रपौत्रादिसन्तत्या, 'ध्रुवाः' स्थिराः नित्यसम्बद्धाः 'स्यात' भवेत । परमात्मन् ! 'यजमानस्य' यष्टुः, 'पशून्' गवादि-लक्षणान्, 'पाहि' रक्ष, त्रायस्व । एवं त्वां प्रार्थयामहे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

सात्वतास्तु—इमां कण्डिकामित्थं व्याचक्षते। इषेत्वा ऊर्जेत्वा आवायवस्थ इति पदच्छेदः। आवायवस्थ 'आव', 'आयव', 'स्थ' इति पदत्रयसमासः। गत्यर्थकात् अम् धातोः (भौवादिकः परस्मैपदी ४६५), 'अन्येभ्योऽपि दृश्यन्ते' (पा० ३. २. ७५) इति वनिप्, 'विड्वनोरनुनासिकस्यात्' (पा० ६. ४. ४२) इति मकारस्य अकारः, अमति इति आवा, तस्य बहुवचने आवानः, गच्छन्ति उद्भिन्दन्ति, भुवमुत्पाट्य आविर्भूताः, आयवाः ईषद्यवाः सूक्ष्मयवाः, आवानः उद्भिन्ना ये आयवाः तेष्वपि तिष्ठन्ति तत्सम्बोधने—'आवायवस्थ', उद्भिन्नसूक्ष्मयवेष्वपि वर्तमान सर्वव्यापक जगदीश्वर ! त्वं 'इषेत्वा' इच्छन्ति इति इषाः, 'इष इच्छायाम्' (तुदादिः प० १३५२) 'इगुपधज्ञाप्रीकिरः कः' (पा० ३. १. १३) तान् एषि इति 'इषेत्वा' 'इण् गतौ' (अ० प० १०४५) क्वनिप्, तुक् इत्वा, ये भक्ताः त्वामिच्छन्ति तांस्त्वमेषि प्राप्नोषीति। त्वम् 'इषेत्वा' भक्तानामुपकण्ठं तत्त्राणार्थं सपदि गन्ता असि। तस्मात् 'ऊर्जे' कार्तिके पुण्यकाले 'त्वा' त्वां वयं परिचराम इति शेषः। भक्तान् प्रति स्वयमेव भगवान् ब्रूते—'वः' युष्मान् भक्तान् 'सविता देवः' 'श्रेष्ठतमाय कर्मणे' यज्ञाय 'यज्ञो वै श्रेष्ठतमं कर्मे'ति श्रुतेः। श्रीगोवर्धनमखाय तादृशं यज्ञमित्यर्थः। 'प्रार्पयतु' प्रापयतु 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि' (पा० २. ३. १२) इति द्वितीयासमानार्थिका चतुर्थी। तथा च गोवर्धनमखादिलक्षणनित्यनैमित्तिककर्मानुष्ठानशुद्धान्तःकरणाः यूयं भक्ताः भगवन्तं भजध्वमिति भावः।

भो भक्तप्रजाः यूयं 'अघ्न्याः' वधानर्हाः, 'अनमीवाः' क्षुद्रव्याधिरहिताः, 'अयक्ष्माः' राजरोगरहिताः, 'प्रजावतीः' प्रजावत्यः पुत्रादिसन्तानोपेताः, 'आप्यायध्वम्', वर्धयध्वम् आत्मानमन्याँश्च स्वकीयान्। अपि च—'इन्द्राय भागम्' इन्द्रार्थं निरुप्तं पृथक् स्थापितं 'भागम्' अंशं श्रीगोवर्धनाय उपानयध्वमिति शेषः।

अपि च—'स्तेनः' अधर्मः, 'अघशंसः' तत्सहचरः तदविनाभूतः कामादिश्च, 'वः' युष्माकम्, 'मा ईशत' समर्थो मा भूत्। कामादिसेनोपेतः प्रबलोऽधर्मः प्रभुभक्तान् गोवर्धनमखयाजिनः सख्युः कृष्णस्य कृपया युष्मान् नाक्रामेत्। भवतां चेतसि अधर्मादयः कदापि नावतिष्ठेरन् इति तात्पर्यम्। किं च 'गोपतौ' इन्द्रियाणां कुपथप्रवृत्तिनिवारणेन सन्मार्गप्रवर्तनात् 'पत्यौ' रक्षके संयतेन्द्रिये त्वयि गोवर्धनमखानुष्ठायिजने धर्मसम्पदः 'बह्वीः' बह्व्यः बहुविधाः 'ध्रुवाः' स्थिराः 'स्यात' वर्तेरन् सततमवतिष्ठेरन्। 'यजमानस्य' गोवर्धनार्चननिरतस्य गोपवृन्दस्य 'पशून्' गवाश्वमहिष्यादीन् तदुपलक्षितान् पुत्रपौत्रादींश्च 'पाहि' रक्ष हे! गोवर्धनगिरिराज इति प्रार्थना।

अथापरा व्याख्या—'इषे' इट् एषणा, सम्पदादित्वात् क्विप्, तस्यै, तिस्रः एषणा अपाकर्तुम् 'ऊर्जे' ज्ञानबलं लब्धुम्, उभयत्र तुमर्थयोगा चतुर्थी। 'त्वा' त्वामेव आश्रयामः नान्यम्।

२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ननु कथमनिगृहीतेन्द्रियः प्राप्नुयात् ज्ञानबलमित्याशंक्याह 'वायवः' इति। तच्च आवर्तते। एकं सम्बोधनपरम्, द्वितीयं वेगवत्तरवाचकम्। 'भो वायवः' प्राणोपलक्षितानि इन्द्रियाणि ! यूयं 'वायवः' गत्वराः वेगवत्तराः 'स्थ' वर्तध्वे। अतः 'वः' युष्मान् 'सविता देवः' जगतो जनयिता सर्वप्रेरकः परमात्मा 'श्रेष्ठतमाय कर्मणे' सन्मार्गप्रवृत्तये 'प्रार्पयतु' प्रगमयतु। तथा च सत्कर्मानुष्ठानेन शुद्धान्तःकरणो निगृहीतेन्द्रियग्रामः सुतरां ज्ञानबलं समासादयेदेवेति भावः। पुनराचष्टे—'अनमीवाः' व्याधिरहिताः, 'अयक्ष्माः' महारोगवर्जिताः, 'प्रजावतीः' प्रजावत्यः दर्शनश्रवणादिलक्षणनानाविधवृत्तिरूपप्रजोपेताः, 'अघ्न्याः' हन्तुमनर्हाः कुपथप्रवृत्त्या, गावः इन्द्रियाणि 'आप्यायध्वम्' पुष्टाः सबला ज्ञानबलानुकूला भवत। 'इन्द्रायेति' षष्ठ्यर्थे चतुर्थी। 'इन्द्रस्य' व्रजेन्द्रस्य श्रीकृष्णस्य 'भागम्' भक्ति कुरुध्वमिति शेषः। तथा 'स्तेनः' रागादिः 'माघशंसः' माय यमाय अघं पापं शंसति सूचयति तथाभूतोऽधर्मः। 'वः' युष्माकं भक्तेन्द्रियाणां 'मा ईशत' समर्थो मा भूत्। भक्तेन्द्रियाणि अधर्मेण तत्सहचररागादिचौरेण वा प्रभावितानि न भवेयुरित्यभिप्रायः। किं च यूयं गावः भक्तेन्द्रियाणि 'गोपतौ' हृषीकेशे श्रीकृष्णे, गोपाले। गोपतिपदेन अत्र गोपवेशो विष्णुर्देवकीपुत्रः श्रीकृष्ण एव ग्राह्यः 'कृष्णोऽसि आखरेष्ठः' (शुक्ल-यजु० ३. १)। 'त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्।' (शु० यजु० ३४. ४३) 'यदप्रवीता दधतेह गर्भम्' (ऋ० ५. ७. ६) 'देवकीपुत्राय कृष्णाय' (छान्दोग्योप० ३. १७) इत्यादिवचनेभ्यः। कीर्तनश्रवणादिपराः 'बह्वीः' बह्वयः, बहुप्रकाराः तदेकनिष्ठा भूत्वा 'ध्रुवाः' स्थिराः, निश्चलाः 'स्यात' भवत। हृषीकेश ! 'यजमानस्य' अर्चकस्य, भक्तस्य 'पशून्' चञ्चलेन्द्रियाणि 'पाहि' रक्ष। यथा तानि कुपथे न गच्छेयुस्तथा विधेहि इति।

२. दोहनानुवाकः

वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधा असि। परमेण धाम्ना दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥ २ ॥

१. शाखायां पवित्रबन्धनम्, २. दोहनार्थं स्थाल्यादानम्, ३. स्थाल्या अधिश्रयणम्।

देवयाजिपक्षभाष्यम्

अस्यां कण्डिकायां त्रयो मन्त्राः। उपगुह्यमानायां शाखायां पवित्रबन्धनार्थः 'वसोः पवित्रमसि' इत्येकः। स्थाल्यादानः 'द्यौरसि पृथिव्यसि' इति द्वितीयः। स्थाल्यधिश्रयणः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'मातरिश्वनः' इत्यारभ्य कण्डिकान्तस्तृतीयः (श० ब्रा० १. ७. १. ६, ११; का० श्रौ० ४. २. १५-१६[1], १९-२०[2])।

प्रथमस्य मन्त्रस्य याजुषी उष्णिक् छन्दः, वायुर्देवता, परमेष्ठी प्राजापत्य ऋषिः, पवित्र-बन्धनार्थे विनियोगः। द्वितीयस्य ऋषिरुक्तः, दैवी जगती छन्दः, उखा देवता, स्थाल्यादाने विनियोगः। तृतीयस्यापि च ऋषिरुक्तः, जगती छन्दः, स्थाल्यधिश्रयणे विनियोग इति विशेषः।

अथ प्रथमं मन्त्रं व्याचष्टे—वसोरिति। हे दर्भमय पवित्र! त्वं 'वसोः' वासयति वृष्टयादिद्वारा स्थापयति विश्वमिति वसुर्यज्ञः 'यज्ञो वै वसुः' (श० ब्रा० १. ७. १. ९) तस्य तदुपलक्षितहविर्द्रव्यरूपगोक्षीरस्य 'पवित्रमसि' शोधकमसि। 'पूञ् पवने' (क्र्यादिः प० १४८३) पूयतेऽनेनेति करणे 'पुवः संज्ञायाम्' (पा० ३. २. १८५) इतीत्रः प्रत्ययः।

सम्प्रति स्थालीमादत्ते—द्यौरसि इति। हे स्थालि! त्वं 'द्यौरसि', मृज्जलाभ्यां निष्पन्ना सती जलवृष्टिकारकद्युरूपा भवसि, 'पृथिव्यसि' मृदा निष्पन्नत्वाद् मृदुपलक्षितगोक्षीरधारकत्वाद् वा सर्वाधाररूपा पृथिवी भवसि।

अथ गार्हपत्याद् उदीचोऽङ्गारान् निरुह्य तेषु स्थालीमधिश्रयति—हे स्थाल्यभिमानि-देवते! त्वं 'मातरिश्वनः' मातरि अन्तरिक्षे श्वसिति चेष्टत इति मातरिश्वाऽन्तरिक्षस्थानो वायुस्तस्य 'घर्मः' दीपकः प्रकाशकः, 'घृ क्षरणदीप्त्योः' (जु० १०९६) अन्तरिक्षलोकोऽसि। पूर्वमन्त्रेण स्थाल्या लोकद्वयरूपत्वं प्रतिपादितम्, अन्तरिक्षरूपत्वं चाऽनेन मन्त्रेण। तस्मात् त्रयाणामपि लोकानां धारकत्वाद् हे स्थालि! त्वं 'विश्वधाः' विश्वं दधातीति धा धातोः कर्तरि 'विच्' प्रत्ययः। विश्वस्य धारयित्री असि। 'परमेण' वहुक्षीरधारणसामर्थ्यरूपेण 'धाम्ना' तेजसा 'दृंहस्व' समृद्धा भव। 'दृह दृहि वृद्धौ' (भ्वा० प० ७३३, ७३४) 'मा ह्वाः' कुटिला वक्रा मा भूः, क्षीरं सम्यग् धारयेति भावः। अन्यथाऽवाङ्मुखायां सत्यां क्षीरस्कन्दनं ध्रुवम्। 'मा ते यज्ञपतिर्ह्वार्षीत्' तव यज्ञपतिर्यजमानोऽपि कुटिलः क्षीरस्कन्दनभिया प्रतिहतयज्ञो मा भूत् इति।

अत्रेदमवधेयम्—त्रीणि वै यज्ञाधिष्ठानानि यज्ञकर्मणि, यज्ञशाला एकम्, पिण्डो द्वितीयम्, ब्रह्माण्डश्च तृतीयम्, यज्ञशालीया होत्रध्वर्युयजमानाः क्रमशः पिण्डे वाङ्मनःप्राणाः, ब्रह्माण्डे चाग्निसूर्यवायव इति।

---

१. 'वसोः पवित्रमि'ति पवित्रमस्यां बध्नाति कुशौ। (का० श्रौ० सू० ४. २. १५)
'त्रिवृद्वा'। (का० श्रौ० सू० ४. २. १६)

२. 'द्यौरसि' इति स्थाल्यादानम्। (का० श्रौ० सू० ४. २. १९)
'मातरिश्वनः' इत्यधिश्रयति। (का० श्रौ० सू० ४. २. २०)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मयाजिपक्षभाष्यम्

हे प्राणोदानव्यानस्वरूप त्रिवृत् पवित्र ! 'पवित्रं वै प्राणोदानौ व्यानश्च' (श० ब्रा० १. १. ३. २-३)। त्वं 'वसोः' ज्ञानयज्ञस्य 'यज्ञो वै वसुः' (श० ब्रा० १. ७. १. ९) 'पवित्रम्' शोधकम् 'असि'। हे मानससूर्य ! त्वं 'द्यौः' प्रजापतेः शिरः सूर्यरूपम् असि, 'शिर एव द्यौः' (श० ब्रा० ६. ३. १. ६)। हे मानसभूमे ! त्वं 'पृथिवी' इन्द्रियमनोबुद्धीनाम् आश्रयभूता सर्वलोकप्रकृष्टा योगभूमिः 'असि'। 'इयं वै पृथिवी सर्पराज्ञी' (श० ब्रा० २. १. ४. ३०) सर्वेषां लोकानां राज्ञीति तदर्थः।

हे मानससूर्य ! त्वं 'मातरिश्वनः' वायोः मातर्यन्तरिक्षे श्वयति-श्वसिति चेष्टते इति मातरिश्वा तस्य 'घर्मः' दीपकः प्रकाशकः समष्टिसूर्यरूपः 'असौ वा आदित्यो घर्मः' (श० ब्रा० ६. ४. २. १९) 'असि'। हे जीवात्मरूपपरशक्ते ! 'जीवभूतां महाबाहो ययेदं धार्यते जगत्' इतीश्वरस्मृतेः (गीता ७) त्वं 'विश्वधाः' सर्वदेहस्य ब्रह्माण्डस्य वा स्वतेजसा धारिका 'असि'। हे मानसकमल ! 'परमेण धाम्ना' सर्वश्रेष्ठेनेन्द्रियशक्तिरूपात्मतेजसा 'दृंहस्व' समृद्धं भव। 'मा ह्वाः' योगेन प्रयत्नाद् ऊर्ध्वमुखीभूय कुटिलम् अधोमुखं मा भूः। 'ते' तव 'यज्ञपतिः' आत्मा 'यजमानो वै यज्ञपतिः' (श० ब्रा० १. ७. १. ११), 'आत्मा वै यज्ञस्य यजमानः' (श० ब्रा० ६. ५. २. १६)। 'मा ह्वार्षीत्' योगक्रियानुष्ठाने कुटिलो मा भूत्। असिद्धयोगानुष्ठानो न स्यादिति भावः।

सात्वतपक्षभाष्यम्

यस्मिन् गोपतौ ध्रुवैरस्माभिर्भवितव्यम्, कीदृशः स इत्याशङ्क्य प्रार्थनामुखेन तत्स्वरूपं तन्महत्त्वञ्च दर्शयति। 'वसोः' वसुदेवस्य 'विनापि प्रत्ययमि'ति देवपदलोपः, सत्यभामा-स्थाने सत्या इतिवत्। कृत्स्ननामस्थाने नामैकदेशं प्रयुञ्जते लौकिका वैदिकाश्च। 'पवित्रं' पवित्रः पावयिता पूर्वपुरुषेण ययातिना यदवे दत्तस्य राज्यभ्रंशक्षत्रियबन्धुत्वादिशापस्य निवारणेन शोधयिता। बहुविवाहद्वारा कुलीनराजन्यवर्गेण समं सम्बन्धस्य यदुसाम्राज्यस्य च स्थापनया शापकलङ्कक्षालयिता इति यावत्। अपि वा 'वसोः' द्रोणवसोर्व्रजराजस्य नन्दस्य निजबालक्रीडया 'पवित्रं' पावयिता, कथं नु नाम नन्दस्य व्रजराजस्य धाम पवित्रं न भवेद् यत्र स्वयं परमात्मा सानन्दं क्रीडति, तदुक्तं केनापि कविना—

> 'शृणु सखि कौतुकमेकं नन्दनिकेतनाङ्गने मया दृष्टम्।
> गोधूलिधूसराङ्गो नृत्यति वेदान्तसिद्धान्तः॥'

भगवत्तातो व्रजराजो नन्दमहानुभावो द्रोणवसोरवतार इति पौराणिकसमयः। पुनरपि विशिनष्टि—'द्यौरसि' इति। मदाराध्य परमात्मन् ! त्वं 'द्यौः' द्योतनं प्रकाशश्चिदात्मकः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'असि' वर्तसे । 'पृथिवी' महती सत्ता सद्रूपता, स्थावरजङ्गमेषु सर्वेषु सत्ताया भासमानत्वेन प्रथनात् । 'असि' वर्तसे । अलं बहुना, सदात्मकस्त्वमसि । पुत्रजन्म हर्षातिरेकस्य कारणमिति 'वसोः पवित्रम्' इति पदेन वसुदेवादेः प्रमोदकत्वात्प्रभोरानन्दात्मता ध्वनिता । चिदात्मकता सदात्मकता च 'द्यौः' 'पृथिवी' इति शब्दाभ्यां शब्दत एवोक्ता । तथा च सच्चिदानन्दात्मा स गोपतिरिति तात्पर्यम् ।

अपि वा स्वस्वामिनोरभेदविवक्षया 'पृथिवी', पृथिव्याः सत्यभामायाः पतिः । 'द्यौः' द्युलोकवद् द्योतमानाया रमणीमूर्धन्यायाः समुद्रसुताया लक्ष्म्याश्च स्वामीत्यर्थस्त्वमसि । यद्वा कार्यकारणयोरैक्येन 'द्यौः' द्युलोकः 'पृथिवी' पृथिवीलोकश्च त्वमेवेत्यर्थः । अपिच 'मातरिश्वनः' वायोः । 'घर्मः' दीप्तिस्थानमन्तरिक्षम्, 'घृ क्षरणदीप्त्योः' (जु० १०९६) । दीव्यति हि अन्तरिक्षे वायुः सोऽपि त्वमसि । एतेन त्रिलोकीरूपता भगवतो दर्शिता । किञ्च त्वं 'विश्वधाः' विश्वस्य जगतो धारकः पोषकश्चासि,'डुधाञ् धारणपोषणयोः' (जौहोत्यादिकः उ० १०९२) । अनेन विश्वसर्जनरक्षणसंहरणहेतुता भगवतो व्यज्यते । कार्यजातस्य यथा स्वोपादानादुत्पत्तिस्तथैव संहारकाले स्वोपादाने एव लयः,सत्ताकाले तत्रैव स्थितिश्चेति भगवतो 'यतो वा इमानि भूतानि' 'जन्माद्यस्य यतः' इति श्रुतिसूत्रप्रसिद्धा जगदुपादानतोपपादिता ।

अपि वा 'मातरिश्वनः' भीमसेनस्य 'घर्मः' दीपकः प्रोत्साहकः, भगवत्संकेतेन प्रोत्साहितेन भीमेन जङ्घायां गदाप्रहारेण दुर्योधनो निहत इति भावः ।

पूर्वोक्तदिव्यगुणसम्पन्न प्रभो ! 'मा ह्वाः' अस्मासु कुटिलो मा भूः । रोष औदासीन्यञ्चात्र कौटिल्यम् । अस्मासु रुष्टेनोदासीनेन च भवता न भवितव्यमित्यभिप्रायः । 'यज्ञपतिः' यजनं यज्ञः, भगवत्पूजा तस्य पतिः अनुष्ठाता भगवदुपासको मादृशो जनः, 'मा ह्वार्षीत्' कुटिलो मा भूत्, भगवदुपासनावैमुख्यमेवात्र कौटिल्यम् । वयं त्वद्भक्ताः सततं त्वदुपासने निरताः स्यामेत्याकूतम् । एकवचनं जात्यभिप्रायकम् ।

अथ स्वाभिलषितं मुक्तकण्ठमाभणति— परमेणेति । 'परमेण' उत्कृष्टेन 'धाम्ना' तेजसाऽस्मानुपासकान् 'दृंहस्व' वर्द्धयस्व । परा मा मानं लक्ष्मीर्वा यस्य तत् परमं तेन । पानं 'पः' रक्षणम्, 'पा रक्षणे' (अदादिः प० १०५६) 'घञर्थे कविधानम्' इति कः, तेन रमयति लोकान् स्वभक्तान् वेति तेन रक्षणद्वाराऽऽनन्ददायकेनेति साहित्यविदः ।

वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ।।३।।

१. स्थाल्या उपरि शाखापवित्रस्थापनम्, २. आसिच्यमाने पयसि पवित्रकरणम्, ३. गोदोहने प्रश्नः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

अस्यामपि तृतीयस्यां कण्डिकायां त्रयो मन्त्राः। वसोः पवित्रमसीत्यारभ्य सहस्रधारमित्यन्तः प्रथमः, दोग्धुकामेनाऽध्वर्युणा स्थाल्या उपरि परिपवनार्थं 'शाखापवित्रस्थापनार्थं पठितव्यः। देवस्त्वेत्यारभ्य सुप्वेत्यन्तो द्वितीयः, स्थाल्यामासिच्यमाने पयसि पवित्रकरणार्थः। 'कामधुक्षः' इति तृतीयः, प्रश्नात्मकः। प्रथममन्त्रस्य याजुषं छन्दः, वायुर्देवता। द्वितीयस्य साम्नी त्रिष्टुप् छन्दः, पयो देवता। तृतीयस्य दैवी बृहती छन्दः, प्रश्नो देवता। परमेष्ठी प्राजापत्य ऋषिः समेषां समानः (श० ब्रा० १. ७. १. १४-१७, का० श्रौ० ४. २. २१[1], २३[2], २४[3])।

हे शाखापवित्र ! त्वं 'वसोः' प्रजापतिनिवासभूतस्य पयसः 'पवित्रम्' शोधकमसि। कीदृशं पवित्रम् 'शतधारम्' 'सहस्रधारम्', शतसंख्या धारा यस्मिन्, सहस्रसंख्या धारा यस्मिन्निति बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः। यद्वा शतसहस्रशब्दावनन्तवचनौ, अनन्तधारमित्यर्थः। 'शतम्' इति बहुनामसु पठितम् (निघ० ३. १)। यद्वा 'शं' प्रजापतिः 'शं वै प्रजापतिः'(श० ब्रा० २. ५. २. १२) इति श्रुतेः। 'तम्' अमृतम्, 'शतं' प्रजापतिसम्बन्ध्यमृतम्, तस्य धारा यस्मिन् तत् शतधारम्, 'सहस्' ब्रह्मज्योतिः 'राति' ददातीति 'सहस्रं' पयस्तस्य धारा यस्मिन् तत् सहस्रधारं 'वसोः पवित्रमसि' इति। द्विर्वचनमभ्यासदार्ढ्यार्थम्। अत आह यास्कः 'अभ्यासे भूयांसमर्थं मन्यन्ते' (निरु० १०. ४२) इति।

अथ द्वितीयं मन्त्रं व्याचष्टे— देव इति। दोहनादूर्ध्वं स्थाल्यां सिच्यमान हे क्षीर ! 'सविता देवः' जगत्स्रष्टा प्रजापतिः, 'त्वा' त्वां शतधारेण 'सुप्वा' सुष्ठु शोधकेन। सुष्ठु पुनातीति सुपु, कर्तरि क्विप् प्रत्ययः, 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० १. २. ४७) इति ह्रस्वः, तेन 'वसोः' यज्ञसम्बन्धिना 'पवित्रेण' त्वां 'पुनातु' शोधयतु।

'काम् अधुक्षः' इति दोग्धारं प्रत्यध्वर्योः प्रश्नः। षण्णां दोह्यमानानां गवां मध्ये त्वं 'काम्' कतमाम् 'अधुक्षः' दुग्धवानसि। 'दुह्' प्रपूरणे (अदादि० प० १०१४) लुङि मध्यमपुरुषैकवचने रूपमिति।

आत्मयाजिपक्षभाष्यम्

देहस्थप्राणानुद्दिश्याह—हे प्राणोदानव्यानस्वरूप पवित्र ! 'अयं वै पवित्रं योऽयं पवते' (श० ब्रा० १. १. ३. २) त्व 'वसोः' आत्मनिवासभूतदेहरूपहविषः 'पवित्रं' 'शोधकम्' असि। किंभूतं पवित्रम् ? 'शतधारम्','शम्' आनन्दः,'तम्' अमृतम्, आनन्दामृतस्य धारा यस्मिन् तत्।

---

१. 'वसोः पवित्रम्' इति पवित्रमस्यां करोत्युदग्वा। (का० श्रौ० सू० ४.२.२१)

२. स्थाल्यन्वारब्धे 'देवस्त्वा' इत्यासिच्यमाने जपति। (का० श्रौ० सू० ४.२.२३)

३. 'कामधुक्षः' इति प्रश्नः। (का० श्रौ० सू० ४.२.२४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे वायो ! 'वसोः' ईश्वरनिवासभूतब्रह्माण्डरूपहविषः,'अन्नं वै विराट्' (श० ब्रा० १२.२.४.५)। 'सहस्रधारम्' 'सहः' ब्रह्मज्योतिः,'रः' परा प्रकृतिरिति 'सहस्रं' परा नाम ब्रह्मज्योतिः, तस्य धारा यस्मिन् तत् सहस्रधारं 'पवित्रम्' असि। हे ज्ञानेन्द्रियसमूह ! 'देवः सविता' दिव्यं प्रसवितृ स्वस्वव्यापारेषु सर्वेन्द्रियाणां प्रेरकं मनः 'मनो ह वा अस्य सविता' (श० ब्रा० ४.४.१.१)। 'शतधारेण' आनन्दामृतधारायुक्तेन 'सुप्वा' सुष्ठु पुनातीति सुपु तेन सुप्वा सम्यक् पावकेन 'वसोः' ज्ञानयज्ञस्य 'पवित्रेण' प्राणोदानव्यानरूपेण 'त्वा' त्वां 'पुनातु' शोधयतु, शुभकर्मणि प्रवर्तयत्विति। मनोऽध्वर्युः, 'मनो वा अध्वर्युः'(श० ब्रा० १. ५. १. २१) दोग्धारं जीवात्मानं पृच्छति— हे दोग्धर्जीवात्मन् ! अधिभूताऽधिदैवाऽध्यात्मसम्बन्धिनीनां बुद्धिरूपगवां मध्ये त्वं 'काम्' कतमां बुद्धिरूपां गाम् 'अधुक्षः' ब्रह्मज्ञानं दुग्धवानसि।

सात्वतपक्षभाष्यम्

न केवलं वसुदेवस्य व्रजराजनन्दस्य वा अपितु जीवमात्रस्य शुद्धिसाधनं परमात्मेत्याह— वसोरिति।

'वसोः' जीवमात्रस्य, वसति लोके इति वसुर्जीवस्तस्य 'पवित्रं' शुद्धिसाधनं, जीवमात्रस्य शोधकत्वाभिप्रायेण पुनर्वचनम्। अन्यथेदं वाक्यं नैष्फल्यमापद्येत वसुदेवादिपवित्रताया द्वितीयकण्डिकास्थितेनानेन वाक्येनोक्तत्वात्। किञ्च 'शतधारं' नामैकदेशस्य नामस्थाने निर्देश-दर्शनात् 'शतधारम्' 'शतं' शतधन्वानं 'धरति' निगृह्णाति, निगृह्य संहरतीति तं शतधारं, स्वश्वशुरघाती शतधन्वा भगवता निगृह्य व्यापादित इति पौराणिकी कथाऽत्रानुसन्धेया। धरतिरत्र निग्रहार्थः, राजपुरुषैस्तस्करा धृता निगृहीता इत्यत्र निग्रहार्थे तत्प्रयोगात्। निगृहीताः, धृताः, निगडिता इत्यनर्थान्तरम्। निर्लिङ्गत्वेऽपि परमात्मनः शब्दस्वरूपापेक्षं पुंस्त्वादिकम्, तद् ब्रह्म, स परमेश्वरः, सा परा शक्तिरिति शब्दभेदेन लिङ्गभेददर्शनात्। 'दृष्टं शब्दान्यत्वे लिङ्गान्यत्वमि'ति भाष्यम्। अत्र ब्रह्मापेक्षं नपुंसकत्वम्। किञ्च 'सहस्रधारं' त्वं परशुरामवपुषि सहस्रस्य सहस्रबाहुनामधेयस्य राजन्यस्य धारकं, निगृह्य घातकम्। परशुरामेण अकारणं स्वपितृनिहन्ता सहस्रबाहुर्व्यापादितः। अथवा 'शतधारं' शतं भ्रातरः दुर्योधनादयस्तेषां धारकं महाभारतसंग्रामे निग्राहकं धार्तराष्ट्रघातकं, 'सहस्रधारं' सहस्रं भ्रातरो यदवस्तेषां पारस्परिक-विग्रहे धारं घातकम्। भूभाराः कौरवा यदवश्च परिवारस्नेहमविगणय्य धर्मसंस्थापनाय व्यापादिता इति तात्पर्यम्। अपि वा 'शतधारं' एकाधिकशतनाडीयुक्तं हृदयं 'शतञ्चैका हृदयस्य नाड्यः' इति प्रश्नछान्दोग्ययोः श्रुतम्। 'सहस्रधारं' सहस्रदलं ब्रह्मरन्ध्रस्थितं सहस्रारचक्रं वृन्दावनकैलासाद्यपरपर्यायम्। 'पुनातु' इत्यपकृष्यते, तदिह पुरुषव्यत्ययेन सम्बध्यते। स्वक्रीडनेन मामकीनं हृदयं, मस्तिष्कस्थितं वृन्दावननामधेयं सहस्रदलकमलञ्च पुनीहि, मम हृदि सहस्रारे च भवान् क्रीडतु, इति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समक्षं प्रार्थ्य परोक्षं प्रार्थयते— 'देवः' द्योतमानो भक्ताभीष्टप्रदाता वा। 'सविता' सर्वप्रेरकः सर्वोत्पादको वा भगवान्, 'त्वा' त्वां जीवं पुनातु। केन? 'वसोः' जीवस्य 'पवित्रेण' स्वप्रतिपाद्यनिष्कामयज्ञाद्यनुष्ठानद्वाराऽन्तःकरणशोधकेन 'शतधारेण' 'शतम्' एकोत्तरशतं धाराः शाखा यस्य तेन शतधारेणैकशतशाखासमन्वितेन यजुर्वेदेन 'एकशतमध्वर्युशाखाः' इति महाभाष्यवचनम्। न केवलमनुष्ठानतः, पाठतोऽपि भगवान् वेदः पापमपाकरोति— इत्यभिप्रायेण 'सुप्वा' इति, 'सु' सुखेनानायासेन पाठमात्रत इति यावत्, 'पुनाति' असंख्यजन्मार्जितदुरितजातं दूरीकरोतीति सुपूः वेदस्तेन पाठमात्रतः पापहारकेण। अथवा 'शतं' 'धारा' वाक् (निघ० १.११.२) वाचा तत्कायभूत उपदेशोऽत्र लक्ष्यते। शतोपदेशदायिना वेदेनेत्यर्थः। यद्वा शतधारशब्देन शतशाखोपेतो यजुर्वेदः, सहस्रधारशब्देन च श्लेषमहिम्ना सहस्रशाखोपेतः सामवेदः, किञ्चिदधिकसहस्रसूक्तोपेत ऋग्वेदश्च लक्ष्यते। तथा च त्वं 'शतधारं सहस्रधारम् असि' इत्यनेन वेदत्रयीरूपता भगवतो दर्शिता। अपि वा पट्टराज्ञ्यष्टकाभिप्रायेण स्वल्पोनशतपुत्रत्वम्, अष्टोत्तरशताधिकषोडशसहस्रराज्ञ्यभिप्रायेण वा सहस्रपुत्रत्वं भगवतः सुबोधम्। प्रश्नोपनिषदि (३-६) दर्शितद्वासप्ततिसहस्रप्रतिशाखानाडीसंख्यानुसारेण हृदयस्य सहस्रधारत्वमपि सुव्याख्येयम्। शतसहस्रशब्दयोरनन्तवाचितामङ्गीकृत्यानन्तधारमिति त्वपव्याख्यानम्। तथा सति शतधारोक्त्यैव निर्वाहे सहस्रधारशब्दो निरर्थकः स्यात्।

अपि वा शतधारसहस्रधारशब्दावग्रे षोडशाध्याये प्रतिपादितशतरुद्रियहोमदेवताम्, एकत्रिंशपुरुषसूक्ताध्यायवर्णितं सहस्रशीर्षं पुरुषञ्च क्रमेण दर्शयतः।

'देवस्त्वा' इत्यस्यापरा व्याख्या—'देवः' सविता। 'त्वा' त्वां कृष्णं, स्वकन्यां कालिन्दीं दत्त्वा पुनातु, हीनक्षत्रियत्वराज्यभ्रंशादिशापलाञ्छितत्वत्कुलकलङ्कक्षालनं करोतु। 'उत्कृष्टैः कृते कन्यादानभोजनादिव्यवहारे केनचिद् हेतुना गर्हितानां हीनत्वमपगच्छति, निन्दकाश्च मुद्रितमुखाः सम्पद्यन्ते। अत एव भगवतो बहुदारसङ्ग्रहः। कथं कलङ्कक्षालनेत्याह— 'वसोः' वसुदेवस्य तत्कुलस्य 'पवित्रेण' पवित्रत्वबोधकेन 'शतधारेण' असंख्यवाग्युक्तेन विस्तृतेन, 'नेदं कुलं हीनं राज्यानर्हं वा, यतो भगवद्भक्तजनिमात्रेण कुलं पोपूयते किमुत भगवज्जन्मना। निःशङ्कं सर्वैः कुलीनै राजन्यैरस्मिन् कुले स्वकन्यका दातव्याः। सर्वेषां क्षत्रियाणां मूलपुरुषोऽहं निजसुतां भगवते कृष्णाय प्रयच्छामि' इत्यादिकेन घोषणावाक्येन।

उपासकं पृच्छति परमात्मा। भो भक्त! त्वं 'कां' किंस्वरूपामनिर्वचनीयामलौकिकीं वा वाचम् 'अधुक्षः' मदुपासनया दुग्धवान्, लडर्थे लुङ्, 'धोक्षि' दोग्धुमिच्छसि वेति। 'कामधुक्षः' इत्येकं पदं मत्वा 'समस्ताभिलषितपूरयिता भगवान्' इति त्वपव्याख्यानमेव पदपाठविरोधात्। पदकारा हि 'काम्' 'अधुक्षः' इति पदद्वयं पृथक् पठन्ति।

अपि वा स्वाश्रमेऽध्येतुं समायातं भगवन्तं सान्दीपनिर्गुरुराह—कृष्ण! मद्गुरु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुलेऽवस्थाय कां विद्याम् 'अधुक्षः' धोक्षि, अध्येतुमभिलषसि इति। अपि वा यशोदां मातरं कृष्ण आह— मातः! मम निमित्तं 'कां' गाम् 'अधुक्षः' दुग्धवानसि, या विशिष्टा गावो वर्तन्ते तासां पयः पेयं मया, नान्यासाम्, अतस्ता एव मदर्थं दोग्धव्या इति भावः।

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः।
इन्द्रस्य त्वा भागँ सोमेनातनच्मि विष्णो हव्यँ रक्ष ॥ ४॥

१-३. प्रश्नोत्तराणि, ४. आतञ्चनम्, ५. हव्यरक्षाप्रार्थना।

देवयाजिपक्षभाष्यम्

चतुर्थ्यां कण्डिकायां पञ्च मन्त्राः। 'सा विश्वायुः' 'सा विश्वकर्मा' 'सा विश्वधायाः' इति त्रयः प्रश्नोत्तरात्मकाः। 'इन्द्रस्य त्वा' इत्यारभ्य 'आतनच्मि' इत्यन्तो दध्यातञ्चनमन्त्रः। 'विष्णो' इत्यादिः प्रार्थनामन्त्रः (श० ब्रा० १. ७. १. १७-२१, का० श्रौ० ४. २. २५[1] - २६[2], ३३[3] - ३४[4])।

'सा विश्वायुः' 'सा विश्वधायाः' इत्यनयोः दैवी बृहती छन्दः, 'सा विश्वकर्मा' इत्यस्य च दैवी पङ्क्तिः। समानः सर्वेषां परमेष्ठी प्राजापत्य ऋषिः, गौर्देवता। प्रश्नोत्तरे विनियोगः। 'इन्द्रस्य त्वा भागं सोमेनातनच्मि' इत्यस्येन्द्रो देवता, याजुषी जगती छन्दः। क्षीरसोमयोर्मिश्रणे विनियोगः। 'विष्णो०' इत्यस्य याजुषी गायत्री छन्दः, पयो देवता। विष्णुप्रार्थनायां विनियोगः। परमेष्ठी प्राजापत्य ऋषिस्तु अनयोरपि समानः।

दुग्धानां गवां मध्ये 'अमूं दुग्धवानस्मि' इति दोग्ध्रा संकेतितेऽध्वर्युराह— 'सा विश्वायुः' अदःशब्दप्रतिनिर्दिष्टा सा सांसारिककामप्रदा गौर्विश्वायुःप्रदा, जगतः स्थितिहेतुरित्यर्थः। विश्वस्य आयुर्जीवनं यया सा इति बहुव्रीहिसमासे पूर्वपदभूतस्य विश्वशब्दस्यान्तोदात्तः स्वरः 'बहुव्रीहौ विश्वं संज्ञायाम्' (पा० ६. २. १०६) इति सूत्रेण। पुनः प्रश्ने— 'सा' भक्तिप्राप्तिहेतुभूता 'विश्वकर्मा' विश्वस्य जगतः कर्माणि सिध्यन्ति यया सा सर्वकर्मसाधिका, आज्यरूपहविर्दानेन यज्ञफलरूपवृष्ट्या सृष्टिकर्त्री। स्वरः प्राग्वत्। पुनरपि प्रश्ने 'सा' ज्ञानदात्री गौः 'विश्वधायाः' विश्वेषां सर्वेषां देवमनुष्यादीनां धायः धारणं पानं वा यया सा। विश्वेषां धारयित्री धापयित्री वा गौः। बहुव्रीहिसमासे प्राग्वत् स्वरः। धायः इति 'डुधाञ्

---

१. प्रोक्ते 'सा विश्वायु'रित्याह। (का० श्रौ० सू० ४. २. २५)
२. एवमितरे उत्तराभ्यां प्रतिमन्त्रम्। (का० श्रौ० सू० ४. २. २६)
३. उद्वास्यातनक्ति प्राग् हुतशेषेण 'इन्द्रस्य त्वा' इति। (का० श्रौ० सू० ४. २. ३३)
४. सोदकेनोपदधात्यमृन्मयेन 'विष्णो हव्यम्' इति। (का० श्रौ० सू० ४. २. ३४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धारणपोषणयोः' (जुहो० उ० १०९२) इत्यतः, 'धेट् पाने' (भ्वादिः प० ९०२) इत्यतो वा कृतात्त्वाद् भावेऽसुन् णिच्च 'वहिहाधाञ्भ्यश्छन्दसि' (उ० ४. २२२) इत्युणादिसूत्रेण । णित्त्वात् 'आतो युक् चिण्कृतोः' (पा० ७. ३. ३३) इति युगागमः ।

अथ चतुर्थमन्त्रेण क्वथितं क्षीरमातनक्ति—इन्द्रस्येति । हे क्षीर ! 'त्वा' त्वाम् 'इन्द्रस्य' 'भागम्' अंशम् इन्द्रदेवत्यसांनाय्यहविर्निमित्तं 'सोमेन' प्रातर्होमावशिष्टेन दध्ना, सोमवल्लीरसेनान्येन वा आतञ्चनद्रव्येण 'आतनच्मि' दध्यर्थं घनीभावमापादयामि । 'तञ्चू संकोचने' (रुधादिः, प० १४६०) । अथ पञ्चमेन मन्त्रेण तत् क्षीरं सुरक्षिते क्वचिद् यज्ञस्थाने अपिधाय रक्षति—विष्णो इति । हे 'विष्णो' ! यज्ञपुरुष ! 'हव्यम्' सांनाय्यहविःसाधनमिदं हवनीयं द्रव्यम् 'रक्ष' गोपाय । 'हु दानादनयोः' (जुहो० प० १०८३) कर्मणि 'अचो यत्' (पा० ३. १. ९७) हूयते इति हव्यम् इति ।

दर्शेष्टौ तावदिन्द्रदेवत्यस्य सांनाय्यहविषः सिद्ध्यर्थमुपयुज्यमानानां क्रियाणां प्राधान्येन विनियोगो द्वाभ्यामनुवाकाभ्यां कण्डिकाचतुष्टयेन व्याख्यातः । प्रथमेऽनुवाक आद्यया कण्डिकया पञ्चभिर्मन्त्रैः यथाक्रमं १. शाखाच्छेदनम्, २. तत्संनमनम्, ३. मातृभिः वत्ससंयोजनम्, ४. वत्सापाकरणम्, ५. शाखोपगूहनम् इत्येताः क्रियाः, द्वितीयेऽनुवाके च तिसृभिः कण्डिकाभिर्द्वयोरेकैकं त्रिभिर्मन्त्रैस्तृतीयस्यां पञ्चभिरेवं समुदितैरेकादशभिर्मन्त्रैः क्रमशः १. शाखायां पवित्रबन्धनम्, २. स्थाल्यादानम्, ३. स्थाल्यधिश्रयणम्, ४. स्थाल्यां पवित्रस्थापनम्, ५. आसिच्यमाने पयसि पवित्रकरणम्, ६. गोदोहनप्रश्नः, ७. प्रश्नोत्तराणि, ८. आतञ्चनम्, ९. हव्यरक्षाप्रार्थनेत्येताः क्रिया दर्शिताः ।

प्रथमेऽनुवाके ५, द्वितीये ११ एवं द्वयोरनुवाकयोः समुदिता मन्त्रसंख्या १६ ।
अग्रे तृतीयानुवाकाद् दर्शपूर्णमासोभयेष्टिसाधारणा विधयः प्रतिपादयिष्यन्ते ।

आत्मयाजिपक्षभाष्यम्

अमूं गां बुद्धिं दुग्धवानस्मीति दोग्धुर्जीवात्मनः प्रतिवचने मनोऽध्वर्युः प्राह— 'सा' आधिभौतिकी बुद्धिः 'विश्वायुः' जगत्स्थितिनिदानम् । पुनः प्रश्नप्रतिवचने मनोऽध्वर्युराह— 'सा' आधिदैविकी बुद्धिः 'विश्वकर्मा' जगतः कर्त्री । पुनः प्रश्नप्रतिवचने मन आह—'सा' आध्यात्मिकी बुद्धिः 'विश्वधायाः' विश्वस्य धात्री । हे इन्द्रियसमूह ! 'इन्द्रस्य' यजमानस्य 'इन्द्रो वै यजमानः' (श० ब्रा० ५. २. ५. ७) 'भागम्' अंशम् 'त्वा' त्वाम् 'सोमेन' प्राणेन 'प्राणो वै सोमः' (श० ब्रा० ७. ३. १. ४५) 'आतनच्मि' दृढं करोमि । हे 'विष्णो' ! हे यज्ञपुरुष ! 'यज्ञो वै विष्णुः' (श० ब्रा० १. १. २. १३) 'हव्यं' जीवात्मानम् । 'जीवं वै देवानां हविरमृतममृतानाम्' (श० ब्रा० १. २. १. २०) 'रक्ष' संसारचक्रात् पाहि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

पूर्वकण्डिकायां 'कामधुक्षः' इति विहितं प्रश्नं समाधत्ते—सेति। व्रजराजनन्दस्य गृहे तिस्रो गावः प्रशस्ता आसन्। एका सा यस्याः पयःपानेन बालो दीर्घं जीवति। द्वितीया सा यस्याः पयः पीत्वा बालः सर्वाणि कर्माणि कर्तुं क्षमते, साक्षादुत्साहमूर्तिः कर्मठः सम्पद्यते। तृतीया सा यस्या दुग्धं पीत्वा बालः परोपकृतिनिरतः विश्वं पुष्णाति। त्रितयमपि प्रकाराभिप्रायेण न व्यक्त्यभिप्रायेण। अर्थात् त्रिविधा गाव आसन्न केवलं तिस्र इत्यभिप्रायः। वेदेषु वागपि त्रिविधा प्रोक्ता ऋग्यजुःसामलक्षणा। प्रश्नक्रमेण व्याख्यायते। उपासको ब्रूते—'विश्वायुः' 'विश्वं' समस्तम्,'आयुः' जीवनं ययेति विश्वायुः। सुप्रतिपादितव्याधिप्रतिकारसाहाय्येन हि व्याधिरहितः सन् पुमान् शतं वर्षाणि यावज्जीवति। न हि प्रवलभयङ्कररोगाक्रान्तः कौमारे यौवने प्रौढे वयसि वा कश्चिन्नीयते। व्याधिप्रतिकारश्च चिकित्साशास्त्रेण। चिकित्साशास्त्रम् 'आयुर्वेदः', स च ऋग्वेदोपवेदः। यदाहुश्चरणव्यूहकाराः— तत्र वेदानामुपवेदाश्चत्वारो भवन्ति। ऋग्वेदस्यायुर्वेद उपवेदः, यजुर्वेदस्य धनुर्वेद उपवेदः, सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्यार्थशास्त्रं चेत्याह भगवान् व्यासः (ख० ४)। एवं च सति 'विश्वायुः' शतवर्षजीवित्वलक्षणकृत्स्नायुः-सम्पादिका चिकित्सासम्वद्धा या ऋग्लक्षणा वाक् सा मया दोग्धव्या। एवं 'विश्वकर्मा' दर्शपौर्णमासादिसकलकर्मकलापसाधिका यजुर्लक्षणा या वाक् सा दोग्धव्या। एवमग्रेऽपि। 'विश्व-धायाः' विश्वान् सर्वान् श्रान्तान् प्राणिनो दधाति, धारयति, प्रोत्साहयति श्रान्त्यपनोदेन, पुष्णाति वा हर्षातिरेकेणेति विश्वधायाः। विश्वोपपदाद्धधातेरसुन्, बाहुलकात् णित्वे युगागमः। एषा गीतिप्रधाना सामलक्षणा वाक्। गान्धर्वविद्यानिष्णातगीतं श्रुतिमधुरं चेतोहरसङ्गीत-माकर्ण्य व्यपनीतश्रमः को नु नाम न पुनर्यथापूर्वं कर्म कर्तुमुत्सहते। को वा सञ्जातहर्षातिरेको न पुष्यति। तस्माद् या सर्वोत्साहिका सर्वपोषिका च सामलक्षणा वाक् सा मया दोग्धव्या, भवत्प्रसादाद् वेदत्रयीरहस्यमवगच्छेयमिति भावः।

कृष्णगुरुसंवादेऽपि एवमेव योजना। गुरुचरणाः! युष्मत्प्रसादाद् वेदत्रयीतत्त्व-साक्षात्कारो मे भवेदिति भावः।

मातृकृष्णसंवादे 'विश्वायुः' दीर्घजीवित्वसाधनपयस्वती या गौः, सा मदर्थं दोग्धव्या। 'विश्वकर्मा' कर्मप्रवृत्त्युत्साहहेतुभूतपयोयुक्ता या सा दोग्धव्या। 'विश्वधायाः' विश्वपोषिका परोपकृतिरतिसम्पादकदुग्धवती या सा दोग्धव्या।

व्रजे प्रतिवर्षम् इन्द्रयजनप्रथासीत्। इन्द्रमखेन इन्द्रं यजमानान् व्रजवासिनस्ततो निवर्त्य गोवर्धनमखमनुष्ठातुं प्रेरयामास भगवान् कृष्ण इतीमां कथां कण्डिकाशेषेण वेदो विवृणोति—इन्द्रस्येति। 'इन्द्रस्य'। देवराजस्य, 'भागम्' भजनीयम्, इन्द्रमखं, षष्ठ्यर्थे द्वितीया, इन्द्रमखस्य स्थान इत्यर्थः। 'सोमेन' शान्तेन हिंस्रशून्येन सस्यश्यामलेन, अत एव गोवर्धनेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तन्मखेन 'त्वा' त्वाम् व्रजवासिगणम् 'आतनच्मि' सङ्गमयामि, संयोजयामि। तञ्चतिर्गत्यर्थोऽन्तर्भूतणिजर्थः। इन्द्रमखं परित्यज्य त्वया गोवर्धनमखोऽनुष्ठेय इति भावः। गोवर्धनमखसञ्जातकोपेनेन्द्रेण व्रजप्लावनाय कल्पान्तकारिणः संवर्तकप्रमुखा मेघाः प्रेषितास्ते चानर्गलं समुसलधारं व्रजप्लावनाय ववृषुः। ततो भीतो गोपवर्गः प्रार्थयते—विष्णो इति। हे 'विष्णो' कृष्ण! 'हव्यम्' होतव्यम् दातव्यमादातव्यञ्च वस्तुजातम्, 'हु दानादनयोः' (जुहो० प० १०८३) आदानेऽपि चेत्येके। तस्माद् यति वान्तादेशे हव्यशब्दो निष्पन्नः। अपि वा हवनं हवः 'तत्र साधुः' (पा० ४.४. ९८) इति यत् प्रत्ययः। होमोपयुक्तं पयोदध्यादि, तत्साधनगवादिकं, तन्निवासगोष्ठादिकञ्च सर्वं 'रक्ष' पालय इन्द्रप्रकोपादिति भावः।

३. ग्रहणानुवाकः

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्।
इदमहमनृतात्सत्यमुपैमि ॥ ५ ॥

व्रतोपायनम्।

देवयाजिपक्षभाष्यम्

पञ्चमकण्डिकायां द्वौ मन्त्रौ कर्मानुष्ठानप्रतिज्ञार्थौ—'अग्ने' इत्यादिः, 'इदमहम्' इत्यादिश्च। तत्र 'अग्ने' इत्यस्य परमेष्ठी प्राजापत्य ऋषिः, आर्षी उष्णिक् छन्दः, अग्निर्देवता। इदमहमित्यस्य साम्नी गायत्री छन्दः। ऋष्यादिकं पूर्ववत् (श० ब्रा० १. १. १. २; का० श्रौ० २. १. ११) यजमानो गार्हपत्यदक्षिणाग्न्योरन्तरालेन गत्वाऽऽहवनीयस्य पश्चात् प्राङ्मुखस्तिष्ठन्नग्निमीक्षमाणोऽप उपस्पृश्य व्रतमुपैति—'अग्ने' इति।[1] 'व्रतपते अग्ने' व्रतस्यानुष्ठेयस्य कर्मणः पते पालक! हे अग्ने! 'अग्निर्वै देवानां व्रतपतिः' (श० ब्रा० १. १. १. २)। 'व्रतम्' अनुष्ठेयं कर्म 'चरिष्यामि' अनुष्ठास्यामि। 'तत्' कर्म 'शकेयम्' अनुष्ठातुं शक्तो भूयासं त्वत्प्रसादात्। 'शक्लृ शक्तौ' (सौवादिकः प० १२६२) तत आशीर्लिङि उत्तमपुरुषैकवचने शक्यासमिति प्राप्ते शकेयमिति छान्दसं रूपम्। 'तत्' कर्म 'मे' मदीयम् 'राध्यताम्' फलपर्यन्तं निष्प्रत्यूहं निष्पाद्यताम्। 'अहम्' यजमानः 'अनृतात्' अस्मादनृताद् मनुष्यजन्मन उद्गत्य 'इदं सत्यम्' यज्ञमयं देवताशरीरम्, अनुष्ठीयमानकर्मरूपेण प्रत्यक्षम् 'उपैमि' प्राप्नोमि। अनृतं

१. अन्तरेणापराग्नी गत्वा परेणाहवनीयं प्राङ् तिष्ठन् अग्निमीक्षमाणोऽप उपस्पृश्य व्रतमुपैति 'अग्ने व्रतपते' 'इदमहम्' इति वा। (का० श्रौ० सू० २. १. ११)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुष्यजन्म शीघ्रविनाशित्वात्, यथा स्वप्नगजादयो प्रबोधमात्रेण शीघ्रं निवर्तमाना अनृता उच्यन्ते। सत्यं देवजन्म बहुकालस्थायित्वात्, यथा जाग्रदवस्थाया गजादयः। अनेन व्रतोपायनेन मनुष्येभ्यो देवानुपावर्तते। यद्वा— लोकप्रसिद्धे एव सत्यानृते ग्राह्ये। 'अनृतं न वदेत्' (ऐ० आ० २. ३. ६) इति कर्मण्यनृतभाषणनिषेधाद्, अनृतवदनाद् उद्गत्याहमिदं सत्यवदनमुपैमि। इदं सत्यवदनं कर्माङ्गत्वाद् मया कर्मानुष्ठानकाले पालनीयमिति भावः।

आत्मयाजिपक्षभाष्यम्

'व्रतपते' व्रतस्यानुष्ठेयस्य ज्ञानयज्ञस्य पते स्वामिन् 'अग्ने' सायुज्यमोक्षे हव्यस्य जीवस्य स्वात्मनि लयकारक हे विष्णो! 'व्रतं' ज्ञानयज्ञानुष्ठानं 'चरिष्यामि' करिष्यामि, 'तत्' 'शकेयम्' कर्तुं शक्तो भूयासम्। 'तत्' 'मे' मदीयं ज्ञानयज्ञानुष्ठानं 'राध्यताम्' निर्विघ्नं सत् फलपर्यन्तं सिद्धचतु। 'इदम्' 'अहम्' यजमानः 'अनृतात्' संसारात् 'सत्यं' ब्रह्म, 'सत्यं ह्येव ब्रह्म' (श० ब्रा० १४. ८. ५. १) 'उपैमि' प्राप्नोमि।

सात्वतपक्षभाष्यम्

पतिंवरा नन्दव्रजकुमारिकाः 'कृष्णोऽस्माकं पतिर्भूयात्' इत्यभिप्रायेण कात्यायनीव्रतमनुतस्थुः, प्रार्थयामासुश्च भगवन्तं स्वव्रतसाफल्याय। सोऽयमर्थोऽनया कण्डिकया प्रतिपाद्यते। 'अग्ने' अग्निवत् तेजस्विन्! त्वं निगिरतो बकासुरस्य तालुमूलस्याग्निवद् दाहक वा। 'व्रतम्' त्वत्प्राप्तये कात्यायन्यर्चनव्रतं, 'चरिष्यामि' आचरिष्यामि, प्रतिव्यक्त्यभिप्रायेणैकवचनम्। 'तत्' व्रतमनुष्ठातुम्। 'शकेयम्' शक्यासम्। भवत्प्रसादेन मम व्रतानुष्ठाने कश्चिद् विघ्नो मा भूत्। 'मे' मम, 'तत्' व्रतम्, 'राध्यताम्' संसिद्धचतु, सफलतां गच्छतु। 'अहं' व्रताननुष्ठानरूपाद् 'अनृतात्' मिथ्याभूतात् काचकल्पादस्थिरात् विनाशिनो लौकिकदाम्पत्यात्। तत्परित्यज्येत्यर्थः, ल्यब्लोपे पञ्चमी। 'इदम्' मधुरभावभावुकसाधकप्रत्यक्षम्, 'सत्यम्' अवितथं नित्यम् अविनाशि दिव्यं भगवत्सम्बन्धि दाम्पत्यम् 'उपैमि' उपगच्छामि। सर्वे जीवाः पत्नीस्थानीयाः। तेषां सर्वेषां भगवान् एक एव पतिरिति भारतीयसात्वतसमयः। अत एव भक्ताग्रणीः कबीरः प्राह— एको भगवान् पुरुषः स मामुद्वाह्य शिविकायामारोप्य आत्मना सहादाय गच्छति, न किञ्चित् कथ्यते न च श्रूयते, यद् दृष्टं तदुद्घुष्यते वधूवराविव सङ्गतौ जीवेशौ। वरयात्रासदस्यसाधनसन्दोहः सम्प्रति ग्लानिमुपगत इति।

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति। कर्मणे वां वेषाय वाम् ॥ ६॥

१. प्रणीतानाम् (चमससंगृहीतानामपाम्) उत्तरेणाऽऽहवनीयं सादनम्, २. शूर्पाग्निहोत्रहवण्योरादानम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

षष्ठ्यां कण्डिकायां द्वौ मन्त्रौ। 'कस्त्वा' इत्यारभ्य 'तस्मै त्वा युनक्ति' इत्यन्तः प्रथमः, 'कर्मणे' इत्यादिकश्च द्वितीयो मन्त्रः। तत्र प्रथमेनापां प्रणयनम्। उत्तरेणाहवनीयं सम्प्रति सादनं च (श० ब्रा० १. १. १. १३, का० श्रौ० २. ३. २-३)। द्वितीयेन शूर्पाग्निहोत्रहवण्यो-रादानम् (श० ब्रा० १. १. २. १, का० श्रौ० २. ३. १०)।

कस्त्वा युनक्तीति साम्नी त्रिष्टुप् छन्दः, प्रजापतिर्देवता, कर्मणे वामिति प्राजापत्या गायत्री छन्दः, स्रुक्शूर्पौ देवते। उभयोः परमेष्ठी प्राजापत्य ऋषिः समानः।

एवं व्रतमुपेत्य ब्रह्माणं वृत्वाऽपां प्रणयनं कुर्याद्—'ब्रह्मन्! अपः प्रणेष्यामि, यजमान! वाचं यच्छ इत्याह' 'अनुज्ञातोऽध्वर्युरुत्तरेणाहवनीयं सम्प्रति प्रणीता अपो निदधाति' (का० श्रौ० २. ३. २-३)। मन्त्रं प्रयुञ्जानोऽध्वर्युः यज्ञारम्भकर्मण्यात्मनः कर्तृत्वं निराकृत्य प्रजापतेः कर्तृत्वं द्वाभ्यां प्रश्नोत्तररूपाभ्यां वाक्याभ्यां प्रतिपादयति—कस्त्वेति[1]। हे प्रणीतानामपां धारक पात्र! 'त्वा' त्वां 'कः' कः पुरुषः 'युनक्ति' आहवनीयस्योत्तरभागे स्थापयतीति प्रश्नः। 'सः' सर्ववेदेषु जगतां पालकत्वेन प्रसिद्धो यः प्रजापतिः स एव परमेश्वरः 'त्वा' 'युनक्ति' इत्युत्तरम्। 'कस्मै' प्रयोजनाय 'त्वा युनक्ति' इति पुनः प्रश्ने, 'तस्मै' स्वात्मनः प्रीत्यर्थं 'त्वा युनक्ति' इति प्रत्युत्तरम्। सर्वकर्माणि परमेश्वरार्पणबुद्ध्यैवानुष्ठेयानीति भावः। अत एव भगवद्गीतायामुक्तम् 'ब्रह्मार्पणम्' (४. २४) इति,

'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥' (९. २७) इति च।

अथ 'कर्मणे वाम्' इत्यादिना शूर्पमग्निहोत्रहवणीं च आदत्ते—कर्मणे वामिति।[2] हे शूर्प! हे अग्निहोत्रहवणि! 'वाम्' युवां 'कर्मणे' यज्ञकर्मसम्पादनार्थम्, अहम् 'आददे' इति शेषः। 'वाम्' युवाम् 'वेषाय' वेषो व्याप्तिस्तस्मै। 'विष्लृ व्याप्तौ' (जु० उ० १०९५), भावे घञ्। निर्दिष्टकर्मसु व्याप्त्यर्थं युवामादद इति शेषः।

शकटेऽवस्थितानां व्रीहीणां हविरर्थं पृथक्करणं, प्रोक्षणार्थोदकधारणमित्यादयोऽग्निहोत्र-हवणीव्यापाराः। व्रीहिनिर्वापधारणम्, उलूखले व्रीहिप्रक्षेपः, पुनरुद्धरणं चेत्यादयः शूर्प-व्यापारा इति।

आत्मयाजिपक्षभाष्यम्

'आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्' (तै० आ० १०. १५. १) इति श्रुतेरपां

१. अनुज्ञात उत्तरेणाहवनीयं सम्प्रति निदधाति—'कस्त्वा' इति। (का० श्रौ० सू० २. ३. ३)
२. 'कर्मणे वाम्' इति शूर्पाग्निहोत्रहवण्यादाय वाचं यच्छति। (का० श्रौ० सू० २. ३. १०)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धारक पात्र हृदय ! 'त्वा' त्वां 'कः' 'युनक्ति' स्थापयति, 'सः' प्रजापतिः । 'ब्रह्म वै प्रजापतिः' (श० ब्रा० १३. ६. २. ८) 'त्वा' त्वां 'युनक्ति' । 'कस्मै' कस्मै प्रयोजनाय 'त्वा' त्वां 'युनक्ति', 'तस्मै' तद्ब्रह्मण आप्त्यै 'त्वा युनक्ति' । हे मनोबुद्धी ! 'वाम्' युवां 'कर्मणे' ज्ञानयज्ञनिष्पत्त्यर्थम् । आदद इति शेषः । 'वां वेषाय' युवां व्याप्त्यर्थं विष्णुभावप्राप्त्यर्थम् । आदद इति शेषः । देहरूपशकटाद् इन्द्रियरूपहविषः पृथक्करणं, प्रोक्षणार्थम् 'आपो ज्योतीरसोऽमृतम्' (तै० आ० १०. १५. १) इत्युदकधारणम् इत्यादयो मनसो व्यापाराः । तद्हविर्निर्वापधारणम्, उलूखले हार्दान्तरिक्षे प्रक्षेपः, पुनरुद्धरणं चेत्यादयो बुद्धिव्यापाराः । 'अन्तरिक्षं वा उलूखलम्' (श० ब्रा० ७. ५. १. २६) ।

सात्वतपक्षभाष्यम्

धृतगोशरीरया पृथिव्या सहितः सदेवश्चतुराननः क्षीरोदोपकण्ठे गत्वा भगवन्तं धराधाम्नि भूभारावतारणाय समागन्तुमभ्यर्थयाञ्चक्रे । ब्रह्मणाभ्यर्थितो जगदीश्वरो मथुरायां वसुदेवसद्मनि जगदनुजिघृक्षयावततार । ब्रह्मपरामर्शेन अन्येऽपि देवा देव्यश्च भगवन्तमुपसेवितुं पृथिव्यां मानुषं शरीरं जगृहुः । इमामेव कथां प्रश्नोत्तरशैल्या व्याहरति वेदपुरुषः—कस्त्वेति ।'कः' अनिर्दिष्टनामा प्रयोक्ता 'त्वा' त्वां भगवन्तं धराधाम्नि प्रादुर्भवितुम् । 'युनक्ति' प्रेरयतीति प्रश्नवाचिकिंशब्दनिष्पन्नेन 'कः' इत्यनेन पृष्ट्वा, प्रजापतिवाचिना 'क'शब्देन समाधत्ते—'कः' प्रजापतिः ब्रह्मा । एकेनैव शब्देन प्रश्नोत्तरे अत्र दर्शिते । एषा वचोभङ्गी श्रोतृविस्मापनाय । ब्रह्मणा प्रेरितो भवान् इमां भुवं स्वजन्मना समलञ्चकारेति भावः । शब्दान्तरेण उत्तरयति—'सः', 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वेता० ६. १८) इतिश्रुतिप्रसिद्धो हिरण्यगर्भः 'त्वा' त्वां भगवन्तं 'युनक्ति' भुव्यागमनाय प्रयुङ्क्ते । 'कस्मै' किंनिमित्तम्, 'तस्मै' 'अतो धर्माणि धारयन्' इति मन्त्रप्रख्यातधर्मसंस्थापनादिनिमित्तम् । धर्मस्थापना, शिष्टानुग्रहः, दुर्जननिग्रहश्च भवदवतरणनिमित्तमिति भावः । बलरामाभिप्रायेण न केवलं त्वाम् अपितु 'वां' युवां रामकृष्णौ 'कर्मणे' केशिनरकादिपापिष्ठसंहाराय । 'वेषाय' वेषो व्याप्तिः सर्वासु दिक्षु धर्मप्रसारस्तदर्थमिति ।

प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः । उर्वन्तरिक्षमन्वेमि ॥ ७ ॥

१. शूर्पाग्निहोत्रहवण्योः प्रतपनम्, २. अन्तरिक्षगमनम् (शकटं प्रति गमनम्) ।

देवयाजिपक्षभाष्यम्

सप्तमकण्डिकायां द्वौ मन्त्रौ । 'प्रत्युष्टं रक्षः' इति प्रथमः । 'उर्वन्तरिक्षम्' इत्यपरः । प्रथमेन शूर्पाग्निहोत्रहवण्योः प्रतपनपूर्वकं रक्षोदहनम् । अपरेणाऽन्तरिक्षगमनम् (शकटं प्रति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गमनम्) (श० ब्रा० १. १. २. २-४ ; का० श्रौ० २. ३. ११-१२)। प्रथमस्य आसुरी बृहती छन्दो, रक्षो देवता। अपरस्य प्राजापत्या गायत्री छन्दः, ब्रह्मरक्षोघ्नो देवता। परमेष्ठी प्राजापत्य ऋषिस्तुल्यः।

शूर्पाग्निहोत्रहवण्योः प्रतपनं करोति—प्रत्युष्टमिति[1] मन्त्रेण। 'रक्षः' राक्षसजातिः 'प्रत्युष्टम्' प्रतिदग्धम्। 'उष दाहे' (भौवादिकः प० ६९६)। अनेन शूर्पाग्निहोत्रहवणीप्रतपनेनोपस्थिता राक्षसा दग्धा इति भावः। 'अरातयः' हविषो दक्षिणाया वा दानं रातिः। 'रा दाने' (आदादिकः प० १०५७)। उपचाराद् दातरि प्रयोगः। रातिर्दाता। न रातिः—अरातिः। अदाता दानप्रतिबन्धकः। 'अव्यये नञ्' कुनिपातानामिति वार्तिकसामर्थ्यात् 'तत्पुरुषे तुल्यार्थ०' (पा० ६. २. २) इत्यादिना सूत्रेण पूर्वपदप्रकृतेरुदात्तत्वम्। येऽपि रातिप्रतिबन्धका अदातारः शत्रवस्तेऽपि 'प्रत्युष्टाः' प्रत्येकं दग्धाः। अन्यथा न यज्ञसाधनम्। 'रक्षः' शूर्पादौ निगूढं सूक्ष्मरूपेण वर्तमानं रक्षः क्रम्यादि। 'निष्टप्तम्' निश्शेषेण तप्तं संतप्तम्। 'तप संतापे' (भौवादिकः प० ६८५) 'अरातयः' शत्रवश्च 'निष्टप्ताः'।

शकटं प्रति गच्छति—उर्विति।[2] 'उरु' विस्तीर्णम् 'अन्तरिक्षम्' अवकाशं शकटं प्रतीति भावः। 'अन्वेमि' अनुसृत्य गच्छामि। अन्तरिक्षं शकटं प्रति गच्छतः पुरुषस्य सर्वतः स्थितं यज्ञविघ्नकारकं रक्षो मन्त्रेणानेन निराक्रियत इत्यभिसन्धिरिति।

आत्मयाजिपक्षभाष्यम्

मनसो बुद्धेश्च संस्काराद् 'रक्षः' अज्ञानम् 'प्रत्युष्टम्' प्रतिदग्धम्, अज्ञानकार्यदाहाद् रक्षोरूपमज्ञानमपि प्रत्युष्टमित्युच्यते। 'अरातयः' शत्रवः कामादयः 'प्रत्युष्टाः' प्रदग्धाः। 'रक्षः' बुद्ध्यादौ निगूढं मोहरूपं 'निष्टप्तम्' निःशेषेण तप्तं संतप्तम्। 'तप सन्तापे' (भ्वा० प० ६८५)। 'अरातयः' ज्ञानयज्ञस्य प्रतिबन्धकाः क्रोधादयः 'निष्टप्ताः'। 'उरु' विस्तीर्णम् 'अन्तरिक्षम्' मानसकमलम्। 'मनोऽन्तरिक्षलोकः' (श० ब्रा० १४. ४. ३. ११)। 'अन्वेमि' अनुसृत्य गच्छामि। अत्र योगसिद्धेः पूर्वं कः प्रयत्नः योगसिद्धौ काऽवस्थेति च प्रश्नः। उत्तरम्—'देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्य आसङ्गाद् विभयांचक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षांस्यतोऽपहन्ति' (श० ब्रा० १. १. २. ३)। 'य एवं वेदाहं ब्रह्मास्मीति, स इदं सर्वं भवति, तस्य ह न देवाश्चनाभूत्या ईशत, आत्मा ह्येषां स भवति' (श० ब्रा० १४. ४. २. २२)।

सात्वतपक्षभाष्यम्

अवतारितभूभारः स्वधाम जिगमिषुर्नन्दनन्दनः स्वलीलासंवरणमुद्धवं प्रत्याह—प्रत्युष्टमिति।

---

१. प्रतपनं 'प्रत्युष्टम्' 'निष्टप्तम्' इति वा। (का० श्रौ० सू० २. ३. ११)

२. गच्छति 'उर्वन्तरिक्षम्' इति। (का० श्रौ० सू० २. ३. १२)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'प्रति' प्रतीपं यत्र ,कुत्रापि उपलब्धं 'रक्षः' नरकादिरक्षोगणः 'उष्टम्' उष्टः दग्धः। 'निष्टप्तम्' निःशेषेण तापितं समूलघातमुपहतम्। दाहः केवलं निवारणं न व्यापादनम्। यथा वाणासुरो दुश्चरिताचरणात् निवारितो न तु हतः। नरकाद्यसुरजातं तु समूलघातमुपहतम्। इयानेव विशेषः दाहनिष्टप्तयोः। 'अरातयः' दानरहिता दानादिसत्कार्यविरोधिनः शत्रवः, प्रत्युष्टाः निष्टप्ताश्च। यत्र कुत्रोपलब्धा धर्मविरोधिनस्ते सर्वे तथाऽऽचरणान्निवारिताः। अथवा समूलघातं हता इति भावः। उद्धव ! समाप्तं मदीयं धरागमनप्रयोजनम्, कृतकृत्योऽहं सम्प्रति, 'उरु' विशालमन्तरिक्षम् अन्तरीक्षते यत् सर्वान्तरदृक् तद् ब्रह्म, ह्रस्वत्वं छान्दसम्। विश्वान्तर्यामि सर्वभूतान्तरात्मभूतं स्वकीयं नैजं विशुद्धं प्रज्ञानानन्दविग्रहम्, 'अन्वेमि' 'अनु' देवाभीप्सितपूर्त्यनन्तरम् 'एमि' प्राप्नोमि। मायाप्रतिभासितलीलाविग्रहमुपसंगृह्णामि। त्वमितो बदरिकाश्रमं तपश्चरणाय प्रतिष्ठस्व, मध्येमार्गं विदुरेण सङ्गत्य तुभ्यं मयोपदिष्टं यद् भागवत-तत्त्वं तत् श्रोतुं मैत्रेयोपकण्ठे तं प्रेषयेति भावः।

राष्ट्रियास्तु—राजधर्मपरायामस्यां कण्डिकायां राज्ञः कर्तव्यस्य विशेषनिर्देशः, पूर्वं राज्ञा सत्कार्यविघ्नकारिणो दुर्जना राष्ट्रद्रोहिणश्च शत्रवः निहन्तव्याः, तेषां चेतो वा परि-वर्तनीयं, येन ते कुपथं परित्यज्य सत्पथे समागच्छेयुः। ततः कृतकृत्येन तेन राज्ञा भगवदुपासने स्वात्मचिन्तने च सततं प्रवर्तितव्यम्, परमात्मवद् दुष्टप्रवृत्तिनिवारणे सावधानेन च भवितव्यम्। दाहो निवारणं, चित्तपरिवर्तनम्। निष्टापः संहारः। 'उरु' अन्तरिक्षं 'विशालं' परमात्मानम् 'अन्वेमि' अनुसरामि। परमात्मस्वभावोऽहं भवेयम्। स च दुष्टप्रवृत्तिनिवारणसावधानतयैव। अपि वा—'अन्तरिक्षं' सर्वान्तर्द्रष्टृ 'उरु' महद् ब्रह्म 'अन्वेमि' अनुभवामीति विशिष्टशब्दार्थः। शिष्टं समानमिति मन्यन्ते।

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः।
देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥ ८ ॥

१. शकटस्य धुरोऽभिमर्शनम्, २. उपस्तम्भनाभिमर्शनम्।

देवयाजिपक्षभाष्यम्

अष्टमकण्डिकायां द्वौ मन्त्रौ। शकटस्य धुरोऽभिमर्शनार्थो मन्त्रः—धूरसीति। ईषाग्रस्य भूमिस्पर्शनाऽभावार्थमुपस्तम्भनाभिमर्शनो मन्त्रः—देवानामसीति। 'धूरसि' इत्यस्य देवाना-मसीत्यादिमन्त्रस्य चोभयोः परमेष्ठी प्राजापत्य ऋषिः, याजुषी छन्दः, धूर्देवता (श० ब्रा० १. १. २. ९-१२; का० श्रौ० २. ३. १३-१४)।

अनडुहोः स्कन्धयोरुपरि निधीयमानौ युगस्य प्रान्तौ युगशम्यान्तरालौ धूःपदवाच्यौ।
४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्रीहिरूपहविर्धारकशकटस्य दक्षिणां धुरमभिमृश्योत्तरां धुरमभिमृशति।[१] धुरि हिंसकः कश्चिदग्निरस्ति तं प्रार्थयते—धूरिति। 'अग्निर्वा एष धुर्यस्तमेतदत्येष्यन् भवति' (श० ब्रा० १. १. २. १०) इति श्रुतेः। हे अग्ने ! त्वं 'धूः' हिंसकः। 'धुर्वी हिंसार्थः' (भौवादिकः प० ५७३)। ततः क्विपि 'राल्लोपः' (पा० ६. ४. २१) इति रेफादुत्तरस्य वकारस्य लोपे रूपम्। 'असि'। 'धूर्वन्तं' हिंसन्तम् अधःपतनकारिणं पाप्मानं 'धूर्व' जहि। 'तम्' यज्ञकर्मणि विघ्नकर्तारञ्च 'धूर्व' नाशय। 'यः' दुष्टात्मा 'अस्मान् धूर्वति' हिंसितुमुद्युङ्क्ते। 'तम्' अपि आलस्यादिकं शत्रुं 'धूर्व' अपनय, 'यं वयं धूर्वामः' यज्ञानुष्ठानसिद्धचा प्राप्तव्ये देवशरीरादिलक्ष्ये प्रत्यूहकारिणं यं वयमपनिनीषामः।

शकटधुरमभिमृश्याधुनोपस्तम्भनस्य पश्चाद्भागे वर्तमानामीषां स्पृशति—'देवानाम्' इत्यादिना मन्त्रेण।[२] शकटे दीर्घं काष्ठम् 'ईषा'। ईषाग्रस्य भूमिस्पर्शो मा भूदिति तदाधारतया स्थापितं काष्ठम् 'उपस्तम्भनम्'। तत्पश्चाद्भागे स्थिताम् ईषां स्पृशेदिति भावः। हे शकट ! त्वं 'देवानाम्' देवोद्देश्यकव्रीहियवादिधान्यानां 'वह्नितमम् असि' प्रकृष्टं वहनसाधनमसि, वहतीति वह्निः। 'वह प्रापणे' (भौवा० उ० १००४)। ततोऽतिशायने 'तमप्' प्रत्ययः 'अतिशायने तमबिष्ठनौ' (पा० ५. ३. ५५) इत्यनेन। 'सस्नितमम्' अतिशयेन शुद्धम्, 'ष्णा शौचे' (आदादिकः प० १०५२) अथवा चर्मादिभिरतिशयेन वेष्ठितम्। 'ष्णै वेष्टने' (भौवादिकः प० ९२३)। 'आदृगमहन०' (पा० ३. २. १७१) इत्यादिना सूत्रेण 'किन्' प्रत्ययो लिड्वद्भावश्च। 'पप्रितमम्' व्रीहिधान्यादिभिः सर्वथा पूर्णमसि। 'प्रा पूरणे' (आदादिकः प० १०६१) 'किन्' प्रत्ययः प्राग्वत्। 'जुष्टतमम्' देवानां प्रियतमम्। 'जुषी प्रीतिसेवनयोः' (तुदादिः आ० १२८९)। 'देवहूतमम्' देवानामतिशयेनाह्वातृ त्वमसि। 'ह्वेञ् स्पर्धायां शब्दे च' (भौवादिकः उ० १००८)। देवान् आह्वयतीति तथोक्तम्। व्रीह्यादिधान्यपूर्णं शकटं दृष्ट्वा देवा आहूता इव यज्ञमागच्छन्तीति भावः।

आत्मयाजिपक्षभाष्यम्

हे प्राणाग्ने ! 'प्राणोऽग्निः' (श० ब्रा० १०. २. ६. १८)। त्वं 'धूः' हिंसकः, धुर्वी हिंसार्थः, धुर्वतेः क्विप्। 'असि'। 'धूर्वन्तम्' हिंसन्तं शत्रुं बाह्यां वृत्तिं 'धूर्व'। 'यः' कामः 'अस्मान्' 'धूर्वति' समाधौ विघ्नं करोति 'तं धूर्व'। वयं 'यम्' अज्ञानं 'धूर्वामः' तं 'धूर्व'। हे देहरूपशकट ! 'देवानाम्' इन्द्रियाणाम्। यथा श्रुतिः— 'प्राण एवेन्द्रः, जिह्वा सरस्वती, नासिके अश्विनौ, व्यानो वरुणः' (श० ब्रा० १२. ९. १. १४-१६)। 'वह्नितमम्' हविषोऽति-

---

१. 'धूरसि' इति धूरभिमर्शनम्। (का० श्रौ० सू० २. ३. १३)

२. 'देवानाम्' इत्युपस्तम्भनस्य पश्चादीषाम्। (का० श्रौ० सू० २. ३. १४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शयेन प्रापकम्। 'सस्नितमम्' अतिशयेन शुद्धं, 'ष्णा शौचे' (अदादिः प० १०५२)। 'पप्रितमम्' हविषातिशयेन पूरितम्, 'प्रा पूरणे' (अदादिः प० १०६१)। 'जुष्टतमम्' इन्द्रियाणामतिशयेन प्रियम्, 'जुषी प्रीतिसेवनयोः' (·तुदा० आ० १२८६)। 'देवहूतमम्' इन्द्रियाणाञ्चातिशयेनाऽऽह्वातृ। 'ह्वेञ् शब्दे' (भ्वादिः उ० १००८) 'असि'।

सात्वतपक्षभाष्यम्

केशिनि निहते कंसदूताक्रूरागमनात् प्राग् वृन्दारण्ये देवर्षिर्नारदः सहसोपस्थाय भगवन्तं स्तौति— प्रभो! त्वम् 'धूः' हिंसकः, पादाघातेन शकटस्य उलूखलबद्धनिजगात्रस्पर्शमात्रेण यमलार्जुनस्य च भञ्जकः। पापरुचिना क्रूरेण कंसेन राज्ञा प्रहितस्य पूतनादिकेश्यन्तदैत्यसमूहस्य घातकश्च 'असि' वर्तसे। अलमनेन बालक्रीडितेन राजानुचरसंहारलक्षणेन, त्वं हि निमेषमात्रेण चराचरसंहारसमर्थो, वीराग्रणीरिति भावः।

सम्प्रति 'धूर्वन्तं' धनुर्यागमहोत्सवयोजनया भवन्तं हिंसितुमुद्युक्तमन्याँश्च प्राणिनः पीडयन्तं राजानं कंसं 'धूर्व' घातय। एकदा द्वारिकायां सुधर्माख्यराजसभायामुपविष्टं यदुपतिं कृष्णमुपेत्य देवर्षिर्नारदः युधिष्ठिरस्य 'अहं राजसूयेन यजे, मत्सहायार्थं ससैन्येन भवता सत्वरमिन्द्रप्रस्थे समागतव्यम्' इति सन्देशं ददे। अनुमेने च स तथा समाचरितुम्। तन्नारोचत यदुभ्य इति ते यदवः पूर्वं जरासन्धशिशुपालादिसपत्नगणोऽभियातव्यो निहन्तव्यश्च, अन्यथा अस्माकमसन्निधाने ते सपत्नाः द्वारिकामवरुन्धीरन् इत्यागृह्णन्त ऊचुः— 'धूर्व तं योऽस्मान् धूर्वति' इति यः शिशुपालजरासन्धादिसपत्नोऽस्मान् धूर्वति, आक्रामति तमाक्रान्तारं सपत्नवर्गं पूर्वं 'धूर्व' हिंसय। ततः किञ्चिदन्यद्विधेयम्। ततः पश्चात्तनः कथासन्दर्भो भागवतमहाभारतादितोऽनुसन्धातव्यः।

सभायां कौरवकृतकेशवस्त्राकर्षणादिना सञ्जातकोपा वैरनिर्यातनाय निश्चितदुर्योधनादिनिधना द्रौपदी स्वभ्रातरं प्रभुं प्रति व्याहरति— भगवन्! 'तं धूर्व यं वयं धूर्वामः' यमाततायिनं सहोदरसहितं दुर्योधनं वयं पाण्डवपक्षीयाः सर्वे 'धूर्वामः' हन्तुं समीहामहे 'तम्' दुर्योधनं संग्रामे 'धूर्व' हिंसितुमुद्युक्तो भव। अत्र त्रयः संवादाः—नारदकृष्णसंवादः प्रथमः, यदुकृष्णसंवादो द्वितीयः, द्रौपदीकृष्णसंवादस्तृतीयः। एवं व्याख्याने मात्रयापि नोन्मिषति पौनरुक्त्यम्। प्राचीनभाष्यकारास्तत्परिहाराय विहितबहुप्रयासा अपि न सम्यक् पूर्णमनोरथाः। 'देवानामसि' इत्यारभ्य 'देवहूतमम्' इत्यन्तानि षड् विशेषणानि स्पष्टार्थानि। तथा हि— परमात्मन् कृष्ण! त्वं देवानां स्वामी असि। 'वह्नितमम्' वोढृतमम्, 'सस्नितमम्' अतिविशुद्धम्, सविलासमाययाऽस्पृष्टं त्रिगुणातीतं 'ष्णा शौचे' (अदादिः प० १०५२) 'ष्णै वेष्टने' (भ्वादिः प० ९२३) वा। तत्र 'सस्नितमम्' सर्ववेष्टनकारि सर्वव्यापि, 'पप्रितमम्' सर्वाभिलषितपूरकं, 'जुष्टतमम्' अतिशयेन प्रियम्। 'देवहूतमम्' देवैरतिशयेन स्तुतम्। अथवा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धराधाम्नि स्वागमनावसरे ब्रह्मादिष्टानां देवानां सदाह्वायकं, नपुंसकत्वं छान्दसम्। अपि वा इमानि द्वितीयान्तानि पदानि क्रियाया आक्षेपात् 'भजेयम्' इति शेषः। पूर्वोक्तदिव्यगुणसमन्वितं भगवन्तं शरणं गच्छेयमिति भावः।

अह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत्।
विष्णुस्त्वा क्रमतामुरु वातायापहतꣳ रक्षो यच्छन्तां पञ्च॥ ९॥

१. शकटारोहणम्, २. हविःप्रेक्षणम्, ३. तृणादिनिरसनम्, ४. हविर्ग्रहणम् (हविषः स्पर्शनम्)।

देवयाजिपक्षभाष्यम्

अस्यां नवम्यां कण्डिकायां 'अह्रुतमसि' इत्यारभ्य 'ह्वार्षीत्' इत्यन्तो भागोऽष्टम्यां कण्डिकायां 'देवानामसि' इत्यादिना 'देवहूतमम्' इत्यन्तेन भागेन सम्बद्ध इति ऋषिच्छन्दो-दैवतान्येतस्य भागस्य तत एवोह्यानि। 'विष्णुस्त्वा' इत्यारभ्य कण्डिकान्तं यावत् चत्वारो मन्त्राः। तत्र 'विष्णुस्त्वा क्रमताम्' इति शकटारोहणमन्त्रः। 'उरु वाताय' इति हविःप्रेक्षणार्थको द्वितीयः। 'अपहतं रक्षः' इति तृतीयस्तृणादिनिरसनार्थः। 'यच्छन्तां पञ्च' इत्यन्तिमो मन्त्रो हविष्यग्रहणार्थः।

सर्वेषां समानः परमेष्ठी प्राजापत्य ऋषिः। 'विष्णुस्त्वा क्रमताम्' इत्यस्य याजुषी गायत्री छन्दो, हविर्देवता, 'उरु वाताय' इत्यस्य दैवी पङ्क्तिश्छन्दो, हविर्देवता। 'अपहतं रक्षः' इत्यस्य याजुषी गायत्री छन्दो, रक्षो देवता। 'यच्छन्ताम्' इत्यस्य दैवी पङ्क्तिश्छन्दो, हविर्देवता (श० ब्रा० १. १. २. १३-१६; का० श्रौ० २. ३. १५-१९)।

अष्टम्यां कण्डिकायां प्रवर्तमाना शकटस्तुतिरनुवर्तते। हे शकट! त्वम् 'अह्रुतम्' अकुटिलं भङ्गादिभयादपेतम्। 'ह्वृ कौटिल्ये' (भौवादिकः प० ९३१) 'ह्रु ह्वरेश्छन्दसि' (पा० ७. २. ३१) इति निष्ठायां 'ह्रु'आदेशः। ह्रुतं कुटिलं न भवति तथाऽकुटिलं त्वमसि। 'हविर्धानम्' हविषो व्रीहिधान्यादेर्धारकम् 'असि'। हविर्धीयतेऽस्मिन् अनेन वेत्य-धिकरणे करणे वा 'ल्युट्' प्रत्ययः कृदुत्तरपदप्रकृतिस्वरश्च। तस्माद् 'दृंहस्व' दृढं भव। 'मा ह्वाः'; मा ते यज्ञपतिर्ह्वार्षीदित्युक्ताभिप्रायम्। अथ शकटस्य दक्षिणं चक्रमारोहति—'विष्णुस्त्वा' इति।[१] (का० श्रौ० २. ३. १५)। हे शकट! विष्णुः व्यापको यज्ञरूपो विष्णुः 'त्वा' त्वाम् 'क्रमताम्' आरोहतु। त्वदारोहणेऽहं स्वयमसमर्थो यज्ञपुरुषसामर्थ्यादेव त्वामारुरुक्षामि। 'उरु' विस्तीर्णं मुक्तद्वारं 'वाताय' वायुप्रवेशार्थं भवेति शेषः। वायुरूपप्राणसञ्चाराद् हविष्यं

१. 'विष्णुस्त्वा' इत्यारोहणम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्राणं भवतीत्याशयेन शकटोपरि स्थितं व्रीह्यादिद्रव्यमनेन मन्त्रेणाध्वर्युः प्रेक्षत[१] इति तात्पर्यम् । अन्यथा वातप्रवेशानर्हं वस्तुजातं वरुणदेवत्यं भवति, 'यद्वै वातो नाभिवाति तत्सर्वं वरुणदेवत्यम्' इति तैत्तिरीय श्रुतेः । ऋते व्रीह्यादेर्यदि किञ्चिदन्यद् अनावश्यकं तृणादि-द्रव्यं शकटे भवति तन्निरसितुमाह—अपहतमिति.।[२] 'अपहतम्' निरस्तं 'रक्षः' यज्ञवस्तुविघातकं तृणादिकमिति ।

पञ्चाङ्गुलेन मुष्टिना हविर्द्रव्यमालभते— यच्छन्तामिति ।[३] 'पञ्च' मम पञ्चा-ङ्गुलयः 'यच्छन्ताम्' व्रीहिधान्यादिरूपं हविर्नियच्छन्तु । पञ्चाङ्गुलमुष्टिगृहीतं वस्तु सुनि-यन्त्रितं भवतीति तदाशय इति ।

आत्मयाजिपक्षभाष्यम्

हे देहरूपशकट ! त्वम् 'अह्रुतम्' अवक्रं 'हविर्धानम्' इन्द्रियजीवात्महविषो धारकं पोषकम् 'असि' । 'दृंहस्व' विराट्रूपेण वर्धस्व । 'मा ह्वाः' 'मा ते यज्ञपतिः' आत्मा 'ह्वार्षीत्' समाधौ कुटिलो भवतु । 'विष्णुः' योगी । यथा श्रुतिः—'एतद्वै देवा विष्णुर्भूत्वेमाँल्लोकान-क्रामन्त, तथैवैतद् यजमानो विष्णुर्भूत्वेमाँल्लोकान् क्रमते' (श० ब्रा० ६. ७. २. १०) । 'त्वा' देहरूपशकटं त्वाम् 'क्रमताम्' आरोहतु । 'वाताय' प्राणाय यज्ञाय वा, 'प्राणो वै वातः' (श० ब्रा० १. १. २. १४), 'वातो वै यज्ञः' (श० ब्रा० ३. १. ३. २६) 'उरु' विस्तीर्णं भव । 'रक्षः' अज्ञानम् 'अपहतम्' निराकृतम् । 'पञ्च' पञ्चज्ञानेन्द्रियाणि, 'प्राणा इन्द्रियाणि' (ता० ब्रा० १. १५. २) 'अन्नं हि प्राणः' (श० ब्रा० ३. ८. ४. ८) 'यच्छन्ताम्' नियच्छन्ताम् । प्रश्नः—'पञ्च वा इमा अङ्गुलयः' (श० ब्रा० १. १. २. १६) तत्कथम् । तस्योत्तरम्—अङ्गे— देहे उ एव लयो येषां तानि विषयासक्तेन्द्रियाण्यङ्गुलयः सन्ति—'लीङ् श्लेषणे' । तानि च पञ्च । द्वितीयः प्रश्नः—ज्ञानेन्द्रियार्थेऽतिगूढशब्दकथने किं कारणम् । तस्योत्तरं श्रुत्या— 'तत इन्द्रो मखवानभवत्, मखवान्ह वै तं मघवानित्याचक्षते परोक्षम्, परोक्षकामा हि देवाः' (श० ब्रा० १४. १. १. १३) ।

सात्वतपक्षभाष्यम्

भगवदादेशेन पाण्डववृत्तान्तज्ञानाय हस्तिनापुरमक्रूर आजगाम, तत्र धृतराष्ट्रेण राज्ञा भीष्मादिभिरन्यैश्च परिचितपूर्वैर्बन्धुभिः सङ्गत्य मिथः कुशलप्रश्नपुरस्सरमाललाप । ततः स्वभगिन्याः कुन्त्याः साक्षात्काराय तद्गृहमवाप । उपविष्टे तस्मिन् तद्भगिनी स्मारं स्मारं

१. प्रेक्षते 'उरु वाताय' इति हविष्यान् । (का० श्रौ० सू० २. ३. १६)

२. 'अपहतम्' इति निरस्यत्यन्यत् । (का० श्रौ० सू० २. ३. १७)

३. 'यच्छन्ताम्' इत्यालभते । (का० श्रौ० सू० २. ३. १९)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वपुत्रवधाय दुर्योधनादिभिः कृतं विषदानादिकं भृतहृदया रुद्धकण्ठा साश्रुनयना भ्रातुरुपकण्ठे कृत्स्नमुदन्तं मन्दं मन्दं व्याजहार—भ्रातः! मृतो मे भर्ता, तनयाश्च बालाः, शत्रवः मम सुतान् जिघांसन्ति, आचरन्ति च बहुविधानुपायान्। पुत्रस्नेहवशगो राजा धृतराष्ट्रो न तान् दुष्कृतात् निवारयति प्रत्युत तान् अनुमन्यते। भवद्भिर्यदुभिरुपेक्षिताऽहं, मे शिरसि सञ्जातो विपत्तिपर्वतपातः, नावलोकयामि कमपि सहायम्। किं करोमि, क्व गच्छामि, कं वा शरणं प्रपद्य इति। तां दुःखभरातिरेकशोकविह्वलां सान्त्वयन्नक्रूर आह— 'अह्रुतं' भगिनि! त्वम् अह्रुता, अकुटिला असि। शुद्धा निष्पापा सत्पथगामिनीति तात्पर्यम्, अत एव हविर्धानम्। हविःपदेन हविर्भुजो देवा लक्ष्यन्ते। तेषां धारिकासि। दधातेः कर्तरि ल्युः। नपुंसकत्वं छान्दसम्।

सततसेवाप्रसन्नेन दुर्वाससा गुरुणा दत्तैर्मन्त्रैः देवास्त्वयाऽऽत्मसात्कृताः, तत्प्रसादादेव इमे दिव्याः सुतास्त्वया समासादिताः। त एव देवा एतान् त्वत्पुत्रान् सर्वाभ्यो बाधाभ्यो रक्षिष्यन्ति, अतः स्वपुत्रानिष्टशङ्कया त्वया न शोचनीयमिति भावः।

तस्माद् 'दृंहस्व' दृढा धीरा भव, अविषण्णमानसा भवेति भावः। अपि च 'विष्णुः' व्यापकः सर्वान्तरात्मा वा भगवान् भूभारावतारणाय गृहीतावतारस्तव भ्रातृपुत्रः श्रीकृष्णः 'त्वा' त्वाम् 'आक्रमताम्' आक्रमेत त्वत्समीपमागच्छेद् यथासमयम्। त्वद्रक्षणायोपतिष्ठेत्। 'वाताय' तृतीयार्थे चतुर्थी। 'वातेन' वातात्मजेन भीमेन 'उरु रक्षः' महान् राक्षसः हिडिम्बः 'अपहतम्' अपहतः व्यापादितः। छान्दसत्वान्नपुंसकत्वम्। एकचक्रानगरीवास्तव्या मानवाः स्वभक्षकहिडिम्बरक्षसो निहननेन निरापदो निर्भयाश्च त्वत्सुतेन महाबलेन भीमेन कृता इति परविपन्निवारणसमर्थानां त्वत्पुत्राणां विपदाशङ्का कुतः स्यादिति भावः। कामं सन्तु शतं भ्रातरो दुर्योधनादयः, तान् सर्वान् पञ्च एते तव सुताः 'यच्छन्ताम्' निगृह्णन्तु निगृह्णीयुः। एकेनापि बलिनाऽनेके सपत्ना जेतुं शक्याः, किं पुनः सुरतुल्यपराक्रमैः पञ्चभिस्तव पुत्रैरिति भावः।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि॥ १०॥

१. हविर्ग्रहणम्।

देवयाजिपक्षभाष्यम्

अस्यां दशम्यां कण्डिकायां द्वौ मन्त्रौ हविर्ग्रहणार्थौ। 'देवस्य त्वा' इत्यारभ्य 'अग्नये जुष्टं गृह्णामि' इत्यन्तः एकः आग्नेयहविर्ग्रहणार्थः। 'अग्नीषोमाभ्याम्' इत्यादिको द्वितीयः अग्नीषोमीयहविर्ग्रहणार्थः (श० ब्रा० १. १. २. १७; का० श्रौ० २. ३. २०-२१)। परमेष्ठी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BVRSSMV

प्राजापत्य ऋषिः। आद्यस्य प्राजापत्या गायत्री छन्दः, लिङ्गोक्ता देवता। अन्यस्य याजुषी पङ्क्तिश्छन्दः, लिङ्गोक्ता देवता।

हे हविः! 'सवितुः देवस्य' सर्वसाक्षिभूतस्य सवितुर्दीप्यमानज्योतिषः 'प्रसवे' अभ्यनुज्ञायां विद्यमानः 'अश्विनोः' अश्विनौ हि देवानामध्वर्यू तयोः 'बाहुभ्याम्' अंसमणिबन्धयोर्मध्यमो भागो दीर्घदण्डाकारो बाहुः, ताभ्याम्। 'पूष्णः' पूषा हि देवानां भागधुक्, तस्य 'हस्ताभ्याम्' पञ्चाङ्गुलोऽग्रभागो हस्तः। भागहारकस्य पूष्णो हस्ताभ्याम्। 'अग्नये' 'जुष्टम्' रुचितम्। अत्र जुषिः प्रीतौ वेदितव्यः। अत एव 'रुच्यर्थानां प्रीयमाणः' (पा० १. ४. ३३) इति सूत्रेणाऽग्नेश्चतुर्थी। 'त्वा' त्वां, हविः गृह्णामि[1], 'अग्नीषोमाभ्याम्' त्वां जुष्टं गृह्णामि। अग्नीषोमयोर्देवताद्वन्द्वे 'ईदग्नेः सोमवरुणयोः' (पा० ६. ३. २७) इति पूर्वपदस्याऽग्निशब्दस्य ईदन्तादेशः। न च देवनिमित्तकं हविर्द्रव्यं मनुष्येण ग्रहीतुं शक्यते, चौर्यं तत्र स्यादिति सवित्रनुज्ञया, न स्वबाहुभ्यां किन्तु अश्विनोर्देवाध्वर्य्वोर्बाहुभ्याम्। अथवा स्वबाह्वोरश्विबाहुभावनया, न स्वीयेन पाणिना किन्तु पूष्णो हस्ताभ्याम्। अथवा स्वहस्तयोः पूषहस्तभावनयाऽहं हविर्गृह्णामीति भावः। इष्टदेवतास्मरणपूर्वकमेवोपक्रान्तं कर्म फलवद् भवति नान्यथेति।

यथाऽङ्गानि यथावन्निर्दिष्टानि न तथा प्रधानयागस्य क्वापि सङ्केत इति न भ्रमितव्यम्। प्रथमकण्डिकायाम् 'इन्द्राय भागम्' इत्यनेन चतुर्थ्यां कण्डिकायां च 'इन्द्रस्य त्वा भागं सोमेनातनच्मि' इत्यनेन च वचनेन यथा दर्शेष्टाविन्द्रदेवत्यस्य पयोयागस्य दधियागस्य च प्रधानयागतया सङ्केतः कृतः, तथाऽत्रापि 'अग्नये जुष्टं गृह्णामि' 'अग्नीषोमाभ्यां जुष्टं गृह्णामि' इति वचनाभ्यां दर्शपूर्णमासोभयसाधारण आग्नेयः, पौर्णमासेऽनुष्ठीयमानोऽग्नीषोमदेवत्यपुरोडाशरूपश्च प्रधानयागः सूचितो वेदितव्यः।

आत्मयाजिपक्षभाष्यम्

हे इन्द्रियसमूह! 'सवितुः' प्रेरकस्य गुरोः 'देवस्य' 'प्रसवे' प्रेरणे सति 'अग्नये' ब्रह्मणे 'ब्रह्म वा अग्निः' (श० ब्रा० ५. ३. ५. ३२)। 'जुष्टं' प्रियं 'त्वा' त्वाम् 'अश्विनोः' प्राणोदानयोः, यथा श्रुतिः—'इमे ह वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदं सर्वम् आश्नुवातां पुष्करस्रजावित्यग्निरेवास्यै पुष्करमादित्योऽमुष्यै' (श० ब्रा० ४. १. ५. १६); 'इमे हि द्यावापृथिवी प्राणोदानौ' (श० ब्रा० ४. ३. १. २२)। 'बाहुभ्याम्' ग्रहणशक्तिभ्याम् 'पूष्णः' मनसः, 'अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यः' (श० ब्रा० १४. ४. ३. १९) 'हस्ताभ्याम्' ग्रहणशक्तिभ्याम् 'गृह्णामि'। 'अग्नीषोमाभ्याम्' प्रकृतिपुरुषाभ्याम्, 'पुरुषोऽग्निः' (श० ब्रा०

१. 'देवस्य त्वेति गृह्णात्याग्नेयं चतुरो मुष्टीन्', 'एवमग्नीषोमीयम्', 'यथादैवतमन्यत्'। (का० श्रौ० सू० २. ३. २०-२२)।

1042

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०. ४. १. ६), 'अन्नं हि सोमः' (श० ब्रा० ११. १. ६. १६), 'अन्नं वै विराट्' (श० ब्रा० १२. २. ४. ५), स प्रकृतेर्विकारः, 'जुष्टं' प्रियं त्वां गृह्णामि ।

सात्वतपक्षभाष्यम्

कण्डिकार्धेन कुन्तीमक्रूरः पुनराश्वासयति—सवितुः जगत्प्रेरकस्य स्वस्वकर्मणि प्राणभृत्प्रवर्तकस्य सूर्यस्य । अत्र सूर्येण सूर्यतनयो यमो लक्ष्यते । पुत्रः पित्रात्मेति शास्त्रविदां समयः । 'आत्मा वै पुत्रनामासि' इति श्रुतेः । यमश्च धर्मः, तस्य धर्मस्य धर्मसुतस्य युधिष्ठिरस्य । 'देवस्य' राज्ञः । 'प्रसवे' आदेशे तदनुज्ञाताभ्यामित्यर्थः । 'अश्विनोः' देवभिषजोः, 'बाहुभ्याम्' शत्रुबाधकाभ्याम्, बाध्यन्ते आलोड्यन्ते पदार्था याभ्यामिति 'बाधृ लोडने' (भ्वा० आ० ५) धातोः 'अर्जि०' (उ० १. २७) इत्यादिसूत्रेण कुप्रत्ययो धस्य हश्च । 'पूष्णः' वायोरिन्द्रस्य वा, पुष्णाति प्राणिजातं वृष्ट्या प्राणसञ्चारेण वेति व्युत्पत्तेः । 'हस्ताभ्यां' शत्रुहनने सत्वराभ्यां 'हस्तो हिनस्तेः प्राशुर्हनने' इति यास्कः । राज्ञः पितुश्च विशिष्य कार्यकारिणि अमात्ये पुत्रादौ च अयमस्य राज्ञः पितुश्च दक्षिणो बाहुर्हस्त इति प्रयोगदर्शनात् ।

अश्विपुत्राभ्यां नकुलसहदेवाभ्यां वायोरिन्द्रस्य च क्रमेण पुत्राभ्यां भीमार्जुनाभ्यां 'दृंहस्व' इत्यनुवर्तते, दृढा व्यपगतशोका चिन्तामुक्ता भवेरिति हृदयम् । पुत्रशब्दमनुक्त्वा बाहुहस्त-शब्दोक्त्या शत्रुविनाशसामर्थ्यातिशयो नकुलादीनां ध्वनितः । भगिनि ! 'त्वा' त्वां ब्रवीमीति शेषः । तव सुता नेमे प्राकृता मनुष्याः, किं तर्हि धर्मादिदेवा एव स्वांशैः युधिष्ठिराद्यात्मना गृहीतविग्रहा इति भावः ।

कण्डिकोत्तरार्धं कृष्णार्जुनसंवादात्मकम् । अर्जुन ! अग्निर्जगदीश्वरः, 'वसूनां पावकश्चास्मि' (१०. २३) इति गीतावचनात् । तस्मै अग्नये भगवत्प्रीत्यर्थं, 'जुष्टं' पूर्वैर्बहुभी-राजर्षिभिः सप्रेमानुष्ठितं कर्मयोगं 'त्वा' त्वाम् 'गृह्णामि' ग्राहयामि, बोधयामि, उपदिशामि । कीदृशं त्वाम्—'अग्नीषोमाभ्याम्' अग्निना क्रोधिना भीमेन सोमेन शान्तेन युधिष्ठिरादित्रिकेण च सहितम् । जुष्टमिति पुनर्वचनं कर्मयोगादरातिशयद्योतनार्थम् । अपि वा अग्नीषोमशब्दो भगवद्वचन एव । प्राणिदेहमाश्रित्य प्राणापानादिसमायोगेन चतुर्विधान्नपाचकवैश्वानरात्मनाऽवस्थिताय 'अग्नये' रसात्मना सर्वौषधिपोषकाय 'सोमाय' चन्द्राय च संभूयोक्तम्—अग्नीषोमाभ्यामिति । एक एव भगवान् क्रियाभेदेन द्विधोपदिष्ट इति ध्येयम्, अग्नीषोमात्मक-भगवत्प्रीत्यर्थमिति तात्पर्यम् ।

भूताय त्वा नारातये स्वरभिविख्येषं दृꣳहन्तां दुर्याः पृथिव्याम् । उर्वन्तरिक्ष-मन्वेमि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेऽग्ने हव्यꣳ रक्ष ॥ ११ ॥

१. व्रीहिशेषाभिमर्शनम्, २. प्राक्प्रेक्षणम्, ३. शकटावरोहणम्, ४. अन्तरिक्षगमनम्, ५. हविःसादनम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवयाजिपक्षभाष्यम्

अस्याम् एकादश्यां कण्डिकायां पञ्च मन्त्राः। तत्र 'भूताय त्वा' इति व्रीहिशेषाभिमर्शनार्थो मन्त्रः। अस्य प्राजापत्या गायत्री छन्दः, हविर्देवता। 'स्वः' इति मन्त्रः प्राक्प्रेक्षणार्थः। अस्य याजुषी गायत्री छन्दः, सूर्यो देवता। 'दृंहन्ताम्' इत्यादिः शकटावरोहणमन्त्रः। अस्य प्राजापत्या गायत्री छन्दः, गृहं देवता। 'उरु' इत्यादिश्चतुर्थो मन्त्रोऽन्तरिक्षगमनः। प्राजापत्या गायत्री छन्दः, शकटो देवता। 'पृथिव्यास्त्वा' इति हविःसादनमन्त्रः। अस्य साम्नी पङ्क्तिश्छन्दो, हविर्देवता। समेषां परमेष्ठी प्राजापत्य ऋषिः (शं० ब्रा० १. १. २. २०-२३; का० श्रौ० २. ३. २३-२७)।

हुतावशिष्टं हविरभिमृशति—भूताय त्वेति।[1] हे व्रीह्यादिशेष ! 'त्वा' त्वाम् 'भूताय' भूत्यै कल्याणाय, परिशिष्टं पुनरपि क्षेत्रे बीजरूपेणोप्तं सद् बहु फलिष्यतीत्येतस्मै प्रयोजनाय। 'भू सत्तायाम्' (भौवादिकः प० १), 'नपुंसके भावे क्तः' (पा० ३. ३. ११४) इति क्तः प्रत्ययः। परिशेषयामीति शेषः। 'न' 'अरातये' अदानाय, कस्मैचिद् अदत्त्वा स्वपरिवारपोषणार्थमिदं सुरक्षितं कर्तव्यमिति प्रयोजनाय न परिशेषयामि।

अथ प्राङ्मुखो यज्ञभूमिं प्रेक्षितुं मन्त्रं पठति—स्वरिति।[2] 'स्वः' यज्ञं, यज्ञार्हदेवान्, अहः, सूर्यं वा 'यज्ञो वै स्वरहर्देवाः सूर्यः' (श० ब्रा० १. १. २. २१) स्वर्गसाधनत्वादपि यज्ञः स्वःशब्दव्यपदेश्यः। 'स्वरादित्यो भवति, सु अरणः सु ईरणः' (निरु० २. १४) इति स्वःशब्दस्यादित्यवचनत्वं यास्काभिमतम्। 'अभिविख्येषम्' अभितः सर्वतोभावेन पश्येयम्। 'ख्या प्रकथने' (आदादिकः प० १०६०), विपूर्वः ख्यातिर्दर्शने। अभिविख्यायामित्यर्थे संभावनायां लिङर्थे लेटि शपि 'सिब्बहुलं लेटि' (पा० ३. १. ३४) इति लेटः सिबागमे छान्दसं रूपम्।

अनसोऽवरोहति—दृंहन्ताम् इति।[3] 'दृंहन्ताम्' 'दृहि वृद्धौ' (भौवादिकः प० ७३४)। आत्मनेपदत्वं छान्दसम्। अत्र धातोर्दृढीभावे वृत्तिः, दृढा भवन्तु। 'दुर्याः' दुरो द्वाराण्यर्हन्तीति दुर्याः गृहाः। अर्हार्थे यत् प्रत्ययः। शकटाद् हविरादाय यज्ञशालामभ्युपेतस्य मे भारेण गृहक्षोभो मा भूदित्येतदर्थं यज्ञगृहाणां दाढर्यं कामयते। 'उर्वन्तरिक्षमन्वेमि'[4] इति सप्तमकण्डिकायां व्याख्यातम्। हे हविः ! 'त्वा' त्वाम् 'पृथिव्याः' भूम्याः 'नाभौ' मध्ये 'मध्यं वै नाभिर्मध्यमभयम्' (श० ब्रा० १. १. २. २३) 'सादयामि' स्थापयामि।[5] एतदेव प्रकारान्तरेण व्याचष्टे—

---

१. 'भूताय त्वा' इति शेषाभिमर्शनम्। (का० श्रौ० सू० २. ३. २३)

२. 'स्वः' इति प्राङीक्षते। (का० श्रौ० सू० २. ३. २४)

३. 'दृंहन्ताम्' इत्यवरोहति। (का० श्रौ० सू० २. ३. २५)

४. गच्छति 'उर्वन्तरिक्षम्' इति। (का० श्रौ० सू० २. ३. २६)

५. श्रपणस्य पश्चात्सादयति—'पृथिव्यांस्त्वा' इति। (का० श्रौ० सू० २. ३. २७)

५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'अदित्या उपस्थे' इति। 'अदित्याः' देवमातुः 'उपस्थे' क्रोडे हविरिदं सादयामीति शेषः। देवमातृसमर्पणाद्धविषः यज्ञफलसिद्धिः साधु काम्यते। 'अग्ने' हे हविःश्रपण गार्हपत्याग्ने! 'हव्यम्' तवाङ्के समर्पितमिदं हविः पुत्रमिव माता त्वं 'रक्ष' निर्बाधं पालय, सम्यक् श्रपयेति भावः।

अस्मिन् तृतीयानुवाके 'अग्ने व्रतपते' इति पञ्चमीं कण्डिकामारभ्य 'भूताय त्वा' इत्येकादशीपर्यन्तं सप्तभिः कण्डिकाभिः (५-६-७-८ कण्डिकासु प्रतिकण्डिकं द्वौ मन्त्रौ, नवम्यां चत्वारः, दशम्यां द्वौ, एकादश्यां पञ्च, एवम्) ऊनविंशत्या मन्त्रैः दर्शपूर्णमासोभय-साधारणा विधयः प्रदर्शिताः। ते चेमे यथाक्रमम्— १. व्रतोपायनम्, २. प्रणीतानां सादनम्, ३. शूर्पाऽग्निहोत्रहवण्योरादानम्, ४. तयोश्च प्रतपनम्, ५. शकटं प्रति गमनम्, ६. शकटस्य धुरोऽभिमर्शनम्, ७. उपस्तम्भनाभिमर्शनम्, ८. शकटारोहणम्, ९. हविःप्रेक्षणम्, १०. तृणादि-निरसनम्, ११. हविर्ग्रहणम्, १२. व्रीहिशेषाभिमर्शनम्, १३. प्राक्प्रेक्षणम्, १४. शकटाव-रोहणम्, १५. अन्तरिक्षगमनम्, १६. हविःसादनम्। एवं त्रयाणामनुवाकानां समुदिता कण्डिकासंख्या ११, मन्त्रसंख्या ३५। तृतीयेऽनुवाके हविर्ग्रहणस्य मुख्यत्वेन प्रतिपादितत्वात्तस्य ग्रहणानुवाकत्वं व्यपदिष्टम्।

आत्मयाजिपक्षभाष्यम्

हे पुण्यपापात्मकहविश्शेष! 'भूताय' मित्रशत्रुरूपप्राणिभ्यो देहाभिमानिनां भोगाय वा 'त्वा' परिशेषयामि, 'न अरातये' न पुनर्जन्मभयाद् अदानाय परिशेषयामि। अहम् 'स्वः' ज्ञानयज्ञम्, 'यज्ञो वै स्वः' (श० ब्रा० १. १. २. २१)। भृकुटिं गगनमण्डलं वा 'स्वरिति दिवम्' (श० ब्रा० २. १. ४. ११) 'अभिविख्येषम्' अभितो विशेषेण ख्यापयेयं पश्येयमित्यर्थः। 'पृथिव्यां' देहे वर्तमानाः 'दुर्याः' मानसादिकमलरूपा गृहाः 'दृंहन्ताम्' दृढा भवन्तु। 'उरु' विस्तीर्णम् 'अन्तरिक्षं' मानसकमलं 'मनोऽन्तरिक्षलोकः' (श० ब्रा० १४. ४. ३. ११) 'अन्वेमि' गच्छामि। हे इन्द्रियवर्ग! 'पृथिव्याः' मानसकमलस्य 'नाभौ' मध्ये 'मध्यं वै नाभिः मध्यमभयम्' (श० ब्रा० १. १. २. २३)। 'अदित्याः' जीवरूपायाः परायाः प्रकृतेः, 'इयं वा अस्य सर्वस्य योनिरस्यै वा इमाः प्रजाः प्रजाताः' (श० ब्रा० ४. १. २. ९) तथाचेश्वरस्मृतिः (गीता ७. ५)—

'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥'

'उपस्थे' अङ्के 'त्वा' त्वां 'सादयामि' स्थापयामि। 'अग्ने' हे आत्माग्ने! 'आत्मैवाग्निः' (श० ब्रा० ६. ७. १. २०) 'हव्यम्' इन्द्रियसमूहं 'रक्ष'।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

नन्दो व्याहरति— 'भूताय' श्रेयसे, भूतये, गोपालनविद्यायां प्रगतये वा 'त्वा' त्वां कृष्णं 'गृह्णामि' इत्यनुवर्तते। अर्थः प्राग्वत्। मम पिता कार्पण्यादेवं करोति इत्याशङ्का मा भूत् कृष्णस्येत्यत आह— 'न अरातये', रातिर्दानं तदभावायादानाय। यद्यहं गाश्चारयितुं न गच्छेयं तर्हि तदर्थं कश्चिदनुचरो वेतनेन रक्षणीयस्ततश्च भवेद् वित्तव्ययस्तञ्च मम तातः कृपणत्वात् सोढुं न क्षमते, अतो मां गोचारणे नियुङ्क्त इति न भ्रमितव्यम्, अपि तु त्वयि गोपालनदक्षे सति 'स्वः' सुखम्, सुष्ठु अर्यते गम्यत इति व्युत्पत्तेः, 'अभिविख्येषम्' अभिपश्येयम्, चक्षेराशीर्लिङि उत्तमपुरुषैकवचनम्। अयं 'दर्शनेऽपि' इत्युक्तेरिह दर्शनं तदर्थः। आर्धधातुकत्वात् ख्यादेशे 'छन्दस्युभयथा' (पा० ३. ४. ११७) इति सार्वधातुकसंज्ञामाश्रित्य यासुटि, इयादेशे गुणे सलोपाभावे वलिलोपे च रूपम्। पुत्रन्यस्तस्वकर्तव्यभारः पिता चिन्तामुक्तत्वात् सुखमनुभवतीति भावः।

'पृथिव्याम्' व्रजभूमौ। 'दुर्याः' दुर्याणि गृहाणि गोपधामानि, 'दुरो' द्वाराण्यर्हन्तीति यत् प्रत्ययः। 'दृंहन्ताम्' त्वद्दर्शितवर्त्मना सर्वैर्गोपालबालैर्गोरक्षणाभ्यासात् समृद्धा भवन्तु। गोकुलस्य समृद्धिर्गोधनवर्द्धनेनैव। कृष्ण आह—'उरु' विशालम् 'अन्तरिक्षम्' अवकाशं कुड्याद्यसंकुलं, प्रतिबन्धाभावाद् विशुद्धपवनसञ्चारार्हं प्रचुरशष्पादिसम्पन्नं निर्बाधं गोचरप्रदेशं विशालारण्यम् 'अनु' त्वया तातेनानुज्ञातः 'एमि' अहं गच्छामि।

अथवा—'एकाकिना मया निर्जने नानाविधहिंस्रप्राणिसंकीर्णे वने कथं गन्तव्यम्, वेपते मे हृदयम्, सत्यं बिभेमि बाल्यात्' इत्युक्ते नन्दो भीत्यपाकरणायाह— त्वं गच्छ, अहमपि 'अन्वेमि' अहमपि तत्रैव पश्चादागच्छामि। मयि सति न तव भीतेरवकाश इति भावः। 'पृथिव्या नाभौ' पृथिवीमध्ये 'अदित्याः' गोः, 'उपस्थे' समीपे, अङ्के वा 'त्वा' त्वां 'सादयामि' उपवेशयामि। 'अदितिरिति गोनामसु पठितम्' (निघ० २. ११. ६)। सर्वदेवनिवासस्थानं गोधनं स्वभक्तं स्वाङ्कनिहितं सुप्तं पुत्रं माता यथा रक्षति तथा सर्वाभ्यो बाधाभ्यो रक्षतीति भावः। यद्वा वनगमनाशङ्काभीतान् स्वसुहृदो गोपान् नन्दनन्दनो ब्रूते— 'पृथिव्याः' इत्यादि। 'त्वा' युष्मान् छान्दसत्वात् समूहाभिप्रायेण वा एकत्वम्। शेषं पूर्ववत्। अथ वने हिंस्रोपद्रवानघमुरादिभिः पुनः पुनः क्रियमाणान्, सहसा समुत्थं द्विवारं प्रचण्डं दावानलञ्च दर्शं दर्शं सखिगण आह—'अग्ने' ! अग्निवत् स्वग्रासकस्य बकस्य तालुमूलदाहक साक्षात्प्रभो ! 'हव्यम्' 'प्रीणनेऽपीति भाष्यम्' इत्युक्त्या जुहोतेरत्र प्रीणनमर्थः। अतो होतव्यं, प्रीणनीयं प्रसादनीयं गोधनं सुहृद्गणञ्च 'रक्ष' पालय इति गोपालबालप्रार्थना।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४. प्रोक्षणानुवाकः

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। देवीरापो अग्रेगुवो अग्रेपुवोऽग्र इममद्य यज्ञं नयताग्रे यज्ञपतिँ सुधातुं यज्ञपतिं देवयुवम् ॥ १२ ॥

१. पवित्रच्छेदनम्, २. अपामुत्पवनम्, ३. अग्निहोत्रहवण्या अपामूर्ध्वचालनम्।

देवयाजिपक्षभाष्यम्

अस्यां द्वादश्यां कण्डिकायां त्रयो मन्त्राः। 'पवित्रे' इति पवित्रच्छेदनमन्त्रः। अस्य दैवी बृहती छन्दः, लिङ्गोक्ता देवता। 'सवितुः' इति चोत्पवनमन्त्रः। अस्य प्राजापत्या पङ्क्तिश्छन्दः, आपो देवताः। तृतीयो मन्त्रः—'देवीरापः' इत्यारभ्य त्रयोदश्यां कण्डिकायां 'वृत्रतूर्ये' इत्यन्त उत्पूतजलपूर्णया अग्निहोत्रहवण्या ऊर्ध्वचालनार्थं विनियुक्तः। अस्य याजुषी छन्दः, आपो देवताः। सर्वेषां समानः परमेष्ठी प्राजापत्य ऋषिः (श० ब्रा० १. १. ३. १, ६-७; का० श्रौ० २, ३, ३०-३४)।

पवित्रे छिनत्ति—पवित्रे इति।[१] हे पवित्रे कुशद्वय! युवां 'पवित्रे' यज्ञियद्रव्यस्य पावयितृणी शोधके 'स्थः' भवथः, 'वैष्णव्यौ' विष्णुदेवत्ये, 'वैष्णवे' इति प्राप्ते लिङ्गव्यत्ययेन 'व्यत्ययो बहुलम्' (पा० ३. १. ८५) इति स्त्रीत्वम्। 'यज्ञो वै विष्णुर्यज्ञिये स्थः' (श० ब्रा० १. १. ३. १) यज्ञसम्बन्धिनी स्थ इत्याशयः। अथ ताभ्यां पवित्राभ्यां हविर्ग्रहण्यां स्थिता अप उत्पुनाति—सवितुरिति।[२] हे आपः! 'वः' युष्मान् 'सवितुः' सवितृदेवस्य 'प्रसवे' अभ्यनुज्ञायां वर्तमानोऽहमध्वर्युः 'उत्पुनामि' ऊर्ध्वं नीत्वा शोधयामि। केन पुनः साधनेनोत्पुनामि? 'अच्छिद्रेण' निरन्तरेण 'पवित्रेण' पावनसाधनेन वायुना, 'यो वा अयं पवत एषोऽच्छिद्रं पवित्रम्' (श० ब्रा० १. १. ३. ६)। 'सूर्यस्य रश्मिभिः' द्रव्यशोधनैः प्रखरसूर्यकिरणैश्च। निरन्तरगतिशीलः पवनः सूर्यरश्मयश्च दृष्टादृष्टदोषान् पुनन्तीत्यर्थः। अथ उत्पूताभिरद्भिः पूर्णामग्निहोत्रहवणीं सव्ये हस्ते कृत्वा दक्षिणहस्तेनाप ऊर्ध्वं प्रक्षिपति—देवीराप इति।[३] हे 'आपः'! यूयं 'देवीः' प्रकाशस्वरूपाः स्थ। कीदृश्य आपः? 'अग्रेगुवः' पुरतो गमनशीलाः 'अग्रेपुवः' प्रथमं सोमरसं पिबन्त्यः।

१. कुशौ समावप्रशीर्णाविनन्तगर्भौ कुशैश्छिनत्ति 'पवित्रे स्थ' इति। (का० श्रौ० सू० २. ३. ३०)

२. हविर्ग्रहण्यामपः कृत्वा ताभ्यामुत्पुनाति 'सवितुर्वः' इति। (का० श्रौ० सू० २. ३. ३२)

३. सव्ये कृत्वा दक्षिणेनोदिङ्गयति 'देवीरापः' इति। (का० श्रौ० सू० २. ३. ३३)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथवा—अग्रे सम्मुखमागतान् पदार्थान् शोधयन्त्यः स्थ। अग्रे गच्छतीति विग्रहे अग्रे पिबन्ति पुनन्ति वेति विग्रहे गमेः पिबतेः पुनातेर्वा क्विपि क्रमशः गमेरनुनासिकस्य मकारस्य 'गमः क्वौ' (पा० ६. ४. ४०) इति सूत्रेण लोपः। 'पा पाने' (भ्वा० प० ९२५), 'पूञ् पवने' (क्र्या० उ० १४८३) इत्यनयोर्गमेश्च 'ऊङ् च गमादीनाम्' (पा० वा० ६. ४. ४०) इति वार्तिकेन ऊङादेशो भवति। यत एवं विशेषणविशिष्टाः स्थ, अतः 'अग्रे' उत्कृष्टे स्वर्गाख्ये लोके 'इमं' क्रियमाणं 'यज्ञं' दर्शपूर्णमासाख्यम् 'अद्य' अस्मिन्नेव काले 'नयत' प्रापयत। क्रियमाणस्य दर्शपूर्णमासयज्ञस्यानिवार्यं फलं स्वर्ग इति यजमानेषु विश्वासं कारयतेत्याशयः। किञ्च 'अग्रे' उत्कृष्टे स्वर्गे 'यज्ञपतिं' यजमानं 'नयत' फलभोगाय प्रापयत। कीदृशं यज्ञपतिम् ? 'सुधातुम्' दक्षिणादिना सुष्ठु यज्ञं दधाति पुष्णाति सफलीकरोतीति सुधातुस्तं यज्ञस्य पालयितारं यजमानं फलभोगायोत्कृष्टे स्वर्गादिलोके नयत। पुनः कीदृशम् ? 'यज्ञपतिं' 'देवयुवम्' देवेषु देवशरीरेषु यज्ञानुष्ठानेनात्मानं यौति मिश्रयति, 'यु मिश्रणे' (अदा० प० १०३३) तस्मात् क्विप् तुगभावश्चेति देवयुर्देवभावमापित्सुर्यजमानस्तम्। अथवा देवान् कामयते, यज्ञे स्वस्थानस्थिता देवाः श्रद्धयोपनतं हविर्द्रव्यं स्वीकुर्वन्त्वितीच्छतीति विग्रहे देवशब्दात् 'सुप आत्मनः क्यच्' (पा० ३. १. ८) इति क्यच्। 'क्यचि च' (पा० ७. ४. ३३) इत्यनेन ईत्वे प्राप्ते 'न छन्दस्यपुत्रस्य' (पा० ७. ४. ३५) इतीत्वाभावः। 'अश्वाघस्यात्' (पा० ७. ४. ३७) इत्यश्वाघयोरेवात्वविधानाद् 'अकृत्सार्वधातुकयोः' (पा० ७. ४. २५) इति प्राप्तो दीर्घो न भवति। ततः 'क्याच्छन्दसि' (पा० ३. २. १७०) इत्युप्रत्ययः। देवयुशब्दस्यामि परे 'अमि पूर्वः' (पा० ६. १. १०७) इति प्राप्तस्य पूर्वरूपस्य 'वा छन्दसि' (पा० ६. १. १०६) इत्यधिकारे 'तन्वादीनां छन्दसि बहुलम्' इति वार्तिकेन विकल्पेनोवङि देवयुवं यजमानमग्रे नयतेति। ऊर्ध्वं प्रक्षिप्ता आपो यजमानमप्यूर्ध्वां गतिं प्रापयन्तीति भावनयापामुदिङ्गनम्।

आत्मयाजिपक्षभाष्यम्

हे प्राणोदानरूपे हे प्राणोदानव्यानरूपे वा 'पवित्रे' शोधके ! युवां 'वैष्णव्यौ' ब्रह्मयज्ञसम्बन्धिनी 'यज्ञो वै विष्णुः' (श० ब्रा० १. १. ३. १)। 'वैष्णवे' इति प्राप्ते 'व्यत्ययो बहुलम्' (पा० ३. १. ८५) इति स्त्रीत्वम्। 'स्थः'। हे इन्द्रियाणि ! 'सवितुः' गुरोः 'प्रसवे' प्रेरणे सति 'वः' युष्मान् 'अच्छिद्रेण' छिद्रहीनेन 'पवित्रेण' शोधकेन प्राणरूपेण, 'प्राणोदानौ पवित्रे' (श० ब्रा० १. ८. १. ४४)। 'अथो अपि त्रीणि स्युः—प्राण उदानो व्यान इति' (श० ब्रा० ३. १. ३. २०)। 'सूर्यस्य' मानससूर्यस्य 'रश्मिभिः उत्पुनामि' उत्कर्षेण शोधयामि। हे 'देवीः' द्योतनात्मिकाः 'अग्रेगुवः' श्रेष्ठे ब्रह्मणि गमनशीलाः, 'अग्रेपुवः' अग्रे ब्रह्मणि वर्तमानाः सूर्याग्निपानकर्त्र्यः। गमेः क्विप्प्रत्यये 'गमः क्वौ' (पा० ६. ४. ४०) इत्यनुनासिकलोपे, पुनातेः पिबतेर्वा क्वौ 'ऊङ् च गमादीनाम्' (पा० वा० ६. ४. ४०) इत्यूङि साधुः। 'आपः'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्' (तै० आ० १०. १५. १) इति श्रुतिः। 'अद्य' 'इमम्' 'यज्ञम्' ज्ञानयज्ञम् 'अग्रे' श्रेष्ठे ब्रह्मणि 'नयत' प्रापयत। 'सुधातुं' देहादिधारकमात्मानं, 'यज्ञपतिं' ज्ञानयज्ञस्य पालयितारं 'देवयुवं' 'यु मिश्रणे', देवं स्वात्मानं यौति ब्रह्मणि मिश्रीकरोतीति देवयुः। अनित्यमागमशासनमिति तुगभावः। यद्वा देवं परमात्मानं कामयते इति देवयुस्तम्। देवयुशब्दस्य सिद्धिर्देवयाजिपक्षोक्तरीत्या बोध्या। 'यज्ञपतिम्' यजमानमात्मानम् 'आत्मा वै यज्ञस्य यजमानः' (श० ब्रा० ६. ५. २. १६) 'अग्रे' ब्रह्मणि 'नयत'।

सात्वतपक्षभाष्यम्

नामकरणसंस्कारावसरे नन्दगृहमागत्य गर्ग आह—यशोदानन्दौ महानुभावौ! युवां 'वैष्णव्यौ' विष्णुभक्तौ, लिङ्गव्यत्ययश्छान्दसः। 'पवित्रे' पूते मार्गे 'स्थः' वर्तेथे, अत एव लोकोत्तरमात्मजं वार्द्धके वयसि प्राप्नुथः। युष्मद्धर्मनिष्ठाप्रभावितोऽहं युवयोः पुत्रस्य नामकरणाय समागच्छमिति भावः। तत्रान्यानपि समवेतान् बन्धून् मनसि निधायाह—'वः' युष्मान् नामकरणसंस्कारावसरे समवेतान् नन्दयशोदाभ्यां सहितान् सर्वान् बन्धून् 'सवितुः' जगदुत्पादकस्य परमात्मनः 'प्रसवे' निदेशे वर्तमानान्, भगवदादेशपालकानिति यावत्। त्रिभिः पवनसूर्यजलैः वस्तु पवित्रीक्रियते। वेदमन्त्रैस्तेषु विशिष्टायाः शक्तेराधानमित्यभिप्रायेणाह—'अच्छिद्रेण' दृढेन मन्त्रोच्चारणप्रवृद्धशक्तिकेन 'पवित्रेण' शुद्धिहेतुना वायुना, 'सूर्यस्य रश्मिभिः' मन्त्रोर्जितबलैः 'सूर्यस्य' सर्वत्र सरणशीलस्यादित्यस्य रश्मिभिः। कालत्रयाभिप्रायेण रश्मिबहुत्वनिर्देशः। सायं प्रातर्मध्याह्ने च प्रसृताः सूर्यकिरणा मलिनवस्तु दूषितांशमपसार्य शुद्धिं नयन्तीति वैज्ञानिकाः। एतदुपलक्षणं जलस्यापि तथा च मन्त्रशक्तिसंवलितैः प्रार्थनयाऽभिमुखीकृतैर्वाय्वादित्यवारिभिः 'उत्पुनामि' अतितरां शोधयामि। वेदमन्त्रानुच्चार्य प्रार्थिता वायुप्रभृतिदेवा युष्मान् पुनन्त्विति तात्पर्यम्।

हेमन्ते प्रथमे मासि नन्दगोपकुमारिका धृतव्रताः स्नानावसरे कालिन्दीजलाभिमानिदेवतामभ्यर्थयन्ते—आप इति। हे 'आपः' जलदेवताः! यूयम् 'अग्रेगुवः' निम्नप्रदेशे प्रवहन्त्यः स्रोतस्वत्यः, प्रवहतां जलानां शुद्धयतिरेकोऽनेन विशेषणेन ध्वन्यते, तडागस्थितानां वारीणां मलिनत्वदर्शनात्। 'अग्रेपुवः' सर्वासु क्रियासु प्रथमं पावयित्र्यः 'देवीः' दिव्या यूयं 'यज्ञं' 'यज्ञो वै विष्णुः' (श० ब्रा० १. १. २. १३) इति श्रुतेः, 'यज्ञार्थात्कर्मणोऽन्यत्र' (गीता ३. ९) इतीश्वरस्मृतेः, 'तस्माद् यज्ञात् सर्वहुतः' (शु० य० ३१. ६) इति मन्त्रवर्णाच्च, यजनीयं पूज्यं सर्वश्रेष्ठं परमपतिं, विष्णुरूपं व्रजराजतनयं नयत प्रापयत, 'अग्रे' प्रथमं सद्य इत्यर्थः। स्नानफलं कृष्णावाप्तिलक्षणमस्माभिः सद्यो लभ्यतामिति भावः। तमेवार्थमादरातिशयेन ता एव पुनर्ब्रुवते। 'यज्ञपतिं' विघ्नौघविनाशेन यज्ञरक्षकम्। 'सुधातुम्' सुष्ठुधारकं शरणागतरक्षकं, प्रपन्नपारिजातमिति भावः। एको यज्ञपतिः शब्दो यौगिकः, अपरो रूढ इति महीधरः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आदरातिशयेनैव द्विरुक्तिरिति वयं मन्यामहे। यज्ञरक्षणे भगवतो विशेषानुराग इति यज्ञपति-शब्दस्य द्विरुक्त्या सूचितम्। 'देवयुवं' देवसंगतम्, देवानां हितं कामयमानं वा। देवशब्दात् क्यचि देवयुशब्दनिष्पत्तिः पूर्वं देवयाजिपक्षे प्रतिपादितेति नेह पुनरुच्यते। आत्महितेच्छा-वचनेन क्यचा सर्वदेवा वस्तुतो भगवदात्मान एवेति सूचनाद् व्यवहारतः कर्मणा च भेदेऽपि न काचिदनुपपत्तिः।

युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिता स्थ। अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि। दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ॥ १३ ॥

१. अपां प्रोक्षणम्, २-३. हविःप्रोक्षणम्, ४. यज्ञपात्रप्रोक्षणम्।

देवयाजिपक्षभाष्यम्

अस्यां त्रयोदश्यां कण्डिकायां चत्वारो मन्त्राः। 'प्रोक्षिताः स्थ' इत्यपां प्रोक्षणो मन्त्र-स्तस्य दैवी बृहती छन्दः, आपो देवताः। 'अग्नये' इति 'अग्नीषोमाभ्याम्' इति च द्वितीयतृतीयौ द्वौ मन्त्रौ हविःप्रोक्षणौ। तयोः प्रथमस्य याजुषी बृहती छन्दः, द्वितीयस्य याजुषी त्रिष्टुप् छन्दः, द्वयोर्लिङ्गोक्ता देवता। 'दैव्याय' इति यज्ञपात्रप्रोक्षणो मन्त्रः, एतस्य याजुषी छन्दः, पात्रं देवता। ऋषिः परमेष्ठी प्राजापत्यस्तुल्यः समेषाम्। (श० ब्रा० १. १. ३. ८, १२ ; का० श्रौ० २. ३. ३५-३८)।

हे पूर्वमन्त्रानुवृत्ता आपः! 'युष्मा' युष्मान् 'सुपां सुलुक्०' (पा० ७. १. ३९) इत्यादि-सूत्रेण द्वितीयाया विभक्तेराजादेशः। 'इन्द्रः' 'वृत्रतूर्ये' निमित्ते सप्तमी, वृत्रवधे निमित्तभूते सति, तूर्यतिर्वधकर्मा 'अवृणीत' सहायिका वृतवान्। 'यूयम्' अपि 'इन्द्रम्' 'अवृणीध्वम्' साहाय्य-प्रदानार्थं वृतवत्यः। यथेन्द्रो वृत्रवधे साहाय्यार्थं युष्मान् वृतवान् तथाहमपि क्रियमाणयज्ञ-सम्पादनाय युष्मान् वृणे, इति भावः। स्वयमसंस्कृतो नान्यं संस्कर्तुं पारयेदिति हे आपः! यूयं 'प्रोक्षिताः[1] स्थ' संस्कृता भवथ। 'उक्ष सेचने' (भ्वा० प० ६५७)। अथ हविः प्रोक्षति— अग्नय इति।[2] हे हविः! 'अग्नये' 'जुष्टं' रुचितं 'त्वा' त्वां 'प्रोक्षामि' जलेनाभिषिञ्चामि। दशम्यां कण्डिकायाम् 'अग्नये जुष्टं गृह्णामि, अग्नीषोमाभ्यां जुष्टं गृह्णामि' इति पाठान्तरं गतम्।

---

१. 'प्रोक्षिता स्थ' इति तासां प्रोक्षणम्। (का० श्रौ० सू० २. ३. ३५)

२. हविश्च 'अग्नये त्वा, अग्नीषोमाभ्यां त्वा' इति। 'यथादैवतमन्यत्'। (का० श्रौ० सू० २. ३. ३६-३७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याकरणं तत एवोह्यम् । 'अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि' । अथ यज्ञपात्राणि प्रोक्षति—दैव्यायेति ।[१] हे पात्राणि ! 'दैव्याय' 'कर्मणे' देवोद्देश्यकयागाय, इदमेव विवृणोति—'देवयज्यायै' देवोद्देश्यकदर्शपूर्णमासादीष्टिसम्पत्तये 'शुन्धध्वम्' प्रोक्षिताभिरेताभिरद्भिः संस्कृतानि स्थ । 'शुन्ध शुद्धौ' (भ्वा० प० ७४) कर्मणि यकि शुध्यध्वमिति प्राप्ते विकरणव्यत्ययात् शुन्धध्वमिति छान्दसं रूपम् । 'यद्' यदङ्गं 'वः' युष्माकम् 'अशुद्धाः' वर्धक्यादयस्तक्षणादिना 'पराजघ्नुः' पराहृतवन्तः 'वः' युष्माकम् 'इदम्' तदङ्गं 'शुन्धामि' संस्कृताभिरद्भिः शोधयामि, प्रक्षालयामीति यावदिति ।

प्रोक्षणप्राधान्यादस्य चतुर्थस्यानुवाकस्य उक्षणानुवाकत्वव्यपदेशः । अस्मिन्ननुवाके कण्डिकाद्वये सप्त मन्त्राः (द्वादश्यां ३, त्रयोदश्यां ४) । तत्र तथाक्रमं—१. पवित्रच्छेदनम् २. अपामुत्पवनम् ३. अग्निहोत्रहवण्या ऊर्ध्वचालनम् ४. अपां प्रोक्षणम् ५. आग्नेयहविःप्रोक्षणम् ६. अग्नीषोमीयहविःप्रोक्षणम् ७. यज्ञपात्रप्रोक्षणमिति सप्त क्रिया व्याख्याताः । चतुर्षु खल्वनुवाकेषु त्रयोदशकण्डिकासु समुदिता मन्त्रसंख्या ४२ ।

आत्मयाजिपक्षभाष्यम्

हे पूर्वमन्त्रोक्ता आपः ! 'इन्द्रः' यजमानः, 'इन्द्रो वै यजमानः' (श० ब्रा० ५. २. ५. ३), 'वृत्रतूर्ये' पापवधार्थं, 'पाप्मा वै वृत्रः' (श० ब्रा० ११. १. ५. ७) । तूर्यतिर्वधकर्मा । 'युष्मा' युष्मान्, आकारश्छान्दसः (पा० ७. १. ३९) । 'अवृणीत' प्रार्थितवान् । यूयं 'वृत्रतूर्ये' पापवधनिमित्ते 'इन्द्रं' यजमानम् 'अवृणीध्वम्' । हे आपः ! यूयं स्वयं 'प्रोक्षिताः स्थ' ब्रह्मज्योतीरूपत्वात् । हे इन्द्रियसमूह ! 'अग्नये' ब्रह्मणे 'जुष्टं' प्रियं 'त्वा' त्वां 'प्रोक्षामि' । 'अग्नीषोमाभ्याम्' प्रकृतिपुरुषाभ्यां 'जुष्टं त्वा प्रोक्षामि' । हे इन्द्रियालयरूपयज्ञपात्राणि ! यूयं 'दैव्याय' देवानामिन्द्रियाणां सम्बन्धिने 'कर्मणे' समाध्यादिरूपाय 'देवयज्यायै' देवस्य योगेन्द्रस्य ज्ञानयज्ञार्थाय 'शुन्धध्वम्' । 'अशुद्धाः' कामक्रोधादयः 'वः' युष्माकं 'यत्' यदङ्गं 'पराजघ्नुः' पराहतं कृतवन्तः, तत् 'इदं' 'वः' युष्माकमङ्गं 'शुन्धामि' प्रोक्षणेन शुद्धं करोमि ।

सात्वतपक्षभाष्यम्

कामधेनुर्गोलोकाद्, गोवर्धनधारणेन व्रजरक्षणात् स्वर्गाद् विगतमद इन्द्रश्च भगवन्तमभिषेक्तुं व्रजमाजग्मतुः । तदा भूयांसोऽन्येऽपि महर्षयो देवाश्च समायाताः । ते सर्वे व्याहरन्ति क्षन्तव्योऽयमिन्द्रः । यतो हि 'युष्मा' युष्मान्, छान्दसो नत्वाभावः । आदरार्थो बहुवचनप्रयोगः । अतस्त्वामित्यर्थः । 'इन्द्रः' स्वर्गाधिपः 'वृत्रतूर्ये' युद्धे, वृत्रः शत्रुस्तूर्यंते हन्यतेऽनेनास्मिन्निति वा वृत्रतूर्यः संग्रामस्तस्मिन् । वृत्रोपपदात् 'तूरी गतित्वरणहिंसनयोः' (दि० आ० ११५२) इत्यस्मा-

१. पात्राणि 'दैव्याय त्वा' इति । (का० श्रौ० सू० २. ३. ३८)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दौणादिको 'यः' प्रत्ययः। वृत्रवधे वा। तूर्यंतिर्वधकर्मेति महीधरः। 'अवृणीत' स्वीकृतवान्। 'यूयम्' अपि, 'इन्द्रं' देवराजम् 'अवृणीध्वं' वृतवन्तः। युष्माकमिन्द्रस्य च युद्धे वृत्रवधार्थं वा चिरन्तनोऽन्योन्यसहयोगः, चिरन्तनसख्यमिति भावः। तदुक्तं नीतिमञ्जर्याम्—

'महद्भिर्यन्महत् कर्म कार्यं नैव स्वतन्त्रतः।
ययाचे बलिनं विष्णुं वृत्रं हन्तुं हि वृत्रहा॥१३३॥'

वर्णितञ्च ऋ० ८. १००. १२ मन्त्रे विष्णुनेन्द्रसाहाय्यं विहितमिति।

अथवा—यदा नरकासुरेण भौमासुरापरनामधेयेन वरुणस्य छत्रं, देवमातुरदित्याः कुण्डले, कैलासस्थितमणिपर्वताभिधं स्थानञ्चाच्छिन्नानि तदेन्द्रो द्वारिकायां समागत्य भगवन्तं तद्व्यापादनायाभ्यर्थयाञ्चक्रे। इन्द्रोऽपि यदा यदा भगवान् दुष्टसंहरणाय मनुष्यवपुषावतरति स्म तदा तदा युद्धोपकरणं रथादिकं भगवत्समीहितं प्रेषयति स्मेति द्वयोः परस्परं सख्यम्। अथवा इन्द्रांशत्वादर्जुनस्य 'इन्द्रः' अर्जुनः, मित्राविन्दादिस्वयंवरे विपक्षिराजन्यवर्गं निहत्य भगवत्परिणये साहाय्यं कृतवानितीन्द्रभगवतोर्मिथः सहयोगः सख्यं वा पुराणेषु बहुत्र स्फुटं प्रत्यपादि। मातुर्निदेशादिन्द्रेण स्ववाहनैरावतकराहृतेन मन्दाकिनीवारिणा, स्नेहातिरेकेण स्वतो निःसृतेन पयसा च कामधेन्वा 'प्रोक्षिताः' अभिषिक्ताः 'स्थ' भवथ, अभिषिक्तो भवसि। आदरार्थं 'प्रोक्षिताः स्थ' इति बहुवचनप्रयोगः। कामधेनुरिन्द्रश्च भगवन्तमभिषिषिचतुर्गोविन्देत्यभिधां च ददतुः। एषा कथा भागवते (१०. २७) वर्णिता।

किञ्च युधिष्ठिरस्य राजसूययज्ञानुष्ठानवेलायां सदस्येष्वग्रपूजाप्रश्ने जरासन्धसुतेन सहदेवेन श्रीकृष्ण एवाग्रतः पूजनीय इति प्रस्तावे तत्रत्यैः सर्वैर्भीष्मादिभिः समर्थिते भगवतोऽग्रपूजां कुर्वाणो युधिष्ठिरो ब्रूते—'प्रोक्षिताः' प्रोक्षितपादाः क्षालितचरणाः यूयं 'स्थ' भवथ। आदरार्थं बहुवचनम्। युधिष्ठिरेण तदानीं भगवतः सपर्या सर्वेभ्यः प्रथमं विहिता। पूजावसरे भक्तिपुरःसरं भगवत्पादपद्मद्वयं क्षालितमिति भावः। प्रोक्षितपादा इत्यत्र विनापि प्रत्ययमिति वार्तिकेनोत्तरपदलोपो द्रष्टव्यः। द्वारिकायां गृहपुष्करिणीषु बहिर्नदीषु वानुरक्तचेतोभिर्महिषीभिः समं भगवांश्चिक्रीड। तदा ते जलयन्त्रैरन्योन्यस्योपरि जलं चिक्षिपुर्व्याहृतवन्तश्च 'प्रोक्षिताः स्थ' अभिषिक्ताः यूयं भवथ मिथो जलनिक्षेपणेन, मया त्वं क्लिद्यसे, मया त्वं सिच्यस इति सानुरागं जलक्रीडावसरे भगवान् तत्पत्न्यश्च बभाषिरे, इति भावः (भाग० १०. ६०)।

यदुषु ब्राह्मणैः शप्तेषु नैजं परधाम जिगमिषुर्भगवान् सहनेतुमुद्धवेनाभ्यर्थितस्तस्मै प्राह—अग्नये इति। 'अग्निः' ज्ञानाग्निः। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।' इति गीता(४. ३७)वचनात्तस्मै जगतीतले ज्ञानयोगोपदेशाय, न केवलं ज्ञानयोगाय, अपितु 'अग्नीषोमाभ्यां' सोमेनात्र भक्तियोगोऽभिप्रेतः सोमवदाह्लादकत्वादतः 'अग्नीषोमाभ्यां' ज्ञानभक्तियोगाभ्यां ज्ञानयोगसहितभक्तियोगोपदेशायेत्यर्थः। भक्तिज्ञानसमुच्चयोपदेशेन जगदु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वाराय 'जुष्टं' मत्प्रियं मद्भक्तं 'त्वा' त्वाम् 'प्रोक्षामि' वाग्वारिधाराभिः सिञ्चामि, कर्मयोग-पुरःसरं भक्तियोगं ज्ञानयोगं चोपदिशामि (भागवते ११. २०. ६. ८ वर्णितमिदम्)। तदाह—'दैव्याय कर्मणे' भगवदुपासनाय, तद्विवरणम्—'देवयज्यायै' देवयज्या भगवत्पूजा तस्यै, यजेर्भावे क्यप्, पूजाग्रहणं श्रवणादिनवधाभक्तेरुपलक्षणम्। 'शुन्धध्वम्' सोपपत्तिकं तद्वर्णन-सलिलेन जनचेतांसि क्षालयध्वम्, त्वदुपदेशेन शुद्धस्वान्ता जनाः कलौ युगे भगवतो नवधा-भक्तिविधाने प्रवर्तेरन्निति भावः। ननु कामादिभिरसंख्यैर्दोषैरनेकजन्मार्जितदुरितैश्चाशुद्धेन मया कथमन्ये शोधनीया इत्याशङ्कायामाह—'वः' युष्माकम् 'इदं' मनः 'अशुद्धाः' मलिनाः काम-क्रोधपापादयश्चेतोधर्माः 'पराजघ्नुः' पराभूतवन्तः, स्वसद्भावेन त्वदीयं चेतो दूषितवन्तः 'तत्' कामक्रोधादिकं 'वः' युष्मदीयमहं 'शुन्धामि' सस्नेहं दृष्टिस्पर्शसंकल्पोपदेशैः शोधयाम्यपनयामि। गुरवो दृष्ट्या, स्पर्शेन, उपदेशेन, संकल्पेन च साधकेषु शक्तिपातं विधाय तानुद्धरन्तीति शास्त्र-विदां समयः।

तथा चाहमपि दृष्टयादिभिस्त्वयि शक्तिं निधाय समर्प्य वा त्वदीयचेतोमलापसारणेन सच्चिदानन्दलक्षणं स्वात्मस्वरूपं दर्शयामीति भावः। पितृव्यभावनया व इति बहुवचनेना-दरातिरेको दर्शितः। वृद्धेषु गुरुषु लोकैः सादरं व्यवहर्तव्यमिति मर्यादा च सूचिता।

५. अवघातानुवाकः

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु। अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु ॥ १४ ॥

१. कृष्णाजिनादानम्, २. कृष्णाजिनस्थरक्षसामवधूननम्, ३. कृष्णाजिनास्तरणम्, ४. कृष्णाजिनोपरि उलूखलाधानम्।

देवयाजिपक्षभाष्यम्

अस्यां चतुर्दश्यां कण्डिकायां चत्वारो मन्त्राः। 'शर्मासि' इति कृष्णाजिनादानमन्त्रः। अस्य दैव्यनुष्टुप् छन्दः, कृष्णाजिनं देवता। 'अवधूतम्' इत्यादिररातिरक्षसामपहरणार्थः। एतस्यासुर्यनुष्टुप् छन्दो रक्षो देवता। 'अदित्याः' इत्यादिर्मन्त्रः कृष्णाजिनास्तरणार्थः। तस्यासुर्यनुष्टुप् छन्दः, कृष्णाजिनं देवता। 'अद्रिः' इत्यादिरुलूखलधारणो मन्त्रश्चतुर्थः। अस्य याजुष्यनुष्टुप् छन्दः, उलूखलं देवता। अत्रैव 'ग्रावासि' इत्यस्यासुरी गायत्री छन्दः, उलूखलं देवता। परमेष्ठी प्राजापत्य ऋषिः सर्वत्र समानः (श० ब्रा० १. १. ४. ४-५, ७; का० श्रौ० २. ४. १-५)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यज्ञे कृष्णाजिनस्य माहात्म्यात् कृष्णाजिनमादत्ते[1] तथा च श्रुतिः 'यज्ञो ह देवेभ्योऽप-चक्राम, स कृष्णो भूत्वा चचार, तस्य देवा अनुविद्य त्वचमेवावच्छायाजह्रुः' (श० ब्रा० १. १. ४. १)। हे कृष्णाजिन ! त्वं 'शर्म' उलूखलधारणार्थं शर्म सौकर्य्यहेतुः 'असि', अथवा मनुष्यैरभिमतं चर्माऽपि त्वं सुखसाधनत्वाद् देवैः शर्मेत्यभिधीयसे। तथा च श्रुतिः—'चर्म वा एतत् कृष्णस्य तदस्य तन्मानुषं, शर्म देवत्रा तस्मादाह शर्मसीति' (श० ब्रा० १. १. ४. ४)। अथ कृष्णाजिनावधूननेन तत्रस्थममेध्यं निरस्यति—अवधूतमिति।[2] 'अवधूतं' निरस्तं 'रक्षः' अमेध्यलेपादिकम्, 'अवधूताः' निरस्ताश्च 'अरातयः' यज्ञविघ्नकारिणः शत्रवः। 'धूञ् कम्पने' (क्र्या० उ० १४८८)। अयमेवार्थः सप्तम्यां कण्डिकायां 'प्रत्युष्टं रक्षः' इत्यादिरूपेण, नवम्यां च 'अपहतं रक्षः' इत्यादिरूपेण क्रियामात्रभेदेनोपन्यस्तः।

अथ प्रत्यग्ग्रीवं कृष्णाजिनमास्तृणाति—अदित्या इति।[3] हे कृष्णाजिन ! त्वम् 'अदित्याः' पृथिव्याः 'त्वक्' त्वग्रूपमावरणम् 'असि', अत एव 'अदितिः' पृथिवी 'त्वा' त्वां मदीयमेवेदं रूपान्तरं नान्यत् किञ्चिदिति 'प्रतिवेत्तु' प्रतिगृह्य जानातु। 'विद् ज्ञाने' (अ० प० १०६४) 'प्रति हि स्वः संजानीते' (श० ब्रा० १. १. ४. ५)। प्रत्येकमात्मीयं वस्तु परिचिनोत्येवेति तदाशयः। अथ कृष्णाजिन उलूखलं स्थापयति— अद्रिरिति।[4] हे उलूखल ! 'अद्रिः' आदृणाति विदारयति व्रीह्यादिकमयमनेन वा तथा पाषाणः 'असि' त्वम्। 'वानस्पत्यः' यद्यपि वनस्पति-विकारत्वात् काष्ठमयस्त्वमसि तथापि विदारणदार्ढ्यात् त्वमद्रिः पाषाणसदृशोऽसि। वनस्पते-र्विकार इत्यर्थे 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (पा० ४. १. ८५) इति ण्यः प्रत्ययः, प्रत्ययस्य स्वरश्च। अत एव गिरति हन्ति व्रीह्यादिकमिति व्युत्पत्त्या ग्रावोच्यसे। 'गॄ निगरणे' (तु० प० १४११)। 'अन्येभ्योऽपि दृश्यन्ते' (पा० ३. २. ७५) इति कर्तरि वनिप्प्रत्ययः, पृषोदरादित्वात् (पा० ६. ३. १०९) 'गॄ' इत्यस्य 'ग्रा' इत्यादेशः।

अथवा सैंहिकेयो राहुश्चन्द्रमसं ग्रसते आत्मसात्करोतीत्यादावात्मसात्करणे लोके ग्रसतेः प्रयोगस्य दर्शनाद् ग्रसते व्रीह्यादिकमात्मसात्करोतीति ग्रावा। 'ग्रसु अदने' (भ्वा० आ० ६३०) इत्यतः 'अन्येभ्योऽपि दृश्यन्ते' (पा० ३. २. ७५) इति वनिपि पृषोदरादित्वाद् धातोः सकारस्यात्वम्। त्वं 'ग्रावा' निगद्यसे, 'पृथुबुध्नः' पृथुः स्थूलः बुध्नः मूलदेशो यस्य तथाभूतोऽसि तेन मुसलाघातेऽपि तव न चाञ्चल्यमिति भावः। 'त्वा' उलूखलम् 'अदित्याः' भूमेः 'त्वक्' अधस्तादास्तीर्णा कृष्णाजिनरूपा 'प्रतिवेत्तु' स्वीयत्वेनावगच्छतु। उलूखलाधानम्

---

१. 'शर्मासि' इति कृष्णाजिनादानम्। (का० श्रौ० सू० २. ४. १)
२. अपेत्य पात्रेभ्योऽवधूनोति 'अवधूतम्' इति। (का० श्रौ० सू० २. ४. २)
३. प्रत्यग्ग्रीवमास्तृणाति—'अदित्यास्त्वक्' इति (का० श्रौ० सू० २. ४. ३)
४. सव्याशून्ये निदधात्युलूखलम् 'अद्रिरसि' 'ग्रावाऽसि' इति वा। (का० श्रौ० सू० २. ४. ४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'अद्रिरसि वानस्पत्यः' इत्येतावता मन्त्रेण कार्यं 'ग्रावाऽसि पृथुबुध्न' इत्यनेन वा मन्त्रेणोभयत्र 'प्रति त्वादित्यास्त्वग्वेत्तु' इति मन्त्रांशोऽन्ते योजनीयः।[1] 'अद्रिरसि वानस्पत्यः प्रति त्वादित्यास्त्वग्वेत्तु' इति वा 'ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु' इति वोलूखलाधानमन्त्रस्वरूपमिति भावः। तथाह कात्यायनः 'सव्याशून्ये निदधात्युलूखलमद्रिरसि ग्रावासीति वा, प्रतित्वेत्युभयोः' (का० श्रौ० २. ४. ४-५) इति।

आत्मयाजिपक्षभाष्यम्

हे हृदय ! त्वं 'शर्म' आनन्दरूपम् 'असि'। 'रक्षः' अज्ञानम् 'अवधूतम्', 'अरातयः' कामादयः 'अवधूताः' हे हृदय ! त्वम् 'अदित्याः' पराख्यप्रकृतिरूपाखण्डितज्योतिषः 'त्वक्' आवरणम्। 'त्वच संवरणे' (तु० प० १३०२) 'असि'। 'अदितिः' परा प्रकृतिः 'त्वा प्रतिवेत्तु' त्वां मदीयमिदमिति जानातु। हे हार्दाऽन्तरिक्ष ! 'अन्तरिक्षं वा उलूखलम्' (श० ब्रा० ७. ५. १. २६) त्वं 'वानस्पत्यः' देहवृक्षे प्रादुर्भूतः 'अद्रिः' ज्योतिर्बाहुल्येन सूर्यः 'असि'। 'पृथुबुध्नः' पृथुः विष्णुः बुध्नो मूलं यस्य सः, अथवा पृथुर्महान् बुध्नोऽन्तरिक्षं यस्य सः 'ग्रावा' दृढः 'असि'। 'अदित्याः' ब्रह्मणोऽखण्डज्योतिषः 'त्वक्' आवरणकारणं हृदयं 'त्वा प्रतिवेत्तु' त्वां स्वकीयत्वेन जानातु।

सात्वतपक्षभाष्यम्

'शर्म' शिवं कल्याणकरं, शृणाति दुःखं, श्रीयत आश्रीयते वा त्राणार्थं भक्तैरिति तद्व्युत्पत्तिः। शॄ हिंसायाम्' (क्र्या० प० १४८९) 'श्रिञ् सेवायाम्' (भ्वा० उ० ८९७) वा। औणादिके मनि बाहुलकात् साधुः। नारायणाख्यं वर्मेति यावत्।

'वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु॥' (भाग० ६. ८. २)

इति वचनात्। विश्वरूपाद् महेन्द्रेण तल्लब्ध्वा व्यपनीतभयेन सर्वेऽसुराः पराजिताः। अन्योऽपि यः कश्चिदनेन वर्मणा कवचितः सः शत्रुमनायासेन पराभवति। तदुक्तं तत्रैव (६. ८. ३५-३६)—

मघवन्निदमाख्यातं वर्म नारायणात्मकम्।
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान्॥
एतद् धारयमाणस्तु यं यं पश्यति चक्षुषा।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते॥

---

१. 'प्रति त्वा' इत्युभयोः। (का० श्रौ० सू० २. ४. ५)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विश्वरूपात् प्राप्तस्तोत्रात्मकनारायणकवचः शक्रो हृष्यन्नाह—अवधूतमिति। 'रक्षः' असुरयूथपः 'अवधूतम्' अवधूतः नष्टः, मया निरस्तः। 'अरातयः' अन्येऽपि शत्रवः 'अवधूताः' अञ्जसा पराजिताः। नारायणकवचं सम्बोध्य स्तौति 'अदित्यास्त्वगसि'। अदितिरखण्डिता पराशक्तिः, नारायण इति यावत्। स्त्रीत्वमतन्त्रम्। नारायणस्य 'त्वक्' संवरणं वर्म 'त्वच संवरणे' (तु० प० १३०२) नारायणकवचमिति यावत्। 'असि' वर्तसे। राहोः शिरः इतिवदभेदे भेदमाश्रित्य षष्ठी। नारायणात्मकं कवचं त्वमसीति भावः। 'त्वा' त्वां स्तोत्रं नारायणकवचम् 'अदितिः' नारायणः 'प्रतिवेत्तु' स्वकीयत्वेन मन्यताम्। इदं कवचं मदीयमिति स्वीकरोतु। 'वानस्पत्यः' वनति इति वनः 'वन हिंसायाम्' (भ्वा० प० ८०३)। पातीति पतिः पालकः 'पा रक्षणे' (अ० प० १०५६)। वनश्चासौ पतिरिति 'वनस्पतिः' असुरहिंसको भक्तरक्षको नारायणः, तदीयस्त्वमसि तदात्मको वा। स्वार्थे ष्यञ् प्रत्ययोऽत्र पृषोदरादित्वात् साधुः। 'अद्रिः' अदीर्णः केनापि हिंसितुमशक्यो विदारयितुमशक्योऽनभिभवनीय इति तात्पर्यम्। पुनरपि तं स्तौति 'ग्रावा' स्तुत्यः 'गृणातिः स्तुतिकर्मा' (निरु० ३. ५) अथवा पाषाणवद् दृढः। 'पृथुबुध्नः' 'पृथुः' विस्तीर्णः 'बुध्नः' मूलं जगन्निवासस्थानं यस्य तादृशोऽसि, जगदाधारनारायणप्रभवत्वात्। बध्यते ध्रियते जगद्यस्मिन्निति व्युत्पत्तेर्बध्नातेः 'बन्धेर्ब्रधिबुधी च' (उ० सू० ३. ५) इति नक् प्रत्ययो बुधादेशश्चेति बुध्न इति साधुः। 'अदित्यास्त्वग्' नारायणकवचं 'त्वा' त्वां स्तोतारं 'प्रतिवेत्तु' मया रक्षणीयोऽयमिति स्वरक्षकत्वेन प्रतिपद्यतामितीन्द्रं प्रति विश्वरूपस्योक्तिः।

अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्यः स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व। हविष्कृदेहि हविष्कृदेहि ॥ १५ ॥

१. हविरावपनम्, २. मुसलादानम्, ३. हविरवधानम्, ४. हविष्कृतामाह्वानम्।

देवयाजिपक्षभाष्यम्

अस्यां पञ्चदश्यां कण्डिकायां चत्वारो मन्त्राः। तत्र प्रथमः 'अग्नेस्तनूरसि' इति हविरावपनो मन्त्रः। अस्यार्ष्युष्णिक् छन्दः, हविर्देवता। द्वितीयः 'बृहद् ग्रावासि' इति मुसलादानमन्त्रः। तस्यासुरी जगती छन्दः, मुसलो देवता। 'स इदम्' इति मुसलमादाय हविष्यावधानमन्त्रस्तृतीयः। तस्य याजुषी छन्दः, मुसलो देवता। 'हविष्कृदेहि' इति हविष्कृदाह्वानमन्त्रः। अस्य याजुषी पङ्क्तिश्छन्दः, अधिदैवतं वागधियज्ञं च पत्नी देवता। सर्वत्र तुल्यः परमेष्ठी प्राजापत्य ऋषिः (श० ब्रा० १. १. ४. ८-१३, का० श्रौ० २. ४. ६. ११-१३)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हविरावपन्नध्वर्युराह—अग्नेरिति ।[१] हे ओप्त हविः ! त्वम् 'अग्नेः' आहवनीयस्य 'तनूः' शरीरम् 'असि', अग्नौ क्षिप्तं हविर्दग्धं सदग्निसात्म्यं लभते । अथवा देवतामात्रोपलक्षणोऽग्निशब्दः । यस्यै यस्यै देवतायै नामादेशं हविर्निरुप्यते तद्देवतारूपं भवति । कीदृशं पुनर्हविः ? 'वाचः' यजमानवाचः 'विसर्जनम्' विसृज्यतेऽत्रेति विसर्जनम् । अधिकरणे ल्युट्प्रत्ययः । अपां प्रणयनकाले संयताया यजमानवाचस्तत्तद्देवतामुद्दिश्य हविषः प्रक्षेपणे विसर्जनं भवति, अतो हविस्तथोच्यते । हे हविः ! 'देववीतये' देवानां तृप्तये, 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' (अ० प० १०४८) इति कान्त्यर्थे भावे क्तिन् प्रत्ययः । कान्तिरिह तृप्तिः । 'त्वा' त्वां 'गृह्णामि' आवपामीत्यर्थः । हविरोप्य दारुमयं मुसलमादत्ते—बृहद्ग्रावासीति ।[२] 'वानस्पत्यः' वनस्पतिविकारो दारुमयोऽपि त्वं 'बृहद्ग्रावा' बृहद् महद् ग्रावन् ग्राववद् हननसामर्थ्यं यस्मिन्निति बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः, तथाभूतस्त्वमसि । यद्वा दैर्घ्येण बृहन्, हननसामर्थ्याच्च ग्रावा, बृहन् चासौ ग्रावेति कर्मधारयसमासे दासीभारादित्वात् पूर्वपदप्रकृतिस्वरः । इत्थमात्तं मुसलं 'स इदम्'[३] इत्यादिना मन्त्रेणोलूखलेऽवदधाति स्थापयति । 'सः' एवंगुणविशिष्टस्त्वम् 'इदं हविः' निरुप्तमिदं व्रीह्यादिकं 'देवेभ्यः' देवान् प्रसादयितुं 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (पा० २. ३. १४) इति चतुर्थी, 'शमीष्व' शमय, संस्कुरु । 'शमु उपशमे' (दि० प० १२०१) इह संस्कारे धातोर्वृत्तिः । व्यत्ययेन शपो लुकि 'तुरुस्तुशम्यमः सार्वधातुके' (पा० ७. ३. ९५) इतीडागमः । 'सुशमि' शोभना शमी शान्तिर्भवति यस्मिंस्तथाविधम्, शोभनं शाम्यतीति वा क्रियाविशेषणम्, 'शमीष्व' अन्तर्बाह्योभयविधया सम्यग् हविः संस्कुरु । शमनं त्विह द्विविधं विवक्षितम्—बाह्यतुषापनयनाद्येकं, तच्च प्रथमेन मुसलाघातेन जन्यते, अन्तःस्थितकृम्यादिदोषराहित्यमपरं, तच्च फलीकरणेन सम्भवति । उभयथाऽपि हविर्निर्दोषं संस्कुर्विति भावः ।

हविष्कर्त्रीं पत्नीं हविष्कर्तारमाग्नीध्रं वाऽऽह्वयति त्रिः हविष्कृदिति ।[४] 'हविष्कृत्' हविः करोति सम्पादयतीति, यजमानस्य पत्नी वाऽग्नीद् वा 'एहि' आगच्छ व्रीह्यवघातं कुरु । त्रिराह्वानं, देवास्त्रिवारमुक्तं सत्यं मन्यन्त इत्येतदर्थम् । 'त्रिषत्या हि देवाः' (तै० ३. २. ३. ८; षड्० ब्रा० १. १) इति ।

आत्मयाजिपक्षभाष्यम्

ईश्वरो गुरुर्वा कथयति—हे जीवात्मन् ! त्वं 'अग्नेः' ब्रह्मणः 'ब्रह्म वा अग्निः' (श०

---

१. हविरावपति—'अग्नेस्तनूः' इति । (का० श्रौ० सू० २. ४. ६)
२. 'बृहद्ग्रावा' इति मुसलमादत्ते । (का० श्रौ० सू० २. ४. ११)
३. 'स इदम्' इत्यवदधाति । (का० श्रौ० सू० २. ४. १२)
४. 'हविष्कृदेहि' इति त्रिराह्वयति । (का० श्रौ० सू० २. ४. १३)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रा० ५. ३. ५. ३२), 'तनूः' शरीरं, यस्माद् योगेन ब्रह्माग्नौ क्षिप्तो जीवो ब्रह्मैव भवति 'वाचो विसर्जनम्' 'तत् त्वमसि' इति महावाग्विसर्जनकारणं, पराब्रह्मणोरेकत्वात् 'असि'। 'देववीतये' देवस्य परमात्मनः प्राप्तये, 'वी गतौ' 'त्वा' संसारे प्रवृत्तं त्वां 'गृह्णामि' समाधिस्थं करोमि। हे प्राण ! त्वं 'वानस्पत्यः' देहवृक्षस्थोऽपि, योगे 'बृहद्ग्रावा' बृहद्ब्रह्माण्डस्य प्राणः, 'प्राणा वै ग्रावाणः' (श० ब्रा० १४. २. २. ३३) 'असि'। 'सः' त्वम् 'इदं हविः' जीवं 'जीवं वै देवानां हविरमृतममृतानाम्' (श० ब्रा० १. २. १. २०), 'देवेभ्यः' ब्रह्मनरनारायणेभ्यः, कैवल्यमोक्षे ब्रह्मणे, सायुज्ये नारायणाय, सामीप्यसालोक्यसारूप्येषु नराय 'शमीष्व' शमय शान्तं कुरु। हे 'शमि' हे शान्तान्तःकरण ! त्वमपि 'सुशमीष्वं' अन्तःस्थितमालिन्यस्यापनयनाय सुशान्तं कुरु। 'हविष्कृत्' हे वाक् ! 'वाग्वै हविष्कृत्' (श० ब्रा० १. १. ४. ११) 'एहि' अत्रागच्छ 'हविष्कृत्' हे महावाक् ! 'एहि'। 'हविष्कृत्' हे अनाहतशब्द ! 'एहि'।

सात्वतपक्षभाष्यम्

वृन्दारण्ये विहृत्य मथुरायां कंसं निहत्य विद्याग्रहणार्थं भगवान् यदोज्जयिन्यां सान्दीपनिं गुरुमुपसीदति तदा तं गुरुः सान्दीपनिराह—अग्नेरिति। हे कृष्ण ! 'अग्नेः' परमात्मनः, तेजसो वा। 'तनुः' मूर्तिः। 'असि' भवसि। मद्भाग्यविजृम्भितमेतन्मूर्तिमत्तेजःपुञ्जः, परमात्मैव वा धृतविग्रहो मामुपेतवाँल्लोकसंग्रहार्थम्, गुरुशिष्यभावमर्यादासंरक्षणायेति भावः। 'वाचः' वेद-विद्यायाः। 'विसर्जनम्' त्यागस्थानं विद्यादानपात्रं, नपुंसकत्वं छान्दसम्। उत्तमाधिकारित्वाद् विद्यादानयोग्य इति तात्पर्यम्। सर्वविद्याविदपि त्वं लोकमर्यादासंरक्षणाय मां गुरुत्वेन स्वीकुरुषे, त्वत्तोऽधिकः कोऽन्यः शिष्यो लप्स्यतेऽतोऽधिकारिश्रेष्ठाय तुभ्यमहं कृत्स्नां वेदविद्यां स्वल्पेनैवानेहसाध्यापयामीत्याकूतम्। 'देववीतये' 'देवानां' ब्रह्मवर्चसेन द्योतमानानां मच्छि-ष्याणां 'वीतये' कान्तये, शोभायै, प्रशंसायै 'त्वां' कृष्णं 'गृह्णामि' शिष्यत्वेन सहर्षमुररी-करोमि। मद्गुरुकुले त्वन्निवसनाद् मच्छिष्याः सुदामादयः सहपाठिनं त्वामासाद्यैते भगवतः कृष्णस्य गुरुबन्धव इति ख्याता भविष्यन्ति। मद्गुरुकुलमपि 'अत्र भगवता कृष्णेनाधीतम्' इति प्रशस्तिभाजनं भवेत्। त्वम् 'वानस्पत्यः' वनस्पतिः अरण्यस्वामी, वनश्रेष्ठं, वृन्दावनमिति यावत्, तत्र क्रीडतीति वानस्पत्यः। क्रीडनार्थेऽत्र ण्यः। वृन्दावनविहारीति यावत्। श्रुतो मया त्वदीयः पराक्रमः, वृन्दावने वसता त्वया ब्रह्मेन्द्रवरुणाः स्वतेजसाऽभिभवं नीतास्त्वत्प्रभावमवगत्य पश्चात् त्वां प्रपन्ना भूयांसश्च गोपक्लेशकारिणः कालियप्रमुखाः पराजिताः। अत एव 'बृहद्-ग्रावा' बृहतां महतां ब्रह्मादीनां ग्रावा स्तुत्योऽसि। गृणातिः स्तुतिकर्मेति (निरु० ३. ५)। गुरुः प्रसन्नः सन् भाविनं शिष्योत्कर्षं वर्णयन्नाह— 'सः' त्वम्, मच्छिष्यः कृष्णो राजसूयाश्व-मेधादौ 'देवेभ्यः' इन्द्रादिभ्यः 'इदं' वेदप्रतिपादितं विविधं 'हविः' हविर्द्रव्यं दापयिष्यतीति शेषः। कियन्तं कालमत्र 'शमीष्व' शान्तिं लभस्व। वृन्दारण्ये मथुरायां पूर्वं, भविष्यति च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वारिकायां भूयसः कार्यभारस्य दृष्ट्या गुरोरुक्तिः। हे 'सुशमि' ब्रह्मचारिपालनीयशमदमादि-व्रतसम्पन्न! 'शमीष्व' इति व्याख्यातपूर्वः। द्विरुक्तिर्गुरोः सन्तोषातिरेकसूचनाय। 'हविष्कृत्' 'हवींषि' विविधयज्ञान् करिष्यति, अनुष्ठास्यति, युधिष्ठिरादिभिरनुष्ठापयिष्यति चेति हविष्कृत् कृष्ण! 'एहि' आगच्छ आगत्य तिष्ठ च। निजनिवासेन मदीयं गुरुकुलं कृतार्थं कुर्विति भावः।

अपरा व्याख्या—श्वेतकीनाम्नो राज्ञोऽतियज्ञे चतुर्विंशतिं वर्षाणि यावत् सततमाज्य-पानादनलोऽजीर्णतारुजा व्याधितो बभूव। स धृतब्राह्मणवेशः कृष्णार्जुनयोरन्तिकमाजगाम। ताभ्यां समीहितं याचस्वेति व्याहृतः 'खाण्डववनं दग्धुमभिलष्याम्यहम्, तत्रत्यदिव्यविवि-धौषधिभक्षणेन मेऽजीर्णताव्याधिर्विनश्येत्' इति याचितवान्। तदाकर्ण्य भगवान् पार्थेन सह तमनुमेने। अत्रान्तरे पावको रहस्यं किञ्चिदावेदितवान्— मालाकारस्य वाटिकेव शक्रस्य खाण्डववनं प्रियं, तत्सेचनाय वर्द्धनाय च पर्जन्या भूयांसस्तेन भृत्या नियुक्ताः। मया दन्दह्यमानं खाण्डवं देवराजो न सहेतावश्यं प्रतिबध्नीयादिति। अतोऽहं सार्जुनं भवन्तं वीरचक्रचूडामणि-माकलय्य प्रपन्नोऽस्मीति। भगवानपि रक्षणाय प्रतिजज्ञे 'न भेतव्यम्, आवामिन्द्रविहिताद् विघ्नात्त्वां रक्षिष्यावः। परमावयोः पार्श्वे युद्धोपकरणमतिन्यूनमिति दिव्यरथादिकं त्वया-ऽस्मत्कृते समानेयम्।' ततो जातवेदा वरुणादेकं रथं, गाण्डीवधनुरन्यच्च चक्रगदादिकं युद्धोपकरणं समानीय ताभ्यां दत्तवान्, निःशङ्कं खाण्डवारण्यं दग्धुमारेभे च। इन्द्रेण भूयांसो निजानुचरा मेघास्तत्कार्यं विहन्तुं प्रेषिताः। श्रीकृष्णेङ्गितेनार्जुनो रथमारुह्याधिज्यधन्वा सपदि तान् निशितशरनिकरवृष्ट्या प्रत्यावर्त्तयामास। ततः पञ्चदश दिनानि यावन्निःशङ्कः प्रकामं खाण्डव-मग्निर्भस्मसाच्चकार। ततो निवृत्तव्याधिः पावकः कृष्णं स्तौति—अग्नेरिति।

'अग्नेः' मम व्याधितस्य खाण्डवदाहानुमत्या 'तनूः' विस्तारकः पोषकः। 'असि' भवसि। त्वदनुमत्या निःशङ्कं खाण्डवं दग्ध्वा दिव्यौषधिभक्षणाद् व्याधिनिवृत्त्येदानीं हृष्टः पुष्टश्चाहं जात इति भावः। 'देव' जगदीश्वर! 'वीतये' दाहेन खाण्डवभक्षणाय, 'वाचो विस-र्जनम्' वाचो वचनस्य विसर्जनं विसर्जकं दातारम्, निःशङ्कं खाण्डवं भुङ्क्ष्व, द्रक्ष्यामि तं, यो विहन्यादिति प्रतिज्ञातारं 'गृह्णामि' जानामि। प्रतिश्रुतं त्वया कृतमिति भावः। भगवान् ब्रूते—'बृहद्ग्रावा' 'बृहन्' महान् 'ग्रावा' स्तुत्यः। पाषाणवद् दृढः शत्रुशरैर्दुर्भेदः। 'वानस्पत्यः' वनस्पतिविकारः काष्ठलोहादिनिर्मितो दिव्यो रथः, उपलक्षणमेतदन्येषां धनुरादीनामपि। दिव्यरथादियुद्धोपकरणं 'हविः' दातव्यम्, 'इदं' वरुणपार्श्वे देवैर्दृष्टं, प्रत्यक्षं सम्प्रति ततः समानीय त्वयावाभ्यां दत्तं, युद्धायापेक्षणीयं तत् त्वं 'देवेभ्यः' पाण्डवेभ्यः देवांशत्वात्तेषां, 'ददासि' इति क्रियाध्याहारः कारकेण क्रियाक्षेपात्। सम्प्रति 'सुशमि' सु शोभनेनौषधभक्षणेन शान्तव्याधे! 'शमीष्व' शान्तो भव। द्विरुक्तिर्भृशार्थे। अत्यन्तं शान्तो भूया इति तात्पर्यम्। हे 'हविष्कृत्' हूयते इति हविरिति व्युत्पत्त्या हविःशब्द आज्यादिबोधकस्तेन च लक्षणया तन्निष्पन्नो यज्ञो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृह्यते। तत्करोतीति 'हविष्कृत्' यज्ञनिष्पादकाग्ने! 'एहि' आगच्छ, अस्मदाभिमुख्यं प्रयाहि येन यज्ञनिष्पादनद्वारा देवप्रजां मानुषप्रजां च सुखिनीं विदध्याव। द्विरुक्तिः पौनःपुन्यद्योतनार्था।

कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद त्वया वयँ संघातँ संघातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु परापूतँ रक्षः परापूता अरातयोऽपहतँ रक्षो वायुर्वो विविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ॥ १६ ॥

१. हविःकण्डनम्, २. शूर्पादानम्, ३. हविरुद्वापनम्, ४. तुषाधःपातनम्, ५. तुषनिरसनम्, ६. विवेचनम्, ७. हविरभिमन्त्रणम्।

देवयाजिपक्षभाष्यम्

अस्यां षोडश्यां कण्डिकायां सप्त मन्त्राः सन्ति। हविःकण्डनार्थः 'कुक्कुटोऽसि' इति प्रथमः। अस्यार्षी त्रिष्टुप् छन्दो, वाग्देवता। शूर्पादानः 'वर्षवृद्धमसि' इति द्वितीयः। अस्य याजुषी गायत्री छन्दः, शूर्पो देवता। 'प्रति त्वा' इत्यादिस्तृतीयः हविरुद्वापनमन्त्रः। अस्य याजुषी बृहती छन्दः, हविर्देवता। 'परापूतम्' इति तुषाधःपातनश्चतुर्थः। अस्यासुर्युष्णिक् छन्दः, रक्षो देवता। 'अपहतम्' इति कृष्णाजिनात्तुषनिरसनः पञ्चमः। अस्य याजुषी गायत्री छन्दः, रक्षो देवता। 'वायुर्वः' इति षष्ठः सतुषनिस्तुषयोः पृथक्करणार्थः। अस्य याजुष्युष्णिक् छन्दः, तण्डुलो देवता। 'देवो वः' इति सप्तमः पात्र्यामोप्याभिमन्त्रणार्थो मन्त्रः। अस्य साम्नी त्रिष्टुप् छन्दः, तण्डुलो देवता। परमेष्ठी प्राजापत्य ऋषिः प्राग्वत् सर्वेषां समानः (श० ब्रा० १.१.४.१८-२३, का० श्रौ० २.४.१५-२१)।

'आह्वयत्यध्वर्यौ यजमानपत्नीमग्नीधं वाऽग्नीत् शम्यया तदाख्ययज्ञायुधेन दृषदुपले आहन्ति' (का० श्रौ० २.४.१५)।[1] अत्रत्य इतिहासः शतपथब्राह्मणे 'मनोर्ह वा ऋषभ आस' इत्यत आरभ्य पञ्चकण्डिकासु (१.१.४.१४-१८) द्रष्टव्यः। आहननार्थं शम्यां सम्बोधयति 'कुक्कुटः' क्व क्व असुरा इति तान् हन्तुमिच्छन् योऽटति संचरति स कुक्कुटः। अथवा कुकं कुत्सितमसुरघ्नं शब्दं कुटति तनोतीति कुक्कुटः। अथवाऽसुरभीत्यर्थं कुक्कुटपक्षिध्वन्यनुकरणं शब्दं तनोति स कुक्कुटः। हे यज्ञायुध! त्वमसुराणां कृते कुक्कुटोऽसि, 'मधुजिह्वः' मधुः मधुरा जिह्वा वाग् यस्य तथाभूतस्त्वं देवानां कृतेऽसि। 'इषम्' यजमानस्य यज्ञसिद्धये वृष्टिं तज्जनितमन्नं

१. आह्वयत्याहन्त्यन्यो दृषदुपले 'कुक्कुटोऽसि' इति त्रिः शम्यया द्विर्हंषदं सकृदुपलाम्। (का० श्रौ० सू० २.४.१५)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वा 'ऊर्जम्' क्षीरादिरसं वा 'आवद' आभिमुख्येन वद। 'त्वया' सहायभूतेन 'वयं' यज्ञानुष्ठातारः 'संघातं संघातम्' संहन्यन्ते शत्रवोऽस्मिन्निति संघातः संग्रामः, अधिकरणे घञ्, वीप्सायां द्विर्वचनं 'नित्यवीप्सयोः' (पा० ८. १. ४) इति। संग्रामे संग्रामे। अथवा संहननं संघातः समूहः, भावे घञ्। संघे संघे, शत्रुसमूहेष्वित्यर्थः 'जेष्म' जीयास्मेति प्राप्ते छान्दसं रूपम्। अथ शूर्पमादत्ते—वर्षवृद्धमिति।[१] हे शूर्प! 'वर्षवृद्धम्' वृष्ट्या वृद्धं त्वम् 'असि'। वृष्टिवृद्धवेणुशलाकाभिर्निर्मितत्वात् शूर्पस्य वर्षवृद्धत्वम्। अथ हविरुद्वपति—प्रति त्वेति।[२] हे हविः! 'त्वा' त्वां 'वर्षवृद्धं' शूर्पं 'प्रतिवेत्तु' वर्षवृद्धव्रीह्यादिसम्भवं हविर्वर्षवृद्धस्य मम सजन्मेति शूर्पं प्रतिजानातु। चतुर्दश्यां कण्डिकायामपि 'प्रतिवेत्तु' इति प्रकारान्तरेण पठितं द्रष्टव्यम्।

अथ मुसलावघातेन तुषनिरासयोग्यं व्रीह्यादिहविर्द्रव्यं निष्पुनाति—परापूतमिति।[३] 'परापूतं' निराकृतम् 'रक्षः' तुषादिसंसृष्टं सूक्ष्मकृमिजातम्, 'परापूताः' पराक्षिप्ताश्च 'अरातयः' यज्ञविध्वंसकराः शत्रवः। अथ तुषान्निरस्यति—अपहतं रक्षः इति।[४] 'परापूतं रक्षः परापूता अरातयः' 'अपहतं रक्षः' इति मन्त्रखण्डौ प्रकारान्तरेण सप्तम्यां नवम्यां चतुर्दश्यां च कण्डिकायां पठितौ द्रष्टव्यौ।

अथ सतुषेभ्यो व्रीहिभ्यो निष्तुषान् तण्डुलान् विविञ्चन्नाह—वायुर्व इति।[५] हे तण्डुलाः! 'वायुः' शूर्पजन्यो वातः 'वः' युष्मान् 'विविनक्तु' सूक्ष्मकणेभ्यः सतुषेभ्यो वा व्रीहिभ्यः पृथक्करोतु। व्रीहिभ्यः पृथक्कृतान् तण्डुलान् पात्र्यामोप्याभिमन्त्रयते—देवो व इति।[६] हे तण्डुलाः! 'हिरण्यपाणिः' हिरण्मयाः सुवर्णसङ्काशाः पाणयो रश्मयो यस्य स हिरण्यपाणिः। अथवा हिरण्यनिर्मिताङ्गुलीयकाद्याभरणं पाणौ यस्य स हिरण्यपाणिः। यद्वा दैत्यैः प्राशित्र-प्रहारेण छिन्नौ सवितुर्बाहू देवैर्हिरण्मयौ कृताविति बह्वृचानां श्रुतिरिति हिरण्यपाणिः। 'सविता देवः' देदीप्यमानः सूर्यः, 'अच्छिद्रेण' निर्दोषेणाशिथिलेन 'पाणिना' हस्तेन 'वः' युष्मान् 'प्रतिगृभ्णातु' अङ्गीकरोतु। प्रखररश्मिः सूर्यो निर्दोषेण देदीप्यमानेन स्वकिरणजालेन तण्डुलान् विशोध्य देवहविर्योग्यान् करोत्वित्याशय इति।

अस्मिन् पञ्चमेऽवघातानुवाके 'शर्मासि' इति चतुर्दशीं कण्डिकामारभ्य 'कुक्कुटोऽसि'

---

१. 'वर्षवृद्धमसि' इति शूर्पमादत्ते। (का० श्रौ० सू० २. ४. १६)
२. 'प्रति त्वा' इति हविरुद्वपति। (का० श्रौ० सू० २. ४. १७)
३. 'परापूतम्' इति निष्पुनाति। (का० श्रौ० सू० २. ४. १८)
४. 'अपहतम्' इति तुषान्निरस्यति। (का० श्रौ० सू० २. ४. १९)
५. 'वायुर्वः' इति विविनक्ति। (का० श्रौ० सू० २. ४. २०)
६. 'देवो वः' इति पात्र्यामोप्याभिमन्त्रयते। (का० श्रौ० सू० २. ४. २१)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति षोडशीं कण्डिकां यावत्तिसृषु कण्डिकासु पञ्चदश मन्त्राः (चतुर्दश्यां ४, पञ्चदश्यां ४, षोडश्यां ७) सन्ति ; काण्वशाखायामनुवाकश्लोके सायणः षोडशमन्त्रानाह, तच्च चतुर्दश्यां कण्डिकायाम् 'अद्रिरसि वानस्पत्यः' 'ग्रावासि पृथुबुध्नः' इति पृथङ् मन्त्रद्वयं मत्वा पञ्चमन्त्राभिप्रायेण वेदितव्यम् । तेषां प्रत्येकं—१. कृष्णाजिनादानम्, २. तत्रस्थरक्षसामवधूननम्, ३. तदास्तरणम्, ४. उलूखलाधानम्, ५. हविरावपनम्, ६. मुसलादानम्, ७. हविरवधानम्, ८. हविष्कृदाह्वानम्, ९. हविःकण्डनम्, १०. शूर्पादानम्, ११. हविरुद्वापनम्, १२. तुषाधःपातनम्, १३. तुषनिरसनम्, १४. विवेचनम्, १५. हविरभिमन्त्रणमिति पञ्चदश क्रिया दर्शिताः। तत्र पञ्चस्वनुवाकेषु षोडशकण्डिकासु समुदिता मन्त्रसंख्या सप्तपञ्चाशत् (५७) ।

आत्मयाजिपक्षभाष्यम्

हे महावाक् त्वं 'कुक्कुटः' असुराः कामादयः क्व क्वेति तान् हन्तुमिच्छन् योऽटति सर्वत्र संचरति स कुक्कुटः । 'मधुजिह्वः' ब्रह्म ब्रह्मज्ञानं वा मधु तद्भाषिणी जिह्वा यस्य सः, 'अयमात्मा सर्वेषां भूतानां मधु,…इदममृतमिदं ब्रह्मेदं सर्वम्' (श० ब्रा० १४. ५. ५. १४) । 'इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच' (श० ब्रा० १४. ५. ५. १७) 'असि' । 'इषम्' अमृतवृष्टिम् 'ऊर्जं' ज्ञानरसं ब्रह्म च यथा प्राप्नोति साधकस्तथा 'आवद'। 'वयं' ज्ञानयज्ञानुष्ठातारः 'त्वया' 'संघातम्' कामादिसमूहं 'संघातम्' अज्ञानादिसमूहं 'जेष्म' जयेम । हे ब्रह्मज्ञानाभिमानिदेवते ! 'ज्ञानं ज्ञानवतामहम्' (गीता १०. ३८) इति भगवद्वचनात्त्वं 'वर्षवृद्धम्' वः ब्रह्म, र् प्रकृतिः, षः विज्ञः, तेषु ब्रह्मप्रकृतिविज्ञेषु योगिषु वृद्धं वृद्धिं प्राप्तम् 'असि' । हे जीवरूप हविः ! 'वर्षवृद्धम्' ब्रह्मज्ञानं 'त्वा प्रतिवेत्तु' त्वां स्वाश्रयत्वेन जानातु । 'रक्षः' अज्ञानं 'परापूतं' निराकृतम्, 'अरातयः' कामादिशत्रवः 'परापूताः' निराकृताः, 'रक्षः' अज्ञानम् 'अपहतम्' नाशितम्। हे इन्द्रियाणि ! 'वायुः' प्राणः, 'वायुर्य एवायमात्मन् प्राणः' (श० ब्रा० ७. १. २. ७) 'वः' युष्मान् 'विविनक्तु' स्वाङ्गाभिमानेन देहाङ्गेभ्यः पृथक्करोतु । 'हिरण्यपाणिः' हिरण्यं ज्योतिरेव पाणी हस्तौ यस्य सः 'सविता' मानससूर्यः 'देवः' ज्योतीरूपः 'अच्छिद्रेण' प्राणरूपेण 'पाणिना' हस्तेन 'वः' युष्मान् 'प्रतिगृभ्णातु' स्वीकरोतु । हृग्रहोर्भश्छन्दसीति हस्य भः ।

सात्वतपक्षभाष्यम्

भक्तो भगवन्तं प्रशंसति—'कुक्कुटः' कोकन्ते परद्रव्यमाददते, इति कुकस्तस्करा लुण्ठकाश्च तेषां कुटश्छेदको विनाशक इति कुक्कुटः 'असि' 'कुक आदाने' (भ्वा० आ० ९१) 'त्रुट छेदने' 'कुट इत्येके' (चु० आ० १६९९) । अपि वा अम्बिकावने सुदर्शनो विद्याधरः शापादङ्गिरसामजगरयोनिमुपगतः सुप्तं भगवत्तातं नन्दं जग्रसे । भगवत्पादसंस्पर्शान्मुक्तशापो यथापूर्वं विद्याधरत्वं लेभे, भगवदनुमत्या स्वलोकं जगाम च । सैषा कथा नन्दग्रासकाजगरविनाशकवचनकुक्कुट-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शब्देन सूचिता। रामकृष्णयोः क्रीडतोरन्तिके तत्प्रेयसीर्गोपीः शंखचूडो यक्षोऽपजहार। स च श्रीकृष्णेनानुधावता निगृहीतो व्यापादितश्च, तदीयो मणिश्च शिरस आच्छिद्य स्वाग्रजाय रामाय दत्त इति च कथा गोपीवर्गापहारकशंखचूडनिहन्तृवाचककुक्कुटशब्देन ध्वनिता। उज्जयिन्यां पुत्रं, द्वारिकायां विप्रपुत्रान्, कंसक्रौर्यात् षड् देवकीपुत्राँश्च कालो जग्राह। अतःप्रसह्य गुरुपुत्रादीनामादातृत्वात् कुक् यमस्तं जित्वा कुट्टयति भर्त्सयति, यमपुरतः पुत्रान् प्रत्यावर्तयति, प्रतिनिवर्त्य गुर्वादिभ्योऽर्पयतीति कुक्कुटः, टकारलोपश्छान्दसः, 'कुट्ट छेदनभर्त्सनयोः' (चु० प० १५५६)। 'मधुजिह्वः' मधुरभाषी, स्वानुरक्तैः भक्तैः समं सस्नेहमालपतीति भावः। 'इषम्' गतिं, मार्गम् केन मार्गेणास्माकं श्रेयो भवेदिति कल्याणमार्गम् 'आवद' आ समन्तात् वद उपदिश। 'ऊर्जम्' स्वप्राप्तिहेतुशमदमादिसाधनसम्पत्तिलक्षणं बलं सामर्थ्यं च आवदेति सम्बन्धः। 'इष गतौ' (दि० प० १३५२) 'ऊर्ज बलप्राणनयोः' (चु० प० १५५०) भावे क्विप्। 'त्वया' त्वदनुग्रहेणेति यावत्। 'संघातं संघातम्' बहिःशत्रुसमूहमान्तरं रागादिकश्च सपत्नगणमुभयविधं 'जेष्म' जयेम। लिङर्थे लुङ्। 'जि जये' (भ्वा० प० ५६१) उत्तमपुरुषबहुवचने रूपम्। वृद्ध्यभावश्छान्दसः। 'वर्षवृद्धम्' 'वर्षं' वृष्टिः सर्वेषां शृङ्गारादिरसानां, तेन 'वृद्धम्' वृद्धा रसकदम्बमूर्तिरिति यावत्, नपुंसकत्वं छान्दसम्। रसकदम्बमूर्तित्वं च भगवतो 'मल्लानामशनिः' (भाग० १०. ४३. १७) इति पद्ये स्पष्टम्। अतो वर्षवृद्धं निखिलरसविग्रहं रसिकशिरोमणिं 'त्वा' त्वाम्। लोकः 'वेत्तु' जानात्ववगच्छतु। 'परापूतम्' परागतं 'पूतं' पवित्रत्वं यस्मात्तत्परापूतम्। 'रक्षः' दुष्टस्वभावो जनः। 'अरातयः' अनुदाराः, 'परापूताः' अदानादिदुर्गुणगणेनापवित्रा दूषिताः। 'अपहतं रक्षः' उच्छिन्नो रक्षोगणः। 'अपहतं रक्षः' इत्युपलक्षणमरातीनामपि, न केवलं तेषां दूरीकरणमपितु तेषां समूलोच्छेदः समजनीति भावः। 'वायुः' भीमः वायोरंशत्वात्। 'वः' युष्मान्, आदरातिरेकेण बहुवचनम्। 'विविनक्तु' त्वत्कौशलसमासादितमहाभारतसंग्रामविजयो विस्पष्टं त्वद्गुणानाचष्टाम्, मुक्तकण्ठं प्रशंसत्वित्यर्थः। स्वसुताकालिन्दीप्रणयावसरे 'वः' युष्मान्, 'हिरण्यपाणिः' हिरण्यहस्तो वधूवरदक्षिणार्थं गृहीतसौवर्णाभरणादिकरः 'सविता देवः' सूर्यः, 'अच्छिद्रेण' अरिक्तेन स्नेहयुक्तेन 'पाणिना' व्यवहारेण 'पण व्यवहारे स्तुतौ च' (भ्वा० आ० ४३९) पणायतेः 'अशिपणाय्योरुडायलुकौ च' (उ० सू० ४. १३३) इति भावे इण् आयलुक् च। 'प्रतिगृह्णातु' सत्करोतु। गृह्णातिरत्र सत्क्रियावचनः, जामातृत्वेन स्वीकरोतु वेत्यर्थः।

अपरा व्याख्या—नारदमुखेन युधिष्ठिरसन्देशे, जरासन्धकारानिबद्धदशसहस्रनृपसन्देशे च ततो दूतमुखेनाकर्णिते नीतिकोविदेन बृहस्पतिशिष्येण स्वमित्रेणोद्धवेन मन्त्रणायां भगवाँस्तं प्रशंसति— कुक्कुटोसीति। 'कुकाम्' अयुक्तप्रतिपक्षमाददतामसंगतप्रतिपक्षग्राहिणां सभासदां 'कुटः' निर्भर्त्सयिता सत्तर्कोपन्यासपुरस्सरं तत्पक्षनिराकर्ता। तर्कोपबृंहितसद्धेतुकुठारेण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदीयपक्षवृक्षतक्षक इति तात्पर्यम् । सभायां विवादशमनाय 'मधुजिह्वः' मधुरभाषी, त्वं वाङ्माधुर्येण पाटवेन च सभासदां बालजल्पत्वं वितण्डात्वञ्च कदापि न व्रजसीति भावः। 'इषम्' इच्छां स्वाभिप्रायं गतिं मार्गं वेत्यर्थः । 'ऊर्जम्' रसं बलं वा । 'आवद' आलोच्य कथयस्व । बन्धूनामनुरोधो मान्यः, दूतमुखेन प्रपन्ननृपगणप्रार्थना वा आदरणीया । अनयोर्मध्ये कः श्रेयान् ? को वा मार्गः समाश्रयितुं युज्यते ? अत्रान्तरे कीदृशः नीतिशास्त्रसमयः ? किं वा नैतिकं रहस्यं बलं वा ? अस्मानपेक्ष्य शत्रोर्बलं न्यूनं समधिकं वा ? इत्येतत् सर्वं स्वमनीषया सम्यगवेक्ष्यास्माकं शुभेच्छुना भवता वक्तव्यमिति भावः । किं बहुना, 'त्वया' त्वद्दर्शितवर्त्मना 'संघातं संघातं' बाह्यशत्रुसंग्राममान्तरं पारस्परिकबन्धुसंग्रामं गृहकलहं च द्विविधं युद्धं 'जेष्म' जयेम । 'संघातं संघातम्' इत्यस्य वारं वारं संगम्य संगमनपुरस्सरं परामृश्येति वार्थः। हन्तिरत्र गत्यर्थः । संगमनेन तत्पूर्वकपरामर्शोऽत्र लक्ष्यते । मामेव किं पृच्छसीत्याशङ्कायामाह—'वर्षवृद्धं' वर्षैरायुषा वयसा वृद्धो महानायुर्वृद्धः पितृव्य इत्यर्थः । परिपक्वानुभवो भवान् । कालेन हि पच्यतेऽनुभव इति परिपक्वज्ञानस्त्वमित्यभिप्रायः । नपुंसकत्वं न तन्त्रम् । अतो वर्षवृद्धं भूयः परिपक्वानुभवं 'त्वा' त्वाम् । 'प्रतिवेत्तु' यदुगणो मन्यताम् । त्वत्सम्मत्याचरन्त इमे यदवः स्वकुलं राष्ट्रञ्चोत्कर्षं नीत्वा त्वदुक्ते वृद्धोक्तिपरिणतिरमणीयेऽतिमहिमानं प्रतिपद्यन्तामिति भावः । 'परापूतम्' इत्यतः 'अपहतम्' इत्यन्तं व्याख्यातपूर्वम् । त्वत्कौशलेन यदूनां सर्वे सपत्ना विनष्टा इत्याकूतम् । भगवता पृष्ट उद्धवः स्वाभिप्रायमाविष्करोति—वायुरिति । पूर्वं युधिष्ठिरराजसूययागार्थमिन्द्रप्रस्थे गन्तव्यं पश्चाद् दिग्विजयप्रसङ्गे 'वः' युष्माकं 'वायुः' वायुतुल्यबलो हस्तिदशसहस्रपराक्रमो भीमो द्वन्द्वयुद्धाय स्वसमबलं जरासन्धं प्रवलशत्रुं 'विविनक्तु' जरया सन्धितं खण्डद्वयात्मकं जरासन्धकलेवरं विविनक्तु, पृथक्करोतु, द्विदलीकरोतु । भीमार्जुनाभ्यां सह जरासन्धगृहं गत्वा तेन सह द्वन्द्वयुद्धं भीमेन याचनीयं, जरासन्धश्च याचकं निराशं न प्रत्यावर्तयतीति नूनं स स्वीकरिष्यति द्वन्द्वसङ्ग्रामं, तत्र त्वत्सङ्केतं लब्ध्वा दन्तधावननिर्विशेषमिमं पापनिरतं जरासन्धं द्विधा भङ्क्ष्यत्यर्जुनाग्रजः । तथा सति व्यर्थं निरपराधवीरसहस्रक्षयो न भवेत् । सम्प्रत्यभियाने तु महाव्यसनोपनिपातो विजयश्चानिश्चित इति ममाभिप्रायः । किञ्चेन्द्रप्रस्थे राजसूयसदस्येष्वग्रपूजाप्रस्तावे 'हिरण्यपाणिः' राजसूययागमहोत्सवे परिहितविविधसौवर्णाभरणहस्तः 'सविता' प्रेरकः, ज्येष्ठत्वाद्भवतः पैतृष्वसेयः कौन्तेयो 'देवः' राजा युधिष्ठिरः । 'वः' युष्मान्, बहुवचनेनादरातिरेकः सूच्यते । 'अच्छिद्रेण' अरिक्तेन विविधपूजोपकरणयुक्तेन 'पाणिना' हस्तेन 'प्रतिगृभ्णातु' अग्रपूज्यत्वेन त्वामङ्गीकरोतु । त्वत्पूजामसहमानो शिशुपालो दुर्बलस्तदैव घातनीय इति गूढाभिसन्धिः । नीतिविदो भाविदर्शिनो भवन्तीति पुरस्तादेवोद्धवेन भाविवृत्तमवगतम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६. कपालानुवाकः

धृष्टिरस्यपाग्ने अग्निमामादं जहि निष्क्रव्यादꣳ सेधा देवयजं वह। ध्रुवमसि पृथिवीं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥ १७ ॥

१. उपवेषादानम्, २. अङ्गारापोहनम्, ३. एकाङ्गाराहरणम्, ४. कपालेनाङ्गाराच्छादनम्।

देवयाजिपक्षभाष्यम्

अस्यां सप्तदश्यां कण्डिकायां चत्वारो मन्त्राः। 'धृष्टिरसि' इत्युपवेषादानः प्रथमः। अस्य दैवी बृहती छन्दः, उपवेषो देवता। 'अपाग्ने' इत्यङ्गारापोहनो द्वितीयः। अस्य प्राजापत्यानुष्टुप् छन्दः, अग्निर्देवता। 'आ देवयजम्' इति तृतीय एकाङ्गाराहरणः। अस्य दैवी जगती छन्दः, अग्निर्देवता। 'ध्रुवमसि' इति चतुर्थः कपालेनाङ्गाराच्छादनो मन्त्रः। अस्य याजुषी छन्दः, कपालं देवता। ऋषिरुक्तः परमेष्ठी प्राजापत्यः (श० ब्रा० १. २. १. ३-७- ; का० श्रौ० २. ४. २५-२६)।

पलाशशाखाया मूलदेशात् काष्ठं छित्त्वा तदुपवेषं करोति। अङ्गारापोहनसमर्थं हस्ताकृतिकाष्ठम् उपवेषः। उपवेषमादत्ते—'धृष्टिरसीति'।[1] हे उपवेष! 'धृष्टिः' प्रगल्भः 'ञिधृषा प्रागल्भ्ये' (स्वा० प० १२७०), भावे क्तिन् प्रत्ययः। अत्र कर्त्रर्थे उपचरितो धृष्टिशब्दः। अङ्गाराणामितस्ततश्चालने समर्थस्त्वम् 'असि'।

अथोपवेषेण प्राचोऽङ्गारान्नेतुं मन्त्रं पठति—अपाग्ने[2] इति। 'अग्ने' हे गार्हपत्याग्ने! 'आमादम् अग्निम्' आममपक्वं व्रीह्याद्यन्नमत्तीति आमाद् लौकिकोऽग्निस्तम्। 'अद भक्षणे' (अ० प० १०११) तस्मात् 'अदोऽनन्ने' (पा० ३. २. ६८) इति कर्तरि विट्प्रत्ययः। 'अपजहि' दूरात् परित्यज। 'व्यवहिताश्च' (पा० १. ४. ८२) इति सूत्रेण व्यवहितयोरपि क्रियोपसर्गयोरर्थेऽनुगमः। द्वितीयं 'क्रव्यादम्' क्रव्यं शवमांसमत्तीति क्रव्याद्, 'क्रव्ये च' (पा० ३. २. ६९) इति सूत्रेण विट् प्रत्ययः। शेषं प्राग्वत्। तं चिताग्निं 'निःषेध' निश्शेषेण वारय। 'षिध गत्याम्' (भ्वा० प० ४७)। अत्र 'षिध' धातोः परित्यागे वृत्तिः। आमादं क्रव्यादं चोभयविधमनिष्टमग्निं हित्वा 'देवयजम्' देवान् यजन्त्यस्मिन्, देवा इज्यन्ते वास्मिन्नित्यधिकरणे विच् प्रत्ययः।

---

१. 'धृष्टिरसि' इत्युपवेषमादाय। (का० श्रौ० सू० २. ४. २५)

२. 'अपाग्ने' इत्यङ्गारान् प्राचः करोति। (का० श्रौ० सू० २. ४. २५)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'यज देवपूजासंगतिकरणदानेषु' (भ्वा० उ० १००२) 'विजुपे छन्दसि' (पा० ३. २. ७३) इति सूत्रम् उपाद् अन्यस्मिन्नप्युपपदे सति प्रवर्तते । तं देवयागयोग्यम् 'आ वह' अस्मत्समीपमानये-त्यङ्गारमेकमाहरति[१] गार्हपत्यस्य दक्षिणे भागे । तमङ्गारं कपालेनाच्छादयितुं मन्त्रं पठति 'ध्रुवमसीति' ।[२] हे कपाल ! त्वं 'ध्रुवम्' स्थिरम् 'असि' अङ्गारोपरि निहितं न चलसि । 'पृथिवीम्' भूमिं 'दृंह' दृढां कुरु । पुरोडाशपाकावसरे कपालान्तरिता भूमिर्न दाहकृतं शैथिल्य-मनुभवेत् । स्वयमप्रतिष्ठः कथमन्यान् प्रतिष्ठितान् कर्तुं पारयेत् ? तस्मात्कपालस्य दाढर्यं प्रार्थ्यते । किं च 'भ्रातृव्यस्य' शत्रोः 'व्यन्सपत्ने' (पा० ४. १. १४५) इति सूत्रेण शत्रावर्थे भ्रातृशब्दाद् व्यन् प्रत्ययः । नित्त्वात् शत्रुवाचको भ्रातृव्यशब्दः 'ञ्नित्यादिर्नित्यम्' (पा० ६. १. १९७) इत्यनेनाद्युदात्तः । 'वधाय' नाशाय 'त्वा' त्वाम् 'उपदधामि' अङ्गारोपरि स्थापयामि । कीदृशं त्वाम् ? 'ब्रह्मवनि' 'ब्रह्मणा' ब्राह्मणेन पुरोडाशसिद्धयर्थं 'वन्यते' सेव्यते, स्वीक्रियते इति, 'वन सम्भक्तौ' (भ्वा० प० ४६३) 'छन्दसि वनसनरक्षिमथाम्' (पा० ३. २. २७) इति इनिः प्रत्ययः । 'क्षत्रवनि' क्षत्रियैः सेव्यमानं 'सजातवनि' समानकुले जातैर्यजमानबान्धवैः सेव्यमानं त्वोपदधामीति ।

आत्मयाजिपक्षभाष्यम्

मातृकावर्णनमस्यां कण्डिकायां केचिदाचक्षते । तद्यथा—अक्षराणि हि ब्रह्मविभूति-वाचकानि 'अक्षराणामकारोऽस्मि' (गीता १०-३३) इत्युक्तेः,

'अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः ।
मकारस्तु स्मृतो ब्रह्मा प्रणवस्तु त्रयात्मकः ॥'

इत्युक्तेश्च । अश्नोति व्याप्नोति वेदादिशास्त्राणि तदक्षरम् । 'अशेः सरन्' (उ० सू० ३. ७०) इति सरन् । यद्वा न क्षरतीत्यक्षरम् । धातुः सर्वेषां क्रियाकारकादीनां च प्रकृतिः, तस्मादेव सर्वे विकारा उत्पद्यन्ते । यथा च ब्रह्मतः प्रकृतेः प्रादुर्भावस्तथैवाक्षरेभ्यो धातूनां सम्भवोऽस्ति, तेषु धातुष्वक्षराणां विद्यमानत्वात् । यथा प्रकृत्याः सर्वे विकारा उत्पद्यन्ते तथैव प्रकृतिभूत-धातुतः सर्वाणि नामानि क्रियापदानि च प्रभवन्ति । वेदो ब्रह्मनामास्ति, तस्मिन् केवलमीश्वर-स्यैव वर्णनात् । तस्माद् वेद एकाक्षरशब्दानां मातृकाणां वाचकत्वमस्ति वेदस्यादौ प्रणवस्य प्रयोगात्, 'शं वै प्रजापतिः' (श० ब्रा० २. ५. २. १२), 'कं वै प्रजापतिः' (श० ब्रा० २. ५. २. १३) इत्यादिश्रुतिदर्शनाच्च । पाणिनीयादिव्याकरणे शब्दानामुत्पत्तिः प्रायशो धातुतः प्रदर्शिता, एकाक्षरशब्दाश्च धातुत एव साधिताः, मातृकाविषये तु किमपि नोक्तं परन्तु

१. 'आ देवयजम्' इत्यङ्गारमाहृत्य । (का० श्रौ० सू० २. ४. २६)
२. कपालेनावच्छादयति 'ध्रुवमसि' इति । (का० श्रौ० सू० २. ४. २६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्त्रशास्त्रे तासामपि वाचकत्वं दृश्यते। यथा 'वियद्भृगुस्थमनुयुक्' इत्यत्र। अत्र हि वियद् हः, भृगुः यः, मनुः औः, तेन विसर्गाढ्यं च सद् 'ह्यौः' इति भवति। यथा वा 'दामोदरश्चन्द्रयुतः' 'विधिर्वासवशान्तीन्दुयुक्तम्' इत्यादिषु। अत्र पूर्वस्मिन् दामोदरः ऐ बिन्दुयुतः सन् 'ऐं' भवति। तथोत्तरत्र विधिः कः, वासवो लः, शान्तिः ई, बिन्दुयोगे 'क्लीं' इति भवति। वेदोऽपि मन्त्रसंहिता, तस्मात्तस्मिन्नपि मन्त्रशास्त्रवद् वर्णानां वाचकत्वं युक्तम्।

'अग्ने' हे महावाग्रूपाग्ने ! 'वाग्वा अग्निः' (श० ब्रा० ६. १. २. २८)। त्वं 'धृष्टिः' ध् धर्मः, ऋ वेदवाक्यम्, ष् श्रेष्ठः, ट् खेचरीभूतो ध्वनिरनाहतशब्दः, तेभ्यः इः कामः काम्यः 'असि'। 'मादम्' मा माया तामत्तीति माद्, तं भोगसाधकं द्वैतयज्ञाग्निम् 'अपाजहि' अप आ जहि परित्यज, तस्मिन् हिंसायाः सम्भवात्। 'क्रव्यादम्' चिताग्निं 'निःषेध' निश्शेषं दूरे गमय, परित्यज। तस्य पुनर्जन्मसाधकत्वात्। परमहंसानां देहस्य संस्कारो नास्ति। 'देवयजम्' आत्मयज्ञयोग्यम् 'आत्मानो हैव सर्वे देवाः' (श० ब्रा० १०. ३. ५. १३) 'अग्निं' ब्रह्माग्निम्, 'ब्रह्म वा अग्निः' (श० ब्रा० ५. ३. ५. ३२); 'आ वह' समन्तात् प्रापय। हे ज्ञानाग्ने ! त्वं 'ध्रुवम्' अचलम् 'असि' 'पृथिवीं' मानसकमलं 'दृंह' 'दृढीकुरु। 'ब्रह्मवनि' ब्रह्मणा मनसा स्वीकार्यं, 'मनो वै ब्रह्म' (१४. ६. १. ७)। 'क्षत्रवनि' क्षत्रेण प्राणेन स्वीकार्यं, 'प्राणो वै क्षत्रम्' (श० ब्रा० १४. ८. १४. ४)। 'सजातवनि' जीवात्मना स्वीकार्यम्। सः विष्णुः, तस्माज् जातं जन्म यस्य स जीवः सजातः। 'यादृशाद् वै जायते तादृङ्ङेव भवति' (श० ब्रा० ७. ४. १. १) 'त्वा' त्वां 'भ्रातृव्यस्य' कामस्य पाप्मनो वा 'वधाय' 'उपदधामि' अपरोक्षं करोमि।

सात्वतपक्षभाष्यम्

वृन्दावनतोऽक्रूरेण समानीतं बहिर्नगरमुपवने क्षपितक्षपं मथुरायामपराह्णे कृतप्रवेशमवलोकितनगरापणपथं पुनर्निवृत्य बहिः स्वनिवासस्थानं समायातं सरामं कृष्णं नक्तं समागत्य तस्य मातामहो देवको व्याहरति—धृष्टिरसि इति।

कृष्ण ! त्वं 'धृष्टिः' प्रगल्भः, 'असि' भवसि, त्वन्निधनार्थं पूतनाप्रेषणादयो भूयांस उपायाः कंसेन समनुष्ठिताः। ते निपुणेन वीरवरेण त्वया सर्वे विफलतां नीताः, पूतनादीनां व्यापादनादिति भावः। भावि कर्तव्यं निर्दिशति। 'आमादम्' आमाः शिशवोऽपरिपक्ववयस्कास्तान् 'अत्ति' भक्षयति, स्वानुचरैर्घातयति। भक्षिरत्र योग्यत्वान्निहनने वर्तते। 'क्रव्यादम्' तपस्विवर्गपीडनार्थं रक्षितैस्तृणावर्तादिभिरसुरैर्भगवदाराधनोपविष्टद्विजानां 'क्रव्यं' मांसम् 'अत्ति' भक्षयति, इति तं क्रव्यादम्। दुर्वृत्तोऽयं तपसि वर्तमानान् वेदविदो ब्राह्मणान् निष्कारणं व्यापादयितुं स्वरक्षांसि प्रहिणोति। तैश्च निर्दयैः क्रूरैर्निहत्य तेषां मांसं भुज्यत इत्यतः शिशुघाती, तापसद्रोही, प्रजापीडकोऽयं नृपतिरविलम्बं संहरणीयः। अयं मम मातुल इति बुद्धया न

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षन्तव्य इति भावः। कीदृशम् 'अग्निम्' अग्निवत् प्रजादाहकम्, 'अग्ने' सदग्रणीः! तेजस्विन्निति वा। 'अपजहि' अपनाशय, नासौ वीरगतिं नेतुमर्हः। अतस्तथा हन्तव्यो यथापमृत्युरस्य स्यात्। केशेषु गृहीत्वा पातयैनं रङ्गशालायां सर्वेषां समक्षं रङ्गमञ्चादिति तात्पर्यम्। नन्वेवं माथुरा भूदेवाः, अन्ये क्षत्रियाः, यदवश्च मज्ज्ञातयो विरुन्धीरन्, इत्याशङ्क्याह—'ब्रह्मवनि'। 'ब्रह्म' ब्राह्मणस्तेन 'वन्यते' सम्भज्यते स्तूयते इति ब्रह्मवनि। 'क्षत्रवनि' क्षत्रियैः वननीयम् 'सजातवनि' सजातैर्ज्ञातिभिर्यदुभिश्च वननीयम्। 'त्वा' त्वां भ्रातृव्यस्य च मम भ्रातुरुग्रसेनस्य पुत्रस्य कंसस्य 'वधाय' निहननाय 'उपदधामि' उपस्थापयामि, नियोजयामि, तं व्यापादयितुमुपदिशामि। अत्रत्या भूदेवाः, क्षत्रियास्त्वद्बन्धवो यदवश्च सर्वे त्वदनुकूलास्त्वत्समर्थकाः, त्वयि प्रणयातिरेकं भजन्ते। त्वयि तथानुतिष्ठति हर्षिष्यन्ति, न विरोत्स्यन्ति। तदत्याचारात् समस्ताः प्रजास्तत्प्रतीपं संवृत्ताः। अतो मध्येमार्गं न कोऽपि तदा प्रतिभन्त्स्यतीति मातामहेऽभिदधाने 'तथा आचरिष्यामि' इति भगवता प्रतिश्रुते तस्यां रात्रौ स्वमृत्युसूचकान् जाग्रति स्वप्ने च गर्दभावरोहणादिकर्णपिधानान्तरघोषाश्रवणादीन् बहूनपशकुनान् कंसो ददर्शेत्यभिप्रायः।

किञ्च—त्वं 'ध्रुवं' ध्रुवः स्थिरः अविचलः, युधि केनापि जेतुमशक्यः। लिङ्गव्यत्ययश्छान्दसः। 'असि' वर्तसे। अतः सर्वान् कंसपक्षपातिनो शिशुपालजरासन्धादीन् निहत्य 'पृथिवीम्' पार्थिवान्, जरासन्धेन कारायां क्षिप्तान् राज्ञः 'दृंह' दृढीकुरु, विगतभयान्, सोत्साहान्, सहर्षान् विधेहि। किं बहुना, स्वावतरणप्रयोजनं भूभारावतारणं विधाय प्रपन्नां पृथिवीं पालयेति भावः।

अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय। धर्त्रमसि दिवं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय। विश्वाभ्यस्त्वाशाभ्य उपदधामि चितः स्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वम्॥ १८॥

१. कपाले अङ्गारोपनिधानम्, २. द्वितीयकपालोपधानम्, ३. तृतीयकपालोपधानम्, ४. चतुर्थकपालोपधानम्, ५. दक्षिणोत्तरयोः कपालोपधानम्, ६. अङ्गारैः कपालाच्छादनम्।

देवयाजिपक्षभाष्यम्

अस्यामष्टादश्यां कण्डिकायां षण्मन्त्राः। सव्याङ्गुल्याऽशून्येऽङ्गारोपनिधानः 'अग्ने ब्रह्म' इत्यादिः प्रथमः। अस्य याजुष्युष्णिक् छन्दः, अग्निर्देवता। 'धरुणम्' इत्यादिर्मन्त्रो मध्यमकपालस्य पश्चाद् द्वितीयकपालोपधानः। अस्य याजुषी छन्दः, कपालं देवता, 'धर्त्रम्' इत्यादिः प्रथमस्य कपालस्य पूर्वभागे तृतीयकपालोपधानः। अस्यार्षी त्रिष्टुप् छन्दः, कपालं देवता।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'विश्वाभ्यस्त्वा' इत्यादिः प्रथमकपालस्य दक्षिणे चतुर्थकपालोपधानः, अस्य याजुषी त्रिष्टुप् छन्दः, कपालं देवता। 'चितः स्थ' इति पञ्चमो मन्त्रो दक्षिणोत्तरयोः कपालोपधानः, अस्य याजुषी गायत्री छन्दः, कपालं देवता। 'भृगूणाम्' इत्यादिः षष्ठो मन्त्रोऽङ्गारैः कपालाच्छादनार्थः। अस्यासुर्यनुष्टुप् छन्दः, कपालं देवता। ऋषिः परमेष्ठी प्राजापत्य उक्तः समेषाम् (श० ब्रा० १. २. १. ९-१३; का० श्रौ० २. ४. २९-३७)।

अग्नीद् ऋत्विग्वामहस्तस्याङ्गुल्या स्पृष्टमङ्गारं कपाले निदधाति—अग्ने इति।[१] 'अग्ने' 'ब्रह्म' अङ्गुलिदानप्रवृत्तं ब्राह्मणं मां 'गृभ्णीष्व' अनुगृह्णीष्व। 'हृग्रहोर्भश्छन्दसि' इति वार्तिकेन ग्रहेर्हस्य भः। अथ मध्यमकपालस्य पश्चाद्भागे द्वितीयं कपालं संश्लिष्टं स्थापयन्नाह—धरुणमिति।[२] 'धरुणम्' पुरोडाशस्य धर्तृ 'असि' अन्तरिक्षं 'दृंह' अन्तरिक्षलोकं दृढीकुरु। पुरोडाशपाकावसरेऽग्नेरूर्ध्वा ज्वाला अन्तरिक्षं न दहेयुरिति दाहमर्षणक्षममन्तरिक्षं कुरु। 'त्वा' त्वां 'ब्रह्मवनि क्षत्रवनि सजातवनि उपदधामि भ्रातृव्यस्य वधाय' इति व्याख्यातचरम्। अग्नीत् मध्यमस्य कपालस्य पुरस्तात् संश्लिष्टं तृतीयं कपालमुपदधाति—धर्त्रमिति।[३] हे कपाल! त्वं 'धर्त्रम्' धारकम् 'असि' अतः 'दिवं' द्युलोकं 'दृंह' दृढीकुरु। मा अग्नेर्ज्वालासमूहो द्युलोकं दग्धुं समर्थो भूदिति दिवं दृंह। ब्रह्मवनि त्वेत्यादि व्याख्यातचरम्। मध्यमकपालस्य दक्षिणतः संश्लिष्टं चतुर्थं कपालमुपदधद् अग्नीद् आह—विश्वाभ्य इति।[४] हे कपाल! 'त्वा' त्वां 'विश्वाभ्यो दिग्भ्यः' सर्वदिशां दार्ढ्यायोपदधामि। चतुर्णां कपालानामुपधानेन यजमानो विश्वं विजयत इत्याशयः। 'ब्रह्मवनि' इत्यादि प्राग्वत्। आग्नेयस्य पुरोडाशस्याष्टभिः कपालैः संस्कर्तव्यत्वाच्चतुर्णां तावत् कपालानामुपधानं जातम्। अवशिष्टानां चतुर्णां कपालानामुपधानं समं विभज्य द्वयोर्दक्षिणतो द्वयोरुत्तरतश्चिकीर्षन् मन्त्रं पठेत्—चितः स्थ इति।[५] हे कपालाः! यूयं 'चितः' प्रथमोपहितकपालस्योपचायकाः 'स्थ' भवथ, 'चिञ् चयने' (स्वा० उ० १२५१), ततः कर्तरि क्विपि 'ह्रस्वस्य पिति कृति तुक्' (पा० ६. १. ७१) इति सूत्रेण धातोस्तुगागमः। 'ऊर्ध्वचितः' ऊर्ध्वमुपचितानामन्येषां कपालानामप्युपचायका भवथ।

अथ कपालान्यङ्गारैरभ्यूहति—भृगूणामिति।[६] हे कपालाः! यूयं 'भृगूणाम् अङ्गिरसां च' भृज्जतीति भृगुः 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' (उ० सू० १. २८) इति

१. सव्याङ्गुल्याऽशून्येऽङ्गारं निदधाति 'अग्ने' इति। (का० श्रौ० सू० २, ४, २९)

२. 'धरुणम्' इति पश्चात्। (का० श्रौ० सू० २, ४, ३०)

३. पुरस्ताद् 'धर्त्रम्' इति। (का० श्रौ० सू० २. ४. ३१)

४. 'विश्वाभ्यः' इति दक्षिणतः। (का० श्रौ० सू० २. ४. ३२)

५. समं विभज्य द्वे दक्षिणतः, एवमुत्तरतः 'चितः स्थ' इति। (का० श्रौ० सू० २. ४. ३३)

६. 'भृगूणाम्' इत्यङ्गारैरभ्यूहति। (का० श्रौ० सू० २. ४. ३७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्रेण कुप्रत्यये सम्प्रसारणसलोपकुत्वानि। भार्गवगोत्रोत्पन्ना भृगवः, आङ्गिरसगोत्रोत्पन्ना अङ्गिरसः, 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (पा० ४. १. ११४) इति सूत्रेण ऋषित्वाद् भृगुशब्दादणि प्रत्यये भार्गवः, अङ्गिरःशब्दात् प्रत्यये आङ्गिरस इति। वहुवचने चापत्यप्रत्ययस्य 'अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च' (पा० २. ४. ६५) इति सूत्रेण लुकि भृगवः, अङ्गिरसः, षष्ठीवहुवचने भृगूणामङ्गिरसां च 'तपसां' तपोऽग्निना 'तप्यध्वम्' तप्ता भवथ।

अस्मिन् षष्ठे कपालानुवाके द्वाभ्यां सप्तदश्यष्टादशीभ्यां कण्डिकाभ्यां प्रतिक्रियमेको मन्त्र इति दशमन्त्राः (सप्तदश्यां ४, अष्टादश्यां च ६) व्याख्याताः। ताश्च क्रियाः सन्ति यथाक्रमम्— १. उपवेषादानम्, २. अङ्गारापोहनम्, ३. एकाङ्गाराहरणम्, ४. कपालेनाङ्गाराच्छादनम्, ५. कपालेऽङ्गारोपनिधानम्, ६. द्वितीयकपालोपधानम्, ७. तृतीयकपालोपधानम्, ८. चतुर्थकपालोपधानम्, ९. दक्षिणोत्तरयोः कपालोपधानम्, १०. अङ्गारैः कपालाच्छादनञ्च। षट्स्वनुवाकेष्वष्टादशकण्डिकासु समुदिता मन्त्रसंख्या ६७।

आत्मयाजिपक्षभाष्यम्

हे 'ब्रह्म अग्ने' 'गृभ्णीष्व' मोक्षदानेनानुगृह्णीष्व, हे ज्ञानाग्ने! त्वं 'धरुणं' जीवरूपहविषो धारकम् 'असि'। 'अन्तरिक्षं' हार्दाकाशं 'दृंह' दृढीकुरु। 'ब्रह्मवनि' ब्रह्मर्षिभिः स्वीकार्यं 'क्षत्रवनि' राजर्षिभिः स्वीकार्यं 'सजातवनि' परमहंसैः स्वीकार्यं 'त्वा' त्वां 'भ्रातृव्यस्य' अज्ञानस्य 'वधाय' 'उपदधामि' अपरोक्षं करोमि। हे ज्ञानाग्ने! त्वं 'धर्त्रम्' ईशस्य धारकम् 'असि'। 'दिवं' भृकुटिं 'दृंह'। 'ब्रह्मवनि' समष्टिमनसा स्वीकार्यं 'क्षत्रवनि' समष्टिप्राणेन स्वीकार्यं 'सजातवनि' नरेण स्वीकार्यं 'त्वा' त्वां 'भ्रातृव्यस्य' संसारभ्रान्तेः 'वधाय' 'उपदधामि'। हे ज्ञानाग्ने! 'विश्वाभ्यः' सर्वाभ्यः 'आशाभ्यः' इन्द्रियरूपाभ्यस्तासां दार्ढ्याय 'त्वा' त्वाम् 'उपदधामि' अपरोक्षं करोमि। 'चितः' हे चैतन्यान्तःकरणानि! यूयम् 'ऊर्ध्वचितः' आत्मना चैतन्यानि 'स्थ'। 'भृगूणाम्' ज्वालारूपा नरनारायणजीवास्तेषाम् 'अङ्गिरसाम्' प्राणानाम्, 'प्राणो वा अङ्गिराः' (श० ब्रा० ६. १. २. २८) 'तपसा' ज्ञानेन यथाह मनुः—

> 'ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्।
> वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम्॥' (११. २३५)

'तप्यध्वम्' योगैश्वर्यसम्पन्नानि भवत। 'तप ऐश्वर्ये' (दि० आ० ११५९) इति।

सात्वतपक्षभाष्यम्

अग्ने! दैत्यादिदुर्जनदावदहन कृष्ण! मम दुहितृतनय! 'ब्रह्म' वेदं, वेदमार्गे स्थितमित्यर्थः 'गृभ्णीष्व' अनुगृहाण धर्मस्थापनेनेति भावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'धरुणं' धारणशीलं, 'धर्त्रम्' धारकम्, 'असि' वर्तसे। अतः 'अन्तरिक्षम्' अन्तरिक्षस्थितव्योमचारिदेववर्गं, 'दिवं' दिवि स्थितं देववर्गं च 'दृंह' दृढीकुरु। दुर्वृत्तराजन्यदैत्यादीनां निधनेन त्रिलोकीमानन्दयेरिति भावः।

'ब्रह्मवनि' इत्यादि 'भ्रातृव्यस्य वधाय' इत्यन्तं द्विवारं पठितं समानार्थं व्याख्यातञ्च। कृष्ण ! 'चितः' न केवलं त्वमेव ज्ञानी, अपितु सर्वे त्वद्बन्धवो ज्ञानिनः, वेदप्रतिपाद्यधर्मं ज्ञात्वा सेतिकर्तव्यताकतदनुष्ठानतत्पराः 'स्थ' भवथ। किञ्च 'ऊर्ध्वचितः' सर्वोत्कृष्टब्रह्मतत्त्वज्ञा आत्मदर्शिनः भुक्तिमुक्तिभाजो यूयं भवतेति भावः। 'चिती संज्ञाने' (भ्वा० प० ३९)।

अपिवा 'ऊर्ध्वचितः' सर्वोत्कृष्टपारिजातादिदिव्यवस्तुसंग्राहकाः 'चिञ् चयने' (स्वा० उ० १२५२), 'चिञ् चयने' (चु० उ० १६३०)। 'भृगूणाम्' 'अङ्गिरसां' चेति उपलक्षणमत्रीणां काश्यपानाञ्चापि। अयं भावः—वेदद्रष्टॄणामृषीणां चत्वार एव मुख्याः परिवाराः। अन्येषां यथायथं तेष्वेवान्तर्भावः। तथा च सर्वेषाम् ऋषीणां तत्सम्बधिनां त्वद्दत्ताशिषा लब्धेन 'तपसा' ऐश्वर्येण, 'तप्यध्वम्' समृद्धा भवत। 'तप ऐश्वर्ये वा') दि० आ० ११५९) इत्यतो लोटि मध्यमपुरुषबहुवचने साधुः।

७. पेषणानुवाकः

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु। धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु दिवः स्कम्भनोरसि धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु ॥ १९ ॥

१. कृष्णाजिनादानम्, २. रक्षसामपहरणम्, ३. कृष्णाजिनास्तरणम्, ४. कृष्णाजिने शिलायाः स्थापनम्, ५. शम्यास्थापनम्, ६. उपलाग्रहणम्।

देवयाजिपक्षभाष्यम्

अस्यामेकोनविंश्यां कण्डिकायां षण्मन्त्राः। प्रथमः 'शर्मासि' इति कृष्णाजिनादानः। अस्य दैव्यनुष्टुप् छन्दः, कृष्णाजिनं देवता। 'अवधूतम्' इत्यरातिरक्षसामपहरणार्थः। अस्यासुर्यनुष्टुप् छन्दः, रक्षो देवता। 'अदित्याः' इति कृष्णाजिनास्तरणार्थः। अस्यासुर्यनुष्टुप् छन्दः, कृष्णाजिनं देवता। 'धिषणा' इति चतुर्थो मन्त्रः कृष्णाजिने शिलास्थापनार्थः। अस्यासुरी गायत्री छन्दः, दृषद् देवता। 'दिवः' इति दृषदः पश्चाद्भागेऽधस्ताच्छम्यास्थापनार्थः। अस्य याजुष्युष्णिक

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

छन्दः, शम्या देवता। 'धिषणा' इत्यादिः षष्ठो मन्त्र उपलाग्रहणार्थः। अस्य प्राजापत्यानुष्टुप् छन्दः, उपला देवता। परमेष्ठी प्राजापत्य ऋषिरुक्तः समेषाम् (श० ब्रा० १. २. १. १४-१७; का० श्रौ० २. ५. २-५)।

यथा व्रीह्यवघाते कृष्णाजिनादानं, रक्षसामपहरणं, कृष्णाजिनास्तरणमित्येतास्तिस्रः क्रियाश्चतुर्दश्यां कण्डिकायां व्याख्यातास्तथात्र पेषणानुवाकेऽपि तास्तिस्रः क्रिया अवगन्तव्याः। अथ तस्मिन्नास्तीर्णे कृष्णाजिने पेषणीं दृषदं दधाति— धिषणेति।[1] हे दृषत्! त्वं 'धिषणा' धीः कर्म बुद्धिर्वा। धियं सनोति व्याप्नोति ददातीति वा धिषणा, छान्दसो ह्रस्वः, कर्मसाधिका 'असि'। 'पर्वती' पर्ववती, पर्वतवद्वस्तूनां धारिकासि। तस्मात् पेषणार्थं सम्यग् धारयितुं शक्नोषीति भावः। 'अदित्याः' भुवः 'त्वक्' कृष्णाजिनरूपा 'त्वा' त्वां 'प्रतिवेत्तु' दृषदस्तव स्थितिमनुजानातु, स्वीकरोत्वित्यर्थः। अथ दृषदः पश्चादुदगग्रां द्वादशाङ्गुलां शम्यां दृषदोऽधस्तादध्वर्युर्निदधाति तेन पश्चाद्भागे उच्चा, अग्रतो निम्ना च दृषज्जायते। शम्यां तथा स्थापयन्नध्वर्युराह— दिव इति।[2] हे शम्ये! त्वं 'दिवः' द्युलोकस्य 'स्कम्भनीः' स्तम्भनी, प्रथमैकवचने द्वितीयाबहुत्वं व्यत्ययेन द्रष्टव्यम्। दृषदुपलयोः पृथिवीद्युभ्यामुपलक्षितत्वादन्तरिक्षाङ्गत्वं शम्यायाः प्रतिपाद्यते। 'अन्तरिक्षमेव रूपेणान्तरिक्षेण हीमे द्यावापृथिवी विष्टब्धे' (श० ब्रा० १. २. १. १६) इति श्रुतेरन्तरिक्षभूतया शम्यया द्यावापृथिवीरूपयोर्दृषदुपलयोः स्तम्भनं सिद्धम्। 'स्कभि प्रतिबन्धे' (भ्वा० आ० ३८७) ततो दृषदि पेषणार्थमुपलां निदधाति—धिषणासीति।[3] हे शिलापुत्रक! त्वं 'धिषणा' पेषणव्यापारस्य धारयित्री 'पार्वतेयी' पर्वत्या दृषदोऽपत्यभूता, 'स्त्रीभ्यो ढक्' (पा० ४. १. १२०) इति ढकि स्त्रीत्वलक्षणे 'टिड्ढाणञ्०' (पा० ४. १. १५) इत्यादिना ङीपि, उदात्तनिवृत्तिस्वरः। 'कनीयसी ह्येषा दुहितेव भवति' (श० ब्रा० १. २. १. १७)। 'त्वा' त्वां 'पर्वती' दृषद् 'प्रतिवेत्तु' माता दुहितरमिव त्वामुपलां प्रतिजानातु स्वीकरोत्वित्यर्थः।

आत्मयाजिपक्षभाष्यम्

हे हृदय! त्वं 'शर्म' ब्रह्मालयत्वेनानन्दस्वरूपम् 'असि'। 'रक्षः' अज्ञानम् 'अवधूतम्' 'अरातयः' कामादयः 'अवधूताः'। हे हृदय! त्वम् 'अदित्याः' पराया ब्रह्मशक्तेः 'त्वक्' आवरणम् 'असि'। 'अदितिः' परा शक्तिः, यथा श्रुतिः 'इयं वा अस्य सर्वस्य योनिरस्यै वा इमाः प्रजाः प्रजाताः' (श० ब्रा० ४. १. २. ६)। 'त्वा' त्वां 'प्रतिवेत्तु' मदीयमिति जानातु।

१. तस्मिन् दृषदं 'धिषणासि' इति। (का० श्रौ० सू० २. ५. ३)

२. पश्चाच्छम्यामुपोहत्युदीचीं 'दिवः' इति। (का० श्रौ० सू० २. ५. ४)

३. दृषद्युपलां 'धिषणासि' इति। (का० श्रौ० सू० २. ५. ५)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे परशक्ते ! त्वं 'पर्वती' पर्वाणि भागास्त्रिदेवरूपाः सन्त्यस्य स पर्वतः महानारायणस्तस्य शक्तिः 'धिषणा' सर्वाधारभूता 'असि'—

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ।।

इति गीतायां (७. ५) भगवद्वचनात् । 'अदित्याः' 'त्वक्' हृदयं 'त्वा' त्वां 'प्रतिवेत्तु' त्वदवस्थानं जानातु । 'र्' हे हार्दान्तरिक्षाधिष्ठातृदेवते ! त्वं 'दिवः' द्युलोकस्य 'स्कम्भनीः' स्तम्भनकारिणी 'असि' । हे बुद्धे ! त्वं 'धिषणा' इन्द्रियरूपहविषो धारिका 'पार्वतेयी' पर्वत्याः परायाः शक्तेः पुत्री 'असि' । पर्वती पराशक्तिः 'त्वा' त्वां 'प्रतिवेत्तु' स्वकीयत्वेन जानातु ।

सात्वतपक्षभाष्यम्

गुरुकुलान्मधुपुरीं प्रतिनिवर्तमानं स्वशिष्यं श्रीकृष्णं सान्दीपनिराचार्यः सानन्दमाशिषा योजयति— शर्मेति । भो मम प्रेमास्पद कृष्ण ! त्वं 'शर्म' सुखं सुखवान् सदा कुशली 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति वार्तिकेन मतुपोऽत्र लुक् । 'असि' भूयाः । 'रक्षः' दुष्टस्वभावं पूतनादिकंसान्तं जगद्बाधकम्, 'अवधूतम्' निराकृतम्, संहृतम् । 'अरातयः' दानविरोधिनः अदानस्वभावा वा शिशुपालशाल्वनरकप्रभृतयः शत्रवः 'अवधूताः' पराजिता भूयासुः । त्वम् 'अदित्याः' पृथिव्याः 'त्वक्' तद्वद् रक्षकोऽसि 'त्वच संवरणे' संवरणम् आच्छादनम्, तच्चात्र संरक्षणपर्यवसायि । यथा त्वक् शरीरं संवृत्य पाति तथा त्वमपि पृथिवीं पाया इति भावः ।

अपि वा— ज्यौतिषशास्त्रबलाद् भाविवृत्तज्ञो गुरुराचष्टे । 'अदित्याः' पृथिव्यवतार-भूतायाः सत्यभामायाः 'त्वक्' संरक्षकः पतिर्भूयाः । एतेन स्यमन्तकोपाख्यानं सूचितम् । सत्रा-जितो दुहिता पृथिव्यंशभूता सत्यभामा त्वद्भार्या भविष्यतीति तत्तोषाय तत्पितृनिहन्तारं शतधन्वानं त्वं हनिष्यसि । तस्याः प्रसादनायैव च स्वर्गतः पारिजातादिकं द्वारिकायामा-नेष्यसि । किं बहुना, महान् पराक्रमी भवेरिति भावः । 'अदितिः' पृथिवी, सत्यभामा वा 'त्वा' त्वाम्, 'प्रतिवेत्तु' प्रतिशब्दः प्रत्यक्षवचनः, साक्षात्करोतु स्वस्वामित्वेन, सुचिरं त्वया सार्धं दाम्पत्यसुखमनुभवतु । 'धिषणा' वाक् (निघ० १. ११. ४४) तया तद्वान् वाग्मी लक्ष्यते । तात कृष्ण ! त्वं 'धिषणा' वाग्मी सभायां वाक्पटुः 'असि' भूयाः । 'पर्वती' पर्वतो मेघः (निघ० १. १०. ६) तदस्यास्तीति व्रतसाम्येन पर्वती मेघसमानव्रतः तद्वत् सततयाचक-दारिद्र्यदारिद्रविणौघवर्षणव्रतः । किञ्च 'अदित्याः' गोः (निघ० २. ११. ६) 'त्वक्' संरक्षकः । अपिवा— 'अदित्याः' पृथिव्याः (निघ० १. १. १४) 'त्वक्' संरक्षकः, गोपालकः पृथिवी-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पालकश्च भूयाः । 'प्रतिवेत्तु' व्यवहितोऽपि प्रतिरुपसर्गः धातुना सम्बध्यते । 'त्वा' त्वां तथाभूतं प्रत्येतु लोकः, अयं कृष्णः पूर्वोक्तसर्वधर्मसमन्वित इति विश्वसितु ।

पुनराह गुरुः 'दिवः' द्युतेर्ज्ञानस्य, 'स्कम्भनीः' 'स्कम्भः' प्रतिबन्धः तं 'नयति' दूरे प्रापयति, दूरीकरोति, नाशयतीत्यप्रतिहतज्ञानः अकुण्ठितप्रज्ञः प्रत्युत्पन्नमतिस्त्वम् 'असि' भूयाः । धिषणाशब्दः पर्वतशब्दश्च व्याख्यातौ । 'पर्वती' मेघाध्यक्ष इन्द्रः 'त्वा' त्वाम् 'पार्वतेयी' द्वितीयार्थे प्रथमा 'पार्वतेयीं' पर्वतो मेघः तस्येयं पार्वती तस्या अपत्यं दुहितेव वृष्टिस्तया तत्कर्त्ता लक्ष्यते । तस्मात्तस्याः कर्त्तारं मनोरथसन्दोहपूर्तिकरं, 'वेत्तु' जानातु । स्वाभिलषित-साधकं त्वां मत्वा स्वमातृकुण्डलहर्तारं नरकं निहन्तुं समागत्य सविनयमभ्यर्थयताम् । स्वसमीहितसिद्धयर्थं त्वां प्रपद्यतामिति भावः ।

धिषणाशब्दं पर्वतशब्दञ्च देवराजयज्वा व्याचचक्षे—धिषणा धारयत्यर्थमिति धीः बुद्धिः, धारयति कर्त्तारं फलप्रदानेनेति धीः बुद्धिः कर्म वा, तां सनोति सम्भजते इति सनोतेः 'षणु दाने' (भ्वा० प० ४६४) इत्यस्मात् पचाद्यचि (३. १. ११४) पृषोदरादित्वात् (पा० ६. ३. १०९) पूर्वपदह्रस्वत्वे च धिषणा । यद्वा—'ञिधृषा प्रागल्भ्ये' (स्वा० प० १२७०) 'धृषेर्धिष् च संज्ञायाम्' (उ० सू० २. ८०) इति क्युः प्रत्ययो धिषादेशश्चेति 'धिषणा' प्रगल्भा, समर्था रक्षितुं जगद् वर्षप्रदानेनेत्यर्थः । यद्वा दिधिषामि (ऋ० २. ७. २३. १२) इत्यत्र स्कन्दस्वामिना पठितात् 'धिषि धारणे' इत्यस्मात् 'धिष् शब्दे' (जु० प० ११०३) इति धातुपाठपठिताद्वा बाहुलकात् क्युप्रत्यये धिषणा, वाचि स्वाभिधेयं धारयति, शब्दार्थसम्बन्धस्य नित्यत्वात् ।

पर्वतः, 'पॄ पालनपूरणयोः' (क्र्या० प० १४९०) 'स्नामदिपद्यर्तिपॄशकिभ्यो वनिप्' (उ० सू० ४. ११३) पृणन्ति पालयन्त्यवयविनं, पूर्यन्ते वा तेन इति पर्वाणि । यद्वा प्रीणाते-र्बाहुलकात् 'उणादयो बहुलम्' (पा० ३. ३. १) वनिपि ईकारस्याकारः स च पकारात् परः । प्रीणयन्ति स्वावयविनमिति पर्वाण्यवयवास्तानि सन्त्यस्येति 'तप् पर्वमरुद्भ्याम्' (वा० ५. २. १२१) इति मत्वर्थीयस्तप्प्रत्ययः । मेघस्य पर्वतस्य च देवतात्मकत्वस्य विद्यमानत्वादवयवित्वं वक्तुं शक्यम् । यद्वा परिदृश्यमानाकारेणापि मेघस्य धूमादिसङ्घातत्वात् पर्वतस्य च शिलादि-मत्त्वादवयवित्वम् । यद्वा 'पर्व पूरणे' (भ्वा० प० ५७७) अस्माद् 'भृमृदृशियजिपर्विपच्यमि०' (उ० सू० ३. ११०) इत्यादिनाऽतच् प्रत्ययः । पर्वति पूरयति वर्षेण भूमिं स्वशरीरेणाकाशं वा । पर्वतोऽपि निर्झरनदीप्रवाहादिना भूमिम्, स्वोन्नत्याकाशञ्च पूरयति ।

धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि ॥ २० ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१. दृषदि तण्डुलावपनम्, २–४. हविःपेषणम्, ५. कृष्णाजिने पिष्टपातनम्, ६. पिष्टेक्षणम्, ७. पिष्यमाणेष्वाज्यनिर्वपणम्।

देवयाजिपक्षभाष्यम्

अस्यां विंश्यां कण्डिकायां सप्त मन्त्राः। 'धान्यम्' इत्यादिः शिलायां तण्डुलावपनार्थः प्रथमः। अस्य याजुषी बृहती छन्दः। 'प्राणाय त्वा', 'उदानाय त्वा', 'व्यानाय त्वा' इति मन्त्रास्त्रयः। तेषां दैवी पङ्क्तिश्छन्दः, हविःपेषणे च विनियोगः। 'दीर्घाम्' इत्यत आरभ्य 'पाणिना' इत्यन्तस्यार्षी त्रिष्टुप् छन्दः, कृष्णाजिनोपरि पिष्टपातने विनियोगः। 'चक्षुषे त्वा' इत्यस्य दैवी बृहती छन्दः, पिष्टेक्षणे च विनियोगः। 'महीनां पयोऽसि' इत्यस्य दैवी त्रिष्टुप् छन्दः, आज्यं देवता, पिष्यमाणेष्वाज्यनिर्वपणार्थे विनियोगः। सर्वेषां परमेष्ठी प्राजापत्य ऋषिः। सप्तममन्त्रविरहितानां षण्णां हविश्च देवता (श० ब्रा० १. २. १. १८-२१; का० श्रौ० २. ५. ६-९)।

संचितपेषणसम्भारोऽध्वर्युस्तण्डुलान् दृषद उपर्यावपति—धान्यमसीति।[१] हे ओप्यमानतण्डुलराशे ! त्वं 'धान्यम्' पोषणसमर्थम्। 'डुधाञ् धारणपोषणयोः' (जु० उ० १०९२) भावे ल्युटि 'धानं' पोषणम्। 'तत्र साधुः' (पा० ४. ४. ९८) इति साधावर्थे यत् प्रत्ययः। 'धिवि प्रीणने' इत्यस्माद् धान्यशब्दनिष्पत्तिरित्युव्वटमहीधरादयः। 'असि' अतो 'देवान्' अग्न्यादीन् 'धिनुहि' प्रीणय। ततः 'प्राणाय त्वा' इत्येकम्, 'उदानाय त्वा' इति द्वितीयं, 'व्यानाय त्वा' इति तृतीयं मन्त्रं पठित्वा त्रिस्तण्डुलान् पिनष्टि[२]—हे तण्डुल ! 'प्राणाय' प्रकर्षेणाऽनिति चेष्टते इति प्राणः श्वासस्तदर्थं प्राणशक्तिप्राप्त्यर्थं 'त्वा' त्वां, पिनष्मीति शेषः। 'उदानाय' ऊर्ध्वमनिति चेष्टत इत्यूर्ध्वगमनो वायुः। एवं व्याप्याऽनिति चेष्टत इति व्यानो व्यापको वायुः तयोः संचारायेति योज्यम्। प्राणादिशब्दोच्चारणेन देवेभ्यः प्राणादिमत् सजीवं हविरर्प्यत इत्यभिसन्धिः। ततः पिष्टं हविः कृष्णाजिने दधाति—दीर्घामिति।[३] हे पिष्टहविः ! 'दीर्घाम्' बहुकालपर्यन्तां 'प्रसितिम्' कर्मबन्धनपरम्पराम्, प्रसयनं प्रबन्धः 'षिञ् बन्धने' (स्वा० उ० १२४९), भावे क्तिन्। 'अनु' अनुलक्ष्य 'आयुषे' आयुषोऽभिवृद्धये, त्वां कृष्णाजिने 'धाम्' दधामि। लुङि अडागमाभावः (पा० ६. ४. ७५)।

अथवा 'प्रसितिः प्रसयनात् तन्तुर्वा जालं वा' (निरु० ६. १२) इति यास्कोक्तेः कृष्णाजिनमत्र पिष्टहविर्ग्राहकत्वात् प्रसितिशब्दाभिधेयम्। दीर्घां प्रसितिमनु अतिविस्तृते कृष्णाजिने

१. 'धान्यमसीति तण्डुलानोप्येति'। (का० श्रौ० सू० २. ५. ६)
२. 'प्राणाय त्वा' इति प्रतिमन्त्रम्। (का० श्रौ० सू० २. ५. ६)
३. 'दीर्घाम्' इति कृष्णाजिने प्रोहति। (का० श्रौ० सू० २. ५. ७)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आयुर्लाभार्थं त्वां दधामि। 'देवो वः' इत्याद्यंशः षोडश्यां कण्डिकायां व्याख्यातः। कृष्णाजिने पिष्टमोप्य प्रेक्षते—चक्षुषे इति।[1] 'चक्षुषे' चक्षुश्शक्तिसम्पादनार्थं 'त्वा' त्वां पश्यामीति शेषः। यद्वा हविषः सजीवत्वेन चक्षुराद्यपेक्षेति चक्षुरिन्द्रियदानार्थं त्वां पश्यामि। पिष्यमाणेषु तण्डुलेषु पात्रान्तरादन्यः ऋत्विग् ब्रह्मा आज्यं निर्वपति—महीनामिति।[2] 'महीनाम्' गवाम् 'महीति गोनाम' (निघ० २. ११. ५)। हे आज्य ! त्वं 'पयः' क्षीरम् 'असि'। क्षीरोत्पन्नमेव घृतं भवतीति घृतं पयःशब्देनोच्यत इति।

अत्र सप्तमे पेषणानुवाके द्वाभ्यामेकोनविंशीविंशीभ्यां कण्डिकाभ्यां क्रियाभेदेन त्रयोदश मन्त्राः (एकोनविंश्यां ६, विंश्यां च ७) व्याख्याताः। तत्र निर्दिष्टाः क्रियाः सन्ति क्रमशः— १. कृष्णाजिनादानम्, २. रक्षसामपहरणम्, ३. कृष्णाजिनास्तरणम्, ४. कृष्णाजिने दृषदः स्थापनम्, ५. शम्यास्थापनम्, ६. उपलाग्रहणम्, ७. दृषदि तण्डुलावपनम्, ८-१०. त्रिः पेषणम्, ११. कृष्णाजिने पिष्टपातनम्, १२. पिष्टेक्षणम्, १३. आज्यनिर्वाप इति। सप्तस्वनुवाकेषु विंशतिकण्डिकासु संमुदिता मन्त्रसंख्या अशीतिः (८०)।

आत्मयाजिपक्षभाष्यम्

हे इन्द्रियसमूह ! त्वं 'धान्यम्' धिनोति प्रीणयति प्राणान् इति धान्यम् 'असि'। 'देवान्' नरनारायणजीवान् 'धिनुहि' प्रीणय। 'त्वा' त्वां 'प्राणाय' निगृह्णामि, 'त्वा' 'उदानाय' निगृह्णामि, 'त्वा व्यानाय' निगृह्णामि। तथा 'दीर्घां प्रसितिम्' अविच्छिन्नं कर्मबन्धनम् 'अनु' अनुलक्ष्य 'आयुषे' मृत्युनिवृत्तये 'त्वा धां' हार्दाकाशे दधामि। दधातेर्लुङि 'बहुलं छन्दस्यमाङ्-योगेऽपि' (पा० ६. ४. ७५) इत्यडागमाभावः। 'हिरण्यपाणिः' हिरण्यं ज्योतिस्तदेव पाणिरस्येति ज्योतिर्हस्तः, 'ज्योतिर्वै हिरण्यम्' (श० ब्रा० ६. ७. १. २) 'देवः सविता' मनः, 'मनो ह वा अस्य सविता' (श० ब्रा० ४. ४. १. ७), 'अच्छिद्रेण' प्राणरूपेण, 'यो वा अयं पवत एषोऽच्छिद्रं पवित्रम्' (श० ब्रा० १. १. ३. ६) 'स (प्राणः) यदा मृत्युमत्यमुच्यत वायुरभवत्' (श० ब्रा० १४. ४. १. १४) 'पाणिना' वः प्रतिगृभ्णातु तथा 'चक्षुषे' मानससूर्याय, यथा श्रुतिः— 'अथ य एष एतस्मिन् मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन् पुरुषः' (श० ब्रा० १०. ५. २. ७)। 'त्वा' त्वां निगृह्णामि। हे इन्द्रियशक्तिसमूह ! त्वं 'महीनाम्' इन्द्रियाणां 'पयः' शक्तिसमूहः 'असि'। यथाह श्रुतिः— 'प्राणः पयः शीर्षंस्तत् प्राणं दधाति' (श० ब्रा० ६. ५. ४. १५)।

---

१. 'चक्षुषे त्वा' इतीक्षते। (का० श्रौ० सू० २. ५. ८)

२. पिष्यमाणेषु निर्वपत्यन्यो 'महीनाम्' इति। (का० श्रौ० सू० २. ५. ९)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सात्वतपक्षभाष्यम्

कंसे निहते पितरौ सान्त्वयित्वोग्रसेनं स्वमातामहं यदुराज्यसिंहासने समुपवेशयन् भगवान् श्रीकृष्णः समाचष्टे—धान्यमिति ।

मातामह ! परिणतबुद्धित्वात् सर्वेषां पूजनीयत्वाच्च त्वं 'धान्यं' लिङ्गमविवक्षितम्, धातुमर्हः 'असि' अतो नृपतिर्भूत्वा 'देवान्' देवतुल्यान् मया सार्धं भूभारावतारणाय ब्रह्मणो निर्देशेन यदुकुलेऽवतीर्णान् कंसभयात् पलायितान् मदाह्वानेन प्रत्यागतान् 'धिनुहि' स्वस्नेह-परिपूर्णव्यवहारादिना प्रीणय । अपि च सर्वासां प्रजानां 'प्राणाय' प्रकृष्टजीवनहेतुबल-सम्पादनाय 'त्वा' त्वाम् 'उदानाय' उन्नमनाय समुन्नतिशिखरे स्थापनाय 'व्यानाय' व्याप्य-जीवनाय, सर्वत्र निःशङ्कप्रसरणाय, समस्तसद्गुणादिव्याप्तजीवनाय, विशिष्टजीवनाय वा 'दीर्घां' विस्तृतां 'प्रसितिं' बन्धनस्थानततिम् 'अनु' अनुलक्ष्य, आलोच्य, विचार्य यथा प्रजाजना बद्धा माभूवन् तथा 'आयुषे' भोगासक्तिं परित्यज्य मुक्तिसाधनानुष्ठानप्रधानाय जीवनाय, अकालमरणादिवर्जिताय दीर्घजीवनाय च 'त्वा' त्वां राजानं, 'धाम्' दधामि, दधातेर्लडर्थे लुङ् । 'छन्दस्यमाङ्योगेऽपि' इति सूत्रेण अडागमाभावः । यथा च त्वद्राज्ये लोका बलिन उन्नताः सर्वसद्गुणसमलङ्कृता भोगानासक्ता मुमुक्षवश्च स्युस्तथा त्वया राज्ञा सता प्रयतितव्यं, येन पूर्वं त्वत्सुतात्याचारकलापपीडिताः प्रजाजना मोदमानाः सम्प्रति स्वे स्वे धर्मे निरताः सानन्दं दीर्घकालं त्वां राजानमासाद्य जीवेयुरिति भावः । 'देवः' द्योतमानः सर्वैश्वर्यप्रदाता वा 'सविता' जगदुत्पादकः परमात्मा 'हिरण्यपाणिः' 'हिरण्यम्' अमृतं 'पाणौ' हस्ते यस्य तथाविधः संसार-बन्धनान्मोचयिता 'वः' युष्मान्, प्रजासहितान् भवतः 'प्रतिगृभ्णातु' स्वीकरोतु, स्वचरणैक-शरणान् विदधातु, स्वपादद्वन्द्वानुरागं प्रयच्छतु । प्रजासाहित्याभिप्रायेण 'वः' इति बहुवचनम् । केवलाभिप्रायेण श्रीकृष्णः प्राह— अच्छिद्रेण निरन्तरेण दोषवर्जितेन 'पाणिना' व्यवहारेण शासनादिना 'चक्षुषे' चक्षुर्वद्दर्शनाय प्रजासु कः कीदृशः इति निरीक्षणाय, निरीक्ष्य कुपथेन चरतः प्राणिनः सन्मार्गे नेतुमिति भावः । 'त्वा' त्वां धामिति पूर्वेण सम्बन्धः । अपि च 'महीनां' वाचाम्, महीशब्दो वाङ्नामसु पठितः (निघ० १. ११. ४७) 'पयः' घृतं पयःसमुद्भूतत्वात्, कारणस्य कार्येऽत्र लक्षणा । 'असि' वर्तसे । अपि वा 'महीनां पृथिवीवासिनामित्यर्थः आधारस्य आधेये लक्षणया । महीशब्दः पृथिवीनामसु पठितः (निघ० १. १. १४) । तथा च यथा घृतसेवनेन वाग् वर्धते, यथा वा पृथिवीवासिनो जनाः घृतपक्वभोजनादिना प्रसीदन्ति, तथा त्वां राजानमासाद्य जना वर्धेरन् प्रसीदेयुश्च, त्वं निजप्रजां वर्धय प्रसादय चेत्यर्थः । अथवा पयःशब्दो जलार्थकः, तस्योदकनामसु पाठात् (निघ० १. ११. ३७) तथा च यथा पिपासवो जना जलपानेन तृप्यन्ति हृष्यन्ति च तथा त्वामासाद्य जनाः तृप्येयुर्हृष्येयुश्च, त्वं जनान् तर्पय हर्षय चेति भावः । निरूपितञ्चेवं भागवते (१०. ४५. १२-१६) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८. श्रपणानुवाकः

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । संवपामि समाप ओषधीभिः समोषधयो रसेन । सँ रेवतीर्जगतीभिः पृच्यन्ताँ सं मधुमती-र्मधुमतीभिः पृच्यन्ताम् ॥ २१ ॥

१. पात्र्यां पिष्टावपनम्, २. उपसर्जनीनामपां पिष्टेषु मिश्रणम् ।

देवयाजिपक्षभाष्यम्

अस्यामेकविंश्यां कण्डिकायां द्वौ मन्त्रौ । 'देवस्य त्वा'[1] इति सपवित्रपात्र्यां पिष्टावपनार्थः प्रथमः । अस्य प्राजापत्या बृहती छन्दः, हविर्देवता । 'समाप' इत्यादिरुपसर्जन्यानयने, पवित्राभ्यामुपसर्जनीग्रहणे च विनियुक्तः । अस्य याजुषं छन्दः, आपो देवताः । उभयोः परमेष्ठी प्राजापत्य ऋषिरुक्तः (श० ब्रा० १. २. २. १-२, का० श्रौ० २. ५. १०-१३) ।

प्रोक्षणीतः पवित्रे आदायाध्वर्युरिडापात्र्यां च निधाय तयोरुपरि कृष्णाजिनस्थानि पिष्टानि कृष्णाजिनेनैव पातयितुमाह—'देवस्य त्वा' इत्यादि ।[2] तद् दशम्यां कण्डिकायां व्याख्यातम् । उक्तमन्त्रं पठित्वा 'संवपामि' इत्युक्त्वा तानि पिष्टानि सपवित्रायां पात्र्यामावपति । पिष्टान्योप्य अद्भिरुपसर्जनीभिस्तानि सम्मिश्रयितुमाग्नीध्रस्तप्ता अप उद्वास्य आनयति ।[3] उपसृज्यते सम्पृच्यते पिष्टहविराभिस्तासूपसर्जनीष्वप्सु पवित्राभ्यां हविर्मिश्रयन्नध्वर्युः पठति—समाप इति ।[4] 'आपः' इमा उपसर्जन्याख्या आपः 'ओषधीभिः' पिष्टरूपाभिः 'संपृच्यन्ताम्' सङ्गच्छन्ताम्, एकीभवन्त्विति भावः । 'पृची सम्पर्के' (रु० प० १४६३), कर्मणि 'सार्वधातुके यक्' (पा० ३. १. ६७) । 'ओषधयः' पिष्टाख्याः 'रसेन' उपसर्जनीरूपेण 'संपृच्यन्ताम्' । 'रेवतीः' रेवत्य आपः 'जगतीभिः' ओषधिभिः 'रेवत्य आपो जगत्य ओषधयः' (श० ब्रा० १. २. २. २) । 'संपृच्यन्ताम्' । 'मधुमतीः' मधुमत्यः मधुरा आपः 'मधुमतीभिः' मधुराभिरेव पिष्टौषधीभिः 'संपृच्यन्ताम्' । समानशीलव्यसनेषु सख्यमिति ।

---

१. इममेकं मन्त्रं ज्वालाप्रसादमिश्रभार्गवौ 'संवपामि' इत्येकं पृथङ्मन्त्रं मन्वानौ द्वौ मन्त्रौ पठतः ।

२. पात्र्यां सपवित्रायां पिष्टान्यावपति 'देवस्य त्वा' इति । (का० श्रौ० सू० २. ५. १०)

३. 'उपसर्जनीरानयत्यन्यः' । (का० श्रौ० सू० २. ५. १२)

४. पवित्राभ्यां प्रतिगृह्णाति 'समाप' इति । (का० श्रौ० सू० २. ५. १३)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मयाजिपक्षभाष्यम्

हे इन्द्रियसमूह ! 'सवितुः' गुरोः 'देवस्य' 'प्रसवे' 'अश्विनोः' प्राणोदानयोः 'बाहुभ्यां' 'पूष्णः' मनसः 'हस्ताभ्यां' 'त्वा' त्वां 'संवपामि' मानसकमले सम्यक् क्षिपामि। 'आपः' जीवामृतम्, 'अमृतं वा आपः' (श० ब्रा० ४. ४. ३. १५)। 'जीवं वै देवानां हविरमृतममृतानाम्' (श० ब्रा० १. २. १. २०)। 'ओषधीभिः' इन्द्रियशक्तिभिः। यथाह श्रुतिः—'ओषधयो वै देवानां पत्न्यः' (श० ब्रा० ६. ५. ४. ४)। 'संपृच्यन्ताम्' सम्यक् संगच्छन्ताम्, सम्यगेकीभवन्तु। 'ओषधयः' इन्द्रियशक्तयः, 'रसेन' आत्मना, यथा श्रुतिः—'आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्' (तै० आ० १०. २७. १), 'रसो वा आपः' (श० ब्रा० ३. ३. ३. १८), 'सं' संपृच्यन्ताम् 'रेवतीः' रेवत्यः वाचः, छान्दसो विभक्तिव्यत्ययः। 'वाग् वै रेवती' (श० ब्रा० ३. ८. १. १२) 'जगतीभिः' इन्द्रियशक्तिभिः संपृच्यन्ताम्। 'मधुमतीः' पुराणादिज्ञानवत्यश्चेन्द्रियशक्तयः। यथाह श्रुतिः—'मध्वाहुतयो ह वा एता देवानां यदनुशासनानि विद्या वाकोवाक्यम् इतिहासपुराणं गाथा नाराशंस्यः' (श० ब्रा० ११. ५. ६. ८) 'मधुमतीभिः' ऋग्वतीभिर्वाग्भिः, यथाह श्रुतिः—'मधु ह वा ऋचः' (श० ब्रा० ११. ५. ७. ५), 'संपृच्यन्ताम्'।

सात्वतपक्षभाष्यम्

आनर्त्ताधिपती रैवतः रामाय स्वकन्यां रेवतीं दातुकामो राजानमुग्रसेनं वसुदेवं वाभ्यर्थयते—देवस्य त्वेति। मित्र उग्रसेन ! राजन् वसुदेव ! वा 'त्वा' त्वां तुभ्यं,त्वदीयाय,तव दौहित्राय पुत्राय वा बलरामायाहं चिरात् प्रतीक्षमाणां स्वसुतां ब्रह्मणो निदेशात् 'सं' सम्यक् 'वपामि' क्षेत्रे बीजमिव यदुकुले प्रशस्ते स्थापयामि, ददामि। रेवतीं स्वात्मजां बलरामाय दित्सुः कारणमाह—'देवस्य' द्योतमानस्य राज्ञः, वसुदेवस्य वा 'सवितुः' प्रजानां स्वे स्वे धर्मे प्रेरकस्य प्रवर्त्तकस्योत्पादकस्य पितुर्वा तव 'प्रसवे' शासने आदेशे वा। तं (प्रसवं) विशिनष्टि 'अश्विनोः' स्वप्रतापेन कीर्त्या च विश्वं व्याप्नुवतोः सूर्यचन्द्रसमयोः श्रीकृष्णबलरामयोः 'बाहुभ्यां' भुजबलेन रक्षिते इति शेषः। 'पूष्णः' पोषकस्य सत्परामर्शप्रदानेन राज्यं वर्धयत उद्धवस्य अक्रूरस्य वा मन्त्रिणः, स्वभ्रातुर्बलरामस्य वा 'हस्ताभ्यां' संचालिते, तथा च सुव्यवस्थितप्रजापालनावलोकनेन प्रसन्नचेताः, तव दौहित्राय पुत्राय वा बलरामाय स्वसुतां वितरामीति भावः। तत्प्रस्तावेऽङ्गीकृते उभयवंशवयोवृद्धा भूदेवाश्च आशासते—समाप इति।

आपो जलानि (निघ० १. १२. ८१)। 'ओषधीभिः' रोगपीडानिवर्तकैश्चिकित्साशास्त्रोपदिष्टनानाविधौषधिविशेषैः यथा 'पृच्यन्ते' सम्मेल्यन्ते यथा वा 'ओषधयः' 'रसेन' मधुरादिषड्विधेन 'सं' सम्पृक्ताः भवन्ति। तथा 'रेवतीः' विभक्तिवचने अविवक्षिते। राजकुमारीत्वादादरार्थं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुत्वं वा 'रेवती' तन्नाम्नी कन्येयमुद्वाह्यमाना 'जगतीभिः' 'जगद्' विश्वं तद् विद्यते धार्यत्वेन यस्य सः 'जगती' छान्दसत्वादिनि दीर्घः, जगदधिपतिः शेषावतारो रामस्तेन। बहुत्वं पूर्ववद-विवक्षितम्। जगच्छब्दात् ई प्रत्ययः 'छन्दसीवनिपौ च वक्तव्यौ' (पा० ५. २. १२२) इति वार्तिकेन। अपि वा कुटिलं गच्छति जङ्गमीतीति जगती सर्पः 'नित्यं कौटिल्ये गतौ' (पा० ३. १. २३) इति सूत्रेण यङि तस्य लुकि, कर्त्तरि क्तिचि छान्दसत्वात् 'नुगतोऽनुनासिकान्तस्य' (पा० ७. ४. ८५) इति सूत्रेण विहितस्य नुगागमस्याभावे 'अनुनासिकस्य क्विझलोः' इति मकारस्य लोपे तत ईप्रत्यये जगती सर्पराजः शेषस्तदवतारो बलरामस्तेन, बहुत्वं पूर्ववद-विवक्षितम्। 'सम्पृच्यन्ताम्' बहुत्वाविवक्षया सम्पृच्यतां सम्पृक्ता भवतु, नित्यं सम्बद्धा बहु-कालं दाम्पत्यसुखमनुभवतु। 'मधुमतीः' विभक्तिवचनाविवक्षया 'मधुमती' मधुरस्वभावा रेवती 'मधुमतीभिः' भाविदेवरपत्नीभिर्मधुरस्वभावाभिः पृच्यताम्। सर्वा अपि यदुकुमारदेव्यो मिथः सङ्गतिसुखं मधुरस्वभावविलसितमास्वादयन्त्विति भावः। रेवतीबलरामवृत्तान्तो भागवते (१०. ५२. १५) अवसेयः।

दार्शनिकास्तु 'आप कर्माणि' (निघ० २. १. १) दैर्घ्यमार्षम्, 'ओषधीभिः' 'ओषः' मनस्तापः, 'उष दाहे' (भ्वा० प० ६९६) भावे घञ्, तं धयन्ति पिबन्तीति 'धेट् पाने' (भ्वा० प० ९०२) पानं चेह नाशनं, तैः मनस्तापविनाशकैरात्मदर्शनैः। बहुत्वेन अविच्छिन्ना ज्ञान-धारा ध्वनिता। ज्ञानमेव सविलासाविद्यानिवर्तकत्वात् सर्वतापनिवारकम्। 'ओषधयः' ज्ञानानि 'रसेन' शब्देन स्तुत्या 'रस शब्दे' (भ्वा० प० ७१३)। रसेन स्नेहातिरेकेण भगवदनुरागेण भक्त्या वा, 'रस आस्वादनस्नेहनयोः' (चु० प० १९३२) रसनं रसो भगवद्-दिव्यरसास्वादनं भगवत्स्नेहो वा।

महत्त्वज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्ता तया मुक्तिर्न चान्यथा॥

इति भक्तिरहस्यविदां वचः। तथा च ज्ञानभक्तिसमुच्चयः फलति। 'रेवतीः' रेवत्यः त्वरित-गतयः। 'रेवृ प्लवगतौ' (भ्वा० आ० ५०७) विद्वत्पङ्क्तयः 'जगतीभिः' मन्दगतिभिः शनैर्गमनाभिः साधकप्रजाभिः 'सं पृच्यन्ताम्' सम्पृक्ता भवन्तु। विशिष्टसाधकाः साधारण-साधकैः सम्पर्कमासाद्य तान् प्रोत्साहयन्तु। विशिष्टैः साधारणजना नोपेक्षणीया इति भावः। 'मधुमत्यः' भक्ताः प्रजाः 'मधुमतीभिः' अन्याभिर्भगवद्भक्ताभिः समं संपृच्यन्ताम्। किं बहुना, सर्वेऽपि भवद्भक्ताः, मधुररसाप्लावितायां भगवत्क्रीडनवृन्दावनादिभूमौ सम्भूय मिथः सङ्गति-सुखमनुभवन्त्विति भावः। अस्यां कण्डिकायां कर्मज्ञानसमुच्चयो भक्तिज्ञानसमुच्चयश्च स्पष्टमुपदिष्टः। वृत्तिकारा भर्तृप्रपञ्चप्रभृतयः समसमुच्चयं ज्ञानकर्मणोरभ्युपगच्छन्ति। श्रीशङ्कराचार्यपादपद्मो-पजीविनस्तयोर्विषमसमुच्चयमभ्युपयन्तः समसमुच्चयं महता प्रयासेन निराचक्षाणा अपि कर्मो-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पासनासमुच्चयमातिष्ठन्ते। तन्नये तावदोषधिपदेन मनस्तापनिवारिकोपासनैव भक्त्यपरनामधेया ग्राह्या। आचार्यश्रीश्रीचन्द्रचरणचञ्चरीका ज्ञानभक्तिसमुच्चयं मुक्तकण्ठं सत्तर्कशतोपन्यासेन समर्थयन्ते। युक्तञ्चैतत् श्रुति-गीता-भागवत-पञ्चरात्रादिवाक्यशतेभ्यः। तथा हि अवगते द्वे बन्धने अविद्या माया च। तत्र जैवं निजव्यष्टिवन्धनमविद्या। दैवी माया समष्टिबन्धनम्। क्रमेण बन्धनद्वयनिवृत्तये ज्ञानस्य भक्तेश्चावश्याङ्गीकरणीयत्वात्। विस्तरस्तु गुरुगङ्गेश्वर-ग्रन्थमालायाः प्रथमपुष्पे 'वेदसुताया गीताया भक्तिज्ञानसमुच्चये तात्पर्यम्' इति शीर्षकवति लेखे द्रष्टव्यः।

अत्र देवराजो यास्कश्च क्रमेण 'अपः' शब्दं 'ओषधी' शब्दञ्च व्याख्यातवन्तौ। अपः 'आप्लृ व्याप्तौ' (स्वा० उ० १२६१), 'आपः कर्माख्यायाम्' (उ० सू० ६५७) इति सूत्रेण ह्रस्वः असुन् प्रत्ययश्च। आप्नुवन्ति हि तत्कर्तारम्, आप्नोति वा तान् फलरूपेणेति। 'ओषधयः ओषद् धयन्तीति वा, ओषत्येनां धयन्तीति वा दोषं धयन्तीति वा' (निरु० ९. २७)।

जनयत्यै त्वा संयौमीदमग्नेरिदमग्नीषोमयोरिषे त्वा घर्मोऽसि विश्वायुरुरु-प्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथतामग्निष्टे त्वचं मा हिँसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥ २२ ॥

१. पिष्टानां संयवनम्, २-३. पिण्डद्वयं कृत्वा तयोरालम्भनम्, ४. आज्याधिश्रयणम्, ५. पुरोडाशाधिश्रयणम्, ६. पुरोडाशपृथूकरणम्, ७. पुरोडाशयोरद्भिः संमर्शनम्, ८. पुरोडाश-श्रपणम्।

देवयाजिपक्षभाष्यम्

अस्यां द्वाविंश्यां कण्डिकायामष्ट मन्त्राः। 'जनयत्यै' इत्यादिः प्रथमोऽपां पिष्टानां च सम्मिश्रणार्थः। तस्य प्राजापत्या गायत्री छन्दः, हविर्देवता। 'इदम् अग्नेः', 'इदम् अग्नीषोमयोः' इति द्वौ मन्त्रौ पिण्डद्वयं कृत्वा तयोरालम्भने विनियुक्तौ। तत्र प्रथमस्य दैवी बृहती छन्दः, अपरस्य दैवी जगती छन्दः, उभयोर्हविर्देवता। 'इषे त्वा' इति चतुर्थो मन्त्र आज्याधि-श्रयणार्थः। अस्य दैव्यनुष्टुप् छन्दः, आज्यं देवता। 'घर्मोऽसि' इति पुरोडाशाधिश्रयणः। अस्य याजुषी गायत्री छन्दः, पुरोडाशो देवता। 'उरुप्रथाः' इति पुरोडाशस्य पृथूकरणे विनियुक्तः। अस्यार्षी गायत्री छन्दः, पुरोडाशो देवता। 'अग्निष्टे' इति पुरोडाशयोरद्भिः सम्मर्शने विनि-युक्तः। अस्य प्राजापत्या गायत्री छन्दः, पुरोडाशो देवता। 'देवस्त्वा' इति पुरोडाश-श्रपणार्थोऽष्टमः। अस्य प्राजापत्यानुष्टुप् छन्दः, पुरोडाशो देवता। समानः परमेष्ठी प्राजापत्य ऋषिरुक्तः समेषाम् (श० ब्रा० १. २. २. ३-१४; का० श्रौ० २. ५. १४-२१)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पिष्टान्यद्भिः संयौति—जनयत्यै इति ।[1] 'जनयत्यै' यजमानस्य प्रजाद्युत्पादनार्थं हे पिष्ट ! 'त्वा' त्वां 'संयौमि' अद्भिर्मिश्रयामि, 'यु मिश्रणे' (अ० प० १०३३) जलपिष्टयोः सम्मिश्रणं यथाऽव्यवच्छेद्यं शाश्वतं च, तथा शुक्रशोणितसम्बन्धेन यजमानसन्ततिरप्यव्यवच्छिन्ना शाश्वती वर्धतामिति संयवनेनाशास्ते । अथवा पुरोडाशोत्पादनाय त्वा संयौमीत्यन्वयः । ततः संयुतस्य पिष्टस्य पिण्डद्वयं कृत्वा परस्परमुभावसंहरिष्यन् (असम्मेलयिष्यन्) 'इदमग्नेः' इत्युक्त्वाग्निदेवत्यं पिण्डम्, 'इदमग्नीषोमयोः' इत्युक्त्वा चापरं पिण्डमालभतेऽग्नीषोमदेवत्यम् (अनेनाग्नेयेनाग्नीषोमदेवत्येन च पुरोडाशेनास्य प्रधानयागसम्बन्धित्वं सूचितम्)। हे आज्य ! 'इषे' इष्यमाणवृष्टये क्षीरादिरसावाप्तेस्तन्मूलत्वात् 'त्वा' त्वामधिश्रयामि[3] प्रविलापनार्थमग्नौ स्थापयामीति शेषः । ततः पुरोडाशमधिश्रयति— घर्मोऽसि इति ।[4] हे पुरोडाश ! त्वं 'घर्मः' अग्नौ श्रप्यमाणो दीप्तत्वात् प्रवर्ग्यरूपः 'असि' । 'विश्वायुः' विश्वं सर्वम् आयुर्यस्मात् स विश्वायुष्यप्रदः । अथ रक्षितेषु सर्वेषु कपालेषु संश्लेषयितुं तं पुरोडाशं प्रथयति— 'उरुप्रथाः' इति ।[5] उरु विस्तीर्णं प्रथः प्रथनं प्रख्यानं यस्य तथाभूतः । 'प्रथ प्रख्याने' (भ्वा० आ० ७६५) भावे घञ् प्रत्ययः, बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः । 'उरु' विस्तीर्णोऽनेककपालेषु यथा भवसि तथा 'प्रथस्व' अनेन च तव प्रथनेन 'ते यज्ञपतिः' तव यजमानोऽपि 'उरु' पुत्रपौत्रादिभिर्विस्तीर्णो यथा भवति तथा 'प्रथताम्' प्रख्यायताम् । अथाग्नेयमग्नीषोमीयं च पुरोडाशपिण्डमद्भिः सम्मृशति—अग्निष्ट इति ।[6] हे पुरोडाश ! 'अग्निः' श्रपणव्यापृतोऽग्निः 'ते' तव 'त्वचं' त्वक्समानमुपरितनमंशं 'मा हिंसीत्' न नाशयतु । अवघातपेषणश्रपणादिसम्भवः पुरोडाशविकारोऽपां सम्मर्शनेन शाम्यत्वित्याशंसति । ततः पुरोडाशं श्रपयति, तस्योपरि अग्निं निधत्ते—'देवस्त्वा'[7] इति । हे पुरोडाश ! 'त्वा' त्वां 'देवः सविता' दीप्यमानः सूर्यः 'वर्षिष्ठे' अत्युत्कृष्टे 'नाके' द्युलोकस्थानीयेऽग्नौ 'अधि' उपरि स्थितं 'श्रपयतु' पाचयतु । मनुष्यस्य श्रपणकर्तृत्वं मा भूदिति 'देवस्त्वा' इत्युक्तम् । 'स नाको नाम दिवि रक्षोहाग्निः' (मै० ४. १. ६; काठ० ३१. ७) इति मैत्रायणिकाठकश्रुतिभ्यां 'दिवि नाको नामाग्निः' (तै० ब्रा० ३. २. ३. ५) इति तित्तिरिवचनाच्चेह नाको नाम दिव्योऽग्निरभिमत इति ।

१. संयौति 'जनयत्यै त्वा' इति । (का० श्रौ० सू० २. ५. १४)
२. समं विभज्यासंहरिष्यन्नालभते 'इदमग्नेः' 'इदमग्नीषोमयोः' इति । (का० श्रौ० सू० २. ५. १५)
३. 'इषे त्वा' इत्याज्यमधिश्रयत्यन्यः । (का० श्रौ० सू० २. ५. १७)
४. 'घर्मोऽसि' इति पुरोडाशौ युगपत् । (का० श्रौ० सू० २. ५. १९)
५. 'उरुप्रथाः' इति प्रथयति यावत्कपालमनतिपृथुम् । (का० श्रौ० सू० २. ५. २०)
६. 'अग्निष्टे' इत्यद्भिरभिमृशति सकृत् त्रिर्वा । (का० श्रौ० सू० २. ५. २१)
७. 'देवस्त्वा' इति श्रपणम् । (का० श्रौ० सू० २. ५. २३)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मयाजिपक्षभाष्यम्

हे इन्द्रियसहित जीवात्मन् ! 'त्वा' त्वां 'जनयत्यै' ज्ञानस्य मोक्षस्य चाप्त्यै 'संयौमि' सम्यग् मिश्रीकरोमि। 'इदम्' 'अग्नेः' ब्रह्मणः, 'ब्रह्म वा अग्निः' (श० ब्रा० ५. ३. ५. ३२), 'इदम् अग्नीषोमयोः' प्रकृतिपुरुषयोः, हे इन्द्रियसमूह ! 'इषे' अमृतवृष्ट्यै 'त्वा' त्वां प्रविलापनार्थं मानससूर्ये स्थापयामि, हे जीवात्मन् ! त्वं 'घर्मः' मानससूर्यः, यथाह श्रुतिः— 'असौ वा आदित्यो घर्मः' (श० ब्रा० ६. ४. २. १६)। 'विश्वायुः' सर्वस्यायुः 'उरुप्रथाः' उरु विस्तीर्णं प्रथते प्रसरतीति देहव्यापनशीलः 'असि'। 'उरु प्रथस्व' ब्रह्माण्डभावं प्राप्नुहि। 'ते' 'यज्ञपतिः' आत्मा, 'आत्मा वै यज्ञस्य यजमानः' (श० ब्रा० ६. ५. २. १६)। 'उरु प्रथताम्' ब्रह्मभावं लभताम्। हे जीवात्मन् ! 'अग्निः' ब्रह्म 'ते' 'त्वचम्' आवरणकारणं देहं 'त्वच संवरणे'। 'मा हिंसीत्' आ प्रारब्धभोगसमाप्तेः मा विनाशयतु। हे जीवात्मन् ! 'सविता' मनः, 'मनो ह वा अस्य सविता' (श० ब्रा० ४. ४. १. १.), 'देवः' इन्द्रियाधीशः 'त्वा' त्वां 'वर्षिष्ठे' अत्यन्तवृद्धे 'नाके' दुःखरहिते आनन्दस्वरूपे ब्रह्माग्नौ 'अधिश्रपयतु' पक्वं होमयोग्यं करोतु।

सात्वतपक्षभाष्यम्

रेवतीबलरामयोरुद्वाहसंस्कारे सम्पद्यमाने तस्य कारयिता पुरोहित उपदिशति— जनयत्वै त्वेति। 'जनयत्यै' सन्तत्युत्पादनाय प्रजातन्तोरविच्छेदाय यथापूर्वं वंशवर्धनाय 'त्वा' त्वां बलरामम्, अनया रेवत्या 'संयौमि' संयोजयामि, त्वयास्याः पाणिं ग्राहयामि। तात ! बलराम ! वंशविस्तारस्तवोद्वाहस्य प्रयोजनम्, न तु यथेष्टकामविषयोपभोगः। उद्वाहस्य त्रीणि प्रयोजनानि—वंशविस्तारः, समुपजातयौवनयोः स्त्रीपुंसयोः क्रमेण पुरुषान्तरात् स्त्र्यन्तराच्च मनसो निवारणम्, प्रतिमायां भगवतो ध्यानेनेव अन्योन्यशरीरे तदनुप्रविष्टभगवद्भावनया शान्ते चेतसि भगवत्प्राप्तिश्चेति। भो वर ! 'इदं' कन्यारत्नम् 'अग्नेः' तेजस्विनस्तव धनम्, 'इदं' वधूवराभ्यामुपह्रियमाणं वस्त्राभरणादि 'अग्नीषोमयोः' वधूवररूपयोः, वरोऽग्निर्वीरत्वाद्, वधूः सोमः सोमवत् सौन्दर्यादिगुणातिरेकेण प्रेमास्पदत्वात्। नारी हि सोमधर्मेण शान्तत्वेन चेतोहरत्वेन च प्रख्याता।

अयं भावः—अस्मिन् वस्त्राभरणादौ किञ्चिद् वस्त्रमाभरणं वा पुरुषेण परिधातुं योग्यं, किञ्चित् पुनस्तन्नार्या परिधेयम्। अतस्तत्र द्वयोः स्वामित्वमिति। भो वर ! 'इषे' इष्टं लब्धुं, तुमर्थयोगे चतुर्थी। त्वत्समीहितं भुक्तिमुक्तिद्वयं साधयितुं 'त्वा' त्वां संयौमीत्यनुवर्तते।

वरं विशिनष्टि 'घर्मः' दीप्तिमान् रेतस्सेक्ता च, सन्तानोत्पादनक्षमः। 'घृ क्षरणदीप्त्योः' (जु० प० १०९६), 'असि' वर्तसे। अपि वा घर्मो यज्ञात्मा यज्ञनिष्पादकत्वात्। 'घर्म इति यज्ञनाम' (निघ० ३. १७. १५) 'विश्वायुः' धर्मानुष्ठानादपमृत्युनिवारणेन कृत्स्नायुःशतवर्ष-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीवी, ततोऽपि दीर्घजीवी वा 'उरुप्रथाः' उर्वी महती विशिष्टा प्रथा प्रख्यातिर्यस्य तथाभूतः, महाकीर्तिरित्यर्थः।

आशीराशीं प्रयच्छयति 'उरु' महत् यथा स्यात्तथा 'प्रथस्व' विस्तारयस्व सर्वं सुखोपकरणम्। रेवतीं सम्बोधयन्नाचष्टे—हे रेवति! 'ते' तव 'यज्ञपतिः' विवाहयज्ञेन लब्धो भर्ता 'उरु' बहु, अतिशयेन 'प्रथताम्' धनपुत्रराज्यादिना लब्धविस्तारो भूयात्, त्वं चापीति शेषः। 'अग्निः' तद्वत् तेजस्वी वरः 'ते' तव कन्यायाः, 'त्वचं' तदुपलक्षितं किमपि शरीराङ्गं 'मा हिंसीत्' न पीडयेत्। सानुरागं सदा त्वां पश्येत्। कदापि त्वयि कोपं न कुर्यादित्यर्थः। 'सविता' जगन्नियन्ता जगदुत्पादको 'देवः' द्योतनदानादिदिव्यगुणयुक्तः परमात्मा 'त्वा' त्वां त्वदीयं भर्तारञ्च 'वर्षिष्ठे' वृद्धतमे सर्वश्रेष्ठे 'नाके' अकं दुःखं तद्वर्जितप्रदेशे 'अधि' आधिपत्येन 'श्रपयतु' परिपाचयतु, परिपक्वं करोतु, सर्वश्रेष्ठस्वर्गाधिपतिपदे युवयोः स्थिरां नियुक्तिं कुर्यात्। युवां दम्पती दीर्घकालं स्वर्गसुखमनुभवतामिति भावः।

मा भेर्मा संविक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात्।
त्रिताय त्वा द्विताय त्वैकताय त्वा॥ २३॥

१. पुरोडाशालम्भनम्, २. भस्माच्छादनम्, ३-५. पात्र्यङ्गुलिप्रक्षालनजलस्याप्त्येभ्यो निनयनम्।

देवयाजिपक्षभाष्यम्

अस्यां त्रयोविंश्यां कण्डिकायां पञ्च मन्त्राः। 'मा भेः' इति शृताशृतज्ञानार्थं पुरोडाशालम्भनः प्रथमः। अस्य याजुषी गायत्री छन्दः, पुरोडाशो देवता। 'अतमेरुः' इत्यादिः शृतयोः पुरोडाशयोः पुनः श्रपणार्थं भस्माच्छादनात्मको द्वितीयः। अस्यार्षी गायत्री छन्दः, पुरोडाशो देवता। 'त्रिताय त्वा' 'द्विताय त्वा' 'एकताय त्वा' इति त्रयो मन्त्रास्तृतीयचतुर्थपञ्चमाः पात्र्यङ्गुलिप्रक्षालनार्थाः, आप्त्येभ्यो निनयनार्थाश्च। तत्राद्ययोः क्रमशः त्रितः द्वितश्च देवते, दैवी बृहती छन्द उभयोस्तुल्यम्। 'एकताय' इत्यस्य दैवी पङ्क्तिश्छन्दः, एकतो देवता। परमेष्ठी प्राजापत्य ऋषिः सर्वेषां तुल्यः (श० ब्रा० १. २. २. १५-१८, का० श्रौ० २. ५. २४-२६)।

शृताशृतपरिज्ञानार्थं पुरोडाशमभिमृशति—मा भेरिति।[1] हे पुरोडाश! 'मा भेः' देवार्थं मम श्रपणमित्यहोभाग्यं मन्यमानोऽग्नेर्भयं मा मंस्थाः, 'ञिभी भये' (जु० प० १०८४) 'मा संविक्थाः' चाञ्चल्यं नामोद्वेगोऽपि ते न स्यात्। 'ओविजी भयचलनयोः' (तु० आ०

---

१. 'मा भेः' इत्यालभते। (का० श्रौ० सू० २. ५. २४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१४६०) उभयत्र लुङि च्लेर्लुकि अडागमः। अग्रिममन्त्रेण श्रृतं पुरोडाशं भस्मनाभिवासयति—'अतमेरुरिति'।[1] हे श्रृतपुरोडाश! अनेन भस्माच्छादनेन 'यज्ञः' यागहेतुर्यज्ञरूपो वा त्वम्, 'अतमेरुः' अग्लानः। 'तमु काङ्क्षायाम्' (दि० प० १२०२) वेदे ग्लानावर्थे प्रसिद्धः। ताम्यति ग्लायतीति कर्त्रर्थे औणादिक एरुः प्रत्ययः। तमेरुर्ग्लानः। न तमेरुरग्लानः। नञा तत्पुरुषः समासः पूर्वपदप्रकृतिस्वरश्च। भूया इति शेषः। अत एव 'अतमेरुः यजमानस्य प्रजा भूयात्' अतमेरुणा पुरोडाशेन यजमानस्य तत्प्रजायाश्च दुःखरहितत्वमाशास्यते। ततः पिष्टलिप्ताङ्गुलिप्रक्षालनजलं पात्रीस्थमेव गार्हपत्यादग्नेराहृतेनोल्मुकेन सन्ताप्य 'त्रितः' इत्यादित्रिभ्य आप्त्येभ्यो निनयति—त्रितायेत्यादि।[2] 'त्रिताय द्विताय एकताय' त्रिभ्य आप्त्येभ्यस्त्वा निनयामीति शेषः। अयमाप्त्यानामितिहासः—'चतुर्धा हि प्रागग्निरासीत्। यज्ञे होतृत्वेन वृतास्त्रयस्तु पलायन्त, चतुर्थश्च भयादप्सु निलिल्ये, देवा निलीनं तं विदित्वाऽद्भ्यो बलादानीतवन्तः। यूयं मम रक्षणेऽसमर्था अत एव निन्द्या इत्युक्त्वाग्निस्ता अपः प्रति निष्ठीवनं कृतवान्। निष्ठ्यूताभ्योऽद्भ्यो जाता इमे त्रय आप्त्या इन्द्रेण सह चेरुः। लोका इन्द्रेण हतं त्वाष्ट्रमाप्त्यैः सहचरैर्हत इत्यपावदन्। तदपवादनिवारणार्थं पात्रप्रक्षालनजलमेभ्यो निनयन्तीत्यर्थकशतपथश्रुतेः (श० ब्रा० १. २. ३. १-३) अवगन्तव्य इति।

अस्मिन्नष्टमे श्रपणानुवाके तिसृभिः कण्डिकाभिश्चतुर्दशभिर्मन्त्रैः (एकविंश्यां द्वौ, द्वाविंश्यां सप्त, त्रयोविंश्यां पञ्च) इमा निम्ननिर्दिष्टाः क्रियाः सङ्केतिताः—

१. पात्र्यां पिष्टावपनम्, २. उपसर्जनीभिरद्भिः पिष्टस्य मिश्रणम्, ३. पिष्टसंयवनम्, ४. पिण्डद्वयस्यालम्भनम्, ५. आज्याधिश्रयणम्, ६. पुरोडाशाधिश्रयणम्, ७. पुरोडाशपृथूकरणम्, ८. तयोरद्भिः सम्मर्शनम्, ९. पुरोडाशश्रपणम्, १०. पुरोडाशालम्भनम्, ११. भस्मनाच्छादनम्, १२-१४. पात्र्यङ्गुलिप्रक्षालनजलस्याप्त्येभ्यो निनयनम्। एवमष्टस्वनुवाकेषु त्रयोविंशत्यां कण्डिकासु समुदिता मन्त्रसंख्या चतुर्नवतिः (९४)।

आत्मयाजिपक्षभाष्यम्

हे भूतात्मन्! त्वं 'मा भेः' जीवात्मनो वियोगाद् भयं मा कुरु। 'मा संविक्थाः' चलनं कम्पनं मा कार्षीः। 'यज्ञः' यजमानः 'यजमानो यज्ञः' (श० ब्रा० १३. २. २. १), 'अतमेरुः' ज्ञानयज्ञे ग्लानिरहितः 'भूयात्' 'यजमानस्य' ज्ञानयज्ञनिष्ठस्य 'प्रजा' शमदमादिरूपा 'अतमेरुः' योगसाधने ग्लानिरहिता, भूयात्। हे भूतात्मन्! 'त्वा' त्वां 'त्रिताय' 'तम्' अमृतं,

१. 'अतमेरुः' इति शृतावभिवासयति भस्मना वेदेन उपवेषेण वा। (का० श्रौ० सू० २. ५. २५)

२. पात्र्यङ्गुलिप्रक्षालनमाप्त्येभ्यो निनयत्यभितप्य प्रत्यगसंस्यन्दमानं 'त्रिताय त्वा' इति प्रतिमन्त्रम्। (का० श्रौ० सू० २. ५. २६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्रयममृतं यस्य तस्मै 'अयं जीवो बन्धमोक्षावस्थायां सदैव लक्ष्मीनारायणयोर्दासः' इति निश्चयवते निनयामीति शेषः। 'त्वा' त्वां 'द्विताय' द्वयममृतं यस्य तस्मै, 'प्रकृतिपुरुषौ नित्यौ, जीवस्तयोः सायुज्यमेति' इति ज्ञानवते निनयामि। 'त्वा' त्वाम् 'एकताय' एकममृतं यस्य तस्मै 'अहं ब्रह्मास्मि' इति ज्ञाननिष्ठाय पुरुषाय निनयामि।

सात्वतपक्षभाष्यम्

रामोद्वाहानन्तरं लब्धरुक्मिणीसन्देशस्तेन सन्देशहरेण ब्राह्मणेन सह रथमारुह्य कुण्डिनपुरं समागतः सपदि ब्राह्मणमन्तःपुरे प्रेषयन् भूदेवमुखेन स्वसन्देशं स्वप्रियायै वदति भगवान्— मा भेरिति। प्रिये! अद्यावधि मम प्रियो नायातः, किमहं तस्मै न रोचे, तदनागमने कश्चिदन्यो वा हेतुः, परिणयसमारोहः सद्यो भविता, स्वात्मजस्नेहवशंवदस्तातः किमपि कर्तुं न क्षमते, वामो मे विधाता, पशुपतिरपि नानुकूलः, न जाने किं भवेत्? न पश्यामि समीहितसिद्धेः कमप्युपायमिति बहुविधसन्देहसन्दोहेन 'मा भेः' भीता न भव, अनागते भगवति तातः शिशुपालेन मम पाणिं ग्राहयिष्यतीति मत्वा 'मा संविक्थाः' 'ओविजी भयचलनयोः' (रु० उ० १४६१) उद्विग्ना, क्षुभिता, विचलिता न भवेरिति तं सन्देशं संश्राव्य भूदेवः स्वयमाशास्ते— 'यज्ञः' विवाहयज्ञः 'अतमेरुः' ग्लानिरहितो निर्विघ्नः सम्पद्येत 'तमु ग्लानौ' तस्मात् 'एरुः' औणादिकः प्रत्ययः। न केवलमेतावदेव 'यजमानस्य' त्वया समुद्वाह्ययज्ञमनुतिष्ठतः सङ्गच्छमानस्य वा भगवतस्त्वयि 'प्रजा' प्रद्युम्नादिसन्ततिरपि 'भूयात्' स्यात्। अर्थवशात् पाठक्रममनादृत्य व्याख्यायते 'एकताय' गुरुकुले स्वाध्यायकाले ब्रह्मचर्याश्रमे एकताय एकं स्त्रीपुत्रादिवर्जितं स्वात्मानं तनोतीति 'एकतः' ब्रह्मचारी भगवान् कृष्णः तस्मै। 'द्विताय' पश्चात् त्वत्पाणिग्रहणेन दम्पत्यात्मना द्वे रूपे तनोतीति 'द्वितः' तस्मै। नारी पुंसोऽर्धशरीरिणीति वेदवित्समयः।'त्रिताय' विवाहानन्तरं सन्तानोत्पादेन स्त्रीपुरुषसन्ततिरूपेण त्रीणि रूपाणि तनोतीति त्रितस्तस्मै। 'त्वा' त्वां संयौमीत्यनुवर्तते। त्वेत्यभ्यासः समादरसूचकः। अयं भावः—यः पूर्वमेकतो ब्रह्मचारी कृष्णस्तं त्वया सह विवाहेन द्वितं, सन्तत्युत्पादनेन त्रितञ्च विधातुं तेन सह त्वां युनज्मीति। एकादिपूर्वात्तनोतेर्डः, तुमर्थयोगाच्चतुर्थी। अत्रैकतमुद्दिश्य द्वितस्त्रितश्च विधेयः। अपि वा 'त्रिताय' त्रीन् जीवमीश्वरं प्रकृतिञ्च तनोति विस्तारयति सृष्टिकाले स त्रितः परमेश्वरस्तस्मै। ननु निर्विकारस्य परमेश्वरस्य विस्तारासम्भव इत्याशङ्क्य द्वितायेति, द्वौ प्रकृतिपुरुषौ तनोतीति द्वितस्तस्मै। ननु पुरुषो जीवात्माऽपि चितिशक्तित्वान्नित्यः 'नित्यो नित्यानाम्' इति श्रुतेः। 'अजो नित्यः शाश्वतोऽयं पुराणः' इति गीतास्मृतेश्च। तत्कथं तस्य तननमित्यत आह— एकतायेति। एकां सर्वकार्यलयाधारां प्रकृतिं तनोति फलोन्मुखादृष्टबलात् सर्गाकारेण परिणमयतीत्येकतः 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः'। तस्मै एकताय, तं परमात्मानं सेवितुं त्वां संयौमीति सम्बन्धः। अयमभिसन्धिः— द्वौ नित्यपदार्थौ प्रकृतिः पुरुषश्च। तत्र पुरुषः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कूटस्थनित्यः सर्वसङ्गवर्जितत्वात्, नासौ परिणामं लभते। प्रकृतेस्तु कार्यावस्थायां कार्याकारेण परिणामान्न कूटस्थनित्यत्वम्। अर्थात् प्रकृतिः स्वरूपेणाविनाशिन्यपि न परिणामविवर्जिता कार्यावस्थायां पूर्वावस्थां परित्यज्यावस्थान्तरस्वीकारादिति। कथा चैषा भागवते (१०. ५३. २८-३१) द्रष्टव्या।

मम सुहृद्वर्या इमां कण्डिकां गुरुशिष्योपदेशपरतया योजयन्ति। भो शिष्य! कस्यामपि सभायां कस्यचिदपि विदुषः पुरस्तात् समुपस्थितस्त्वं 'मा भेः' त्रस्तो न भव, 'मा संविक्थाः' अयं मत्तो गरीयानिति मत्वा विचलितो न स्याः। 'अतमेरुः' अग्लानः, ग्लानिवर्जितस्त्वं स्याः, यतस्त्वं 'यज्ञः' विद्वद्वरेण्यः पूज्योऽसि। किञ्च 'यजमानस्य' त्वां पूजयतो लोकस्य 'प्रजा' सन्ततिः 'अतमेरुः' ग्लानिशून्या 'भूयात्' अस्तु। तस्मात् त्रितादिरूपाय परमेश्वराय, तत्प्रसादार्थं, तुमर्थयोगे चतुर्थी, त्वां प्रेरयामीति।

९. वेद्याख्योऽनुवाकः

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददेऽध्वरकृतं देवेभ्य इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा द्विषतो वधः॥ २४॥

१. स्फ्यादानम्, २. स्फ्यालम्भनम्।

देवयाजिपक्षभाष्यम्

अस्यां चतुर्विंश्यां कण्डिकायां द्वौ मन्त्रौ।[१] 'देवस्य त्वा' इति स्फ्यादानः। अस्य प्राजापत्या बृहती छन्दः, सविता देवता। 'इन्द्रस्य' इति मन्त्रेण सतृणं स्फ्यं सव्ये कृत्वा दक्षिणेनालभ्य जपति। अस्य याजुषी पङ्क्तिश्छन्दः, स्फ्यो देवता। परमेष्ठी प्राजापत्य ऋषिः समानः (श० ब्रा० १. २. ४. ३-७, का० श्रौ० २. ६. ६)।

अपरेणाहवनीयं वेदिं कुर्वन् प्राक् तदुपकरणभूतं स्फ्यमादत्ते—देवस्येति।[२] खदिरकाष्ठनिर्मितो विकङ्कतकाष्ठनिर्मितो वा तीक्ष्णाग्रभागः खड्गाकृतिररत्निदीर्घश्चतुरङ्गुलविस्तारः खननसाधनं यज्ञायुधविशेषः स्फ्यः। 'देवस्य त्वा' इत्यादिर्मन्त्रांशो दशम्यां कण्डिकायां व्या-

---

१. 'आददे' इति पृथक् क्रियां मत्वा ज्वालाप्रसादभार्गवस्तु त्रीन् मन्त्रान् मेने।

२. 'देवस्य त्वा' इति स्फ्यमादाय। (का० श्रौ० सू० २. ६. ६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ख्यातः । 'आददे' गृह्णामि 'अध्वरकृतम्' वेदिखननादिना यज्ञसम्पादकं स्फ्यं 'देवेभ्यः' देवानामर्थाय । ततः सतृणं स्फ्यं सव्ये हस्ते कृत्वा दक्षिणेन हस्तेन तमुपस्पृशन् जपति—इन्द्रस्येति ।[१] हे स्फ्य ! त्वम् 'इन्द्रस्य दक्षिणो बाहुरसि' समानवीर्यत्वात् स्फ्ये इन्द्रस्य बाहुत्वमुपचर्यते । 'एष वै वीर्यवत्तमो य इन्द्रस्य बाहुर्दक्षिणः' (श० ब्रा० १. २. ४. ६) । कीदृशः स्फ्यः ? 'सहस्रभृष्टिः' । सहस्रं भृष्टयोऽश्रयो यस्य सः, अथवा भृष्टिर्भर्जनं पाकः, मारणमिति यावत्, सहस्रसंख्यकानामसुराणां भृष्टिर्विनाशो येन स सहस्रभृष्टिः 'शततेजाः' अनेकदीप्तिसम्पन्नः 'वायुः' वायुसदृशः, 'तिग्मतेजाः' प्रदीप्तज्वालस्तीक्ष्णधारो वा 'असि' । वायुर्यथा वह्निं प्रदीप्यानेकज्वालाभिस्तिग्मतेजा भासते एवं स्तम्बच्छेदनरूपेण कर्मणा स्फ्योऽपि निशितधारस्तिग्मतेजाः । पुनः कीदृशः ? 'द्विषतः' शत्रोः 'वधः' विघातरूपः 'असि' । 'हन हिंसागत्योः' (अ० प० १०१२) । अस्माद् 'हनश्च वधः' (३. ३. ७६) इति सूत्रेण भावेऽप् प्रत्ययो वधादेशश्च । 'उञ्छादीनां च' (पा० ६. १. १६०) सूत्रादन्तोदात्तत्वमिति ।

आत्मयाजिपक्षभाष्यम्

हे ज्ञानरूप वज्र ! 'वज्रो वै स्फ्यः' (श० ब्रा० ५. ४. ४. १५), 'सवितुः' प्रेरकस्य गुरोः 'देवस्य' 'प्रसवे' प्रेरणे सति 'देवेभ्यः' ब्रह्मनरनारायणेभ्यः 'अध्वरकृतम्' यज्ञकारकं 'त्वा' त्वाम् 'अश्विनोः' हार्दमानसाकाशयोः 'इमे ह वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदं सर्वमाश्नुवातां पुष्करस्रजावित्यग्निरेवास्यै पुष्करमादित्योऽमुष्यै' (श० ब्रा० ४. १. ५. १६), 'बाहुभ्याम्' ग्रहणशक्तिभ्यां 'पूष्णः' मनसः, 'अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यः' (श० ब्रा० १४. ४. ३. १९), 'हस्ताभ्याम्' ग्रहणशक्तिभ्याम् 'आददे' गृह्णामि । हे ज्ञानरूप वज्र ! त्वं यस्मात् 'सहस्रभृष्टिः' सहस् ज्योतिस्तद् राति ददाति सहस्रं ब्रह्म तेन भृष्टिः पाको यस्य स सहस्रभृष्टिः 'शततेजाः' शं ब्रह्म, तः पराशक्तिः, ब्रह्मणः शक्त्यास्तेजो यस्मिन् स शततेजाः 'वायुः' वः निवृत्तात्मा तस्य आयुः, अमरत्वकारणम् 'असि' । 'इन्द्रस्य' यजमानस्य 'इन्द्रो वै यजमानः' (श० ब्रा० ५. २. ५. ३) 'तिग्मतेजाः' तीक्ष्णतेजाः 'द्विषतो वधः' ज्ञानयज्ञद्वेषिणां कामादीनां हन्ता 'दक्षिणः' यजमानाभिप्रायानुवर्ती 'बाहुः' कार्यसाधकः 'असि' ।

सात्वतपक्षभाष्यम्

राजसूययागानुष्ठानं पृष्टः कृष्णः सुहृदं युधिष्ठिरमनुमन्यते—देवस्य त्वेति ।

'सवितुः' स्वर्गादिफलं सूते इति सविता धर्मस्तस्य 'देवस्य' धर्माख्यदेवविशेषस्य तदवतारस्य तव 'प्रसवे' शासने 'अश्विनोः' नकुलसहदेवयोः 'बाहुभ्यां' शत्रुबाधनसमर्थाभ्यां

१. सतृणं सव्ये कृत्वा दक्षिणेनालभ्य जपति 'इन्द्रस्य बाहुः' इति । (का० श्रौ० सू० २. ६. ६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रक्षिते, 'पूष्णः' शुद्धचा वृष्टचा च क्रमेण पोषकः पूषा वायुरिन्द्रश्च, अत्र भीमोऽर्जुनश्च, तस्य भीमस्यार्जुनस्य च 'हस्ताभ्यां' संचालिते, स्वानुजचतुष्टयसहकारेण सुव्यवस्थिते शासने सतीत्यर्थः। 'देवेभ्यः अध्वरकृतम्' देवप्रसादनार्थं राजसूयाख्यसोमयागविशेषानुष्ठातारं 'त्वा' त्वाम् 'आददे' अङ्गीकुर्वे, अनुमन्ये।

अयमभिसन्धिः—भवान् स्वभ्रातॄणां साहाय्येन राजसूययागं विधातुमर्हति। राजसूययागश्च धनसाध्यः, धनञ्च नान्तरेण दिग्विजयं, स च भवता सुशकः। भवदनुजा हि भीमादयः सर्वासां दिशां जित्वराः। अतोऽनायासेन सर्वान् राज्ञो विजित्य ते धनं प्रचुरं समानेष्यन्तीति, युधिष्ठिरोपकण्ठे समासीनं भीमं तदीयशौर्यवर्णनेन प्रोत्साहयति भगवान् कृष्णः—भीम! 'इन्द्रस्य' अर्जुनस्य तस्येन्द्रांशत्वात्, 'दक्षिणः' दक्षः, अनुकूलो वा 'बाहुः' भुजः 'असि' वर्त्तसे। अपि वा इन्द्रस्य नरेन्द्रस्य राज्ञो युधिष्ठिरस्य दक्षिणो बाहुरिति सम्बन्धः। एतेनान्येषां भ्रातॄणामपेक्षया भीमस्य वैशिष्टचं ध्वन्यते। न केवलं भ्रातॄनपितु सर्वान् योद्धॄनपेक्ष्य त्वमतिशूरः, वायोरवतारत्वेन बलातिरेकादित्याह—वायुरिति। भीम! त्वं 'वायुः' 'असि' वर्तसे वायुपुत्रत्वात्—'आत्मा वै पुत्रनामासि' इति मन्त्रवर्णात्।

ननु शीतोऽपि वायुः स च नोग्रः, शूरेण च तावदुग्रेण भवितव्यमित्याशङ्क्याह—'तिग्मतेजाः' इति। तिग्मं तीक्ष्णं तेजो यस्य तथाविधः ग्रीष्मकालिकललाटन्तपकरनिकरतापपरिप्लुतस्तीव्रोऽत्युष्णः। एतेन परोद्वेजकत्वं व्यज्यते। गूढाभिसन्धिमाविष्करोति—द्विषत इति। 'द्विषतः' अष्टादशकृत्वो यो मधुपुरीमाचक्राम न सकृत्। आक्राम्यतस्तस्य प्रजापीडनभयादेव मधुपुरीं परित्यज्य सपरिवारोऽहं द्वारिकामायातः। राजसूयसाधनधनावाप्तिहेतुदिग्विजयस्य प्रधानतमकण्टकोऽसौ जरासन्धः। अतो मम भवताञ्च प्रबलशत्रोस्तस्य 'वधः' निहन्ता 'हन्'-धातोर्बाहुलकादप् प्रत्ययः कर्त्तरि। प्रबलशत्रुः जरासन्धः भीमेनैव हन्तुं शक्यः, तस्मात् पाण्डुतनयानन्यान् परित्यज्य भीम एव प्रोत्साहनीयः। स्वबलप्रशंसनमेव शूराग्रणीपावकस्य प्रदीपनमिन्धनमिति भावः।

'दक्षिणो बाहुः' इति कथनेन त्वमर्जुनादपि शौर्येणाधिक इति सूचितम्। यो यस्य प्रधानकार्यकारी तं तस्य दक्षिणो बाहुरिति व्यपदिशन्ति लोकाः। अपि च 'सहस्रभृष्टिः' सहस्राणां बहूनामसंख्यानां सपत्नानां भृष्टिर्भर्जकः, 'शततेजाः' बहुतेजस्कः। शतसहस्रशब्दौ बहुनामसु पठितौ (निघ० ३. १. ९-१०)।

पृथिवि देवयजन्योषध्यास्ते मूलं मा हिँसिषं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याँ शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्॥ २५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१. स्फ्यप्रहरणम्, २. पुरीषादानम्, ३. वेदिप्रेक्षणम्, ४. मृत्प्रक्षेपणम् ।

देवयाजिपक्षभाष्यम्

अस्यां पञ्चविंश्यां कण्डिकायां चत्वारो मन्त्राः । 'पृथिवि' इति तृणेनान्तर्हितायां भूमौ स्फ्यप्रहरणार्थो मन्त्रः । अस्य याजुषी छन्दः, वेदिर्देवता । 'व्रजं गच्छ' इति पुरीषादानः । अस्य दैवी जगती छन्दः, पुरीषं देवता । 'वर्षतु' इति मन्त्रो वेदिप्रेक्षणः । अस्य दैवी पङ्क्तिश्छन्दः, वेदिर्देवता । 'बधान' इत्युत्करे मृत्प्रक्षेपणः । अस्य याजुषी छन्दः, सविता देवता । ऋषिः परमेष्ठी प्राजापत्यः समः (श० ब्रा० १. २. ४. १६; का० श्रौ० २. ६. ९-१२) ।

पुरीषं (वज्रप्रहारोत्पन्नां मृत्तिकां) प्राप्तुमात्तं स्फ्यं (वज्रं) तृणान्तर्हितायां पृथिव्यां प्रहरति—पृथिवीति ।[1] 'देवयजनि' देवा इज्यन्ते यत्र, 'यज देवपूजासंगतिकरणदानेषु' (भ्वा० उ० १००२) कारकसमासे, उत्तरपदेऽधिकरणे ल्युट् प्रत्ययः । देवयजनभूमे ! 'पृथिवि' विस्तृतवेदे ! 'ते' त्वत्सम्बन्धिन्याः 'ओषधेः' तृणरूपायाः 'मूलम्' 'मा हिंसिषम्' न विनाशयामि। स्फ्यप्रहारेण निर्वृत्तं पुरीषमादातुं सम्बोधयति—'व्रजमिति' ।[2] हे पुरीष ! त्वं 'व्रजम्' व्रजन्ति गच्छन्ति गावो यत्रेत्यधिकरणे घः प्रत्ययः (पा० ३. ३. ११९) । प्रत्ययस्वरेणान्तोदात्तः तथाविधं 'गोष्ठानम्' गावस्तिष्ठन्ति यत्रेत्यधिकरणे ल्युट् प्रत्ययः तं गोष्ठं 'गच्छ' देवकार्ये वेदिनिर्माणार्थमुत्खातस्य तव न यत्रकुत्रचिन्निक्षेपः, गोष्ठाने तव वास इत्यनेन पुरीषस्य समादरः सूच्यते । अधुना वेदिं प्रेक्षते—वर्षत्विति ।[3] हे वेदे ! 'ते' त्वदर्थं 'द्यौः' द्युलोकाभिमानी पर्जन्यो देवः 'वर्षतु' वर्षेण खननजन्यं दुःखं शमयतु, 'वृषु सेचने' (भ्वा० प० ७०६) । तदनन्तरं मन्त्रं पठित्वा स्फ्योत्खातं पुरीषमुत्करे निक्षिपति—बधानेति ।[4] 'देव सवितः' हे देदीप्यमान प्रेरयितः 'परमस्यां पृथिव्याम्' परमायां पृथिव्यां, छान्दसः स्याडागमः । पृथिव्या अन्तिमे पदे 'अन्धे तमसि' (श० १. २. ४. १६) 'शतेन पाशैः' अनेकविधैः पाशैः 'बधान' मम शत्रोः बन्धनं कुरु । 'बन्ध बन्धने' (क्र्या० प० १५०९) 'योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' अनेनाक्रान्तुराक्रान्तस्य च द्विविधस्यैव शत्रोर्निग्रहः सूच्यते। 'तम्' पाशबद्धं शत्रुम् 'अतः' अन्धतमसात् 'मा मौक्' कदापि न मुञ्च। 'मुच्लृ मोक्षणे' (तु० उ० १४३१.) । लुङि मध्यमपुरुषैकवचने रूपम् । अडभावः इति ।

आत्मयाजिपक्षभाष्यम्

हे 'देवयजनि' देवः परमात्मा इज्यते यस्यां तत्सम्बुद्धौ हृदयरूपवेदे ! 'पृथिवि' हे मनो-

१. 'पृथिवि देवयजनि' इति तृणेऽन्तर्हिते प्रहरति । (का० श्रौ० सू० २. ६. ९)

२. 'व्रजं गच्छ' इति पुरीषमादत्ते । (का० श्रौ० सू० २. ६. १०)

३. 'वर्षतु ते' इति वेदिं प्रेक्षते । (का० श्रौ० सू० २. ६. ११)

४. 'बधान' इत्युत्करे करोति । (का० श्रौ० सू० २. ६. १२)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रूपवेदे ! द्वे वेदी भवतः 'द्वौ वाव लोकावित्याहुर्देवलोकश्चैव पितृलोकश्च' (श० ब्रा० १२. ७. ३. ७) 'ते' तव 'ओषध्याः' इन्द्रियसमूहस्य, 'ओषधयो वै देवानां पत्न्यः' (श० ब्रा० ६. ५. ४. ४), 'मूलम्' आत्मानम्, अहं 'मा हिंसिषम्' प्रारब्धसमाप्तये न विनाशयामि। हे 'पुरीष' कामादिशत्रूणां देहरूपमृत् ! 'पशवो वै पुरीषम्' (श० ब्रा० १. २. ५. १७)। त्वं 'गोष्ठानम्' इन्द्रियाणां स्थानं 'व्रजम्' देहाभिमानिनां पुरुषाणां ग्रामं 'गच्छ'। हे वेदे ! 'ते' तुभ्यं त्वदर्थं 'द्यौः' गगनमण्डलं 'वर्षतु' जलसेकं करोतु। हे 'देव सवितः' मनः ! 'मनो वै सविता प्राणाधिपः' (श० ब्रा० ६. ३. १. १३)। 'यः' कामादिः 'अस्मान् द्वेष्टि' द्वेषं करोति 'च, वयं' 'यम्' मोहादिकं शत्रुं 'द्विष्मः' 'तम्' उभयविधं शत्रुं 'शतेन' शं ब्रह्म, तः पराशक्तिः, तयोः समूहः शतं तेन 'पाशैः' प् सावित्री, अः विष्णुः, शः शमः अन्तःकरणनिरोधः तैश्च 'परमस्याम्' अन्तिमायां 'पृथिव्यां' मूलप्रकृतौ 'बधान' 'तं' 'माम्' आत्मानम् 'अतः' अस्माद् मोहादिकाच्छत्रोः 'मौक्' मुञ्च। यस्मात् सर्वे विकाराः कामादयः प्रकृतिसम्भवाः। यथा भगवद्वाक्यम्—'विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्' (गीता १३. १९) इति।

सात्वतपक्षभाष्यम्

श्रीकृष्णासन्निधाने तत्प्रियायाः सत्यभामायाः पिता सत्राजित् स्यमन्तकमणिप्राप्त्यर्थं शतधन्वना यादवेन हतो मणिश्च हृतः। श्रीकृष्णः सपरिवारो द्वारिकायां यदा प्रतिनिवृत्तः तदा सत्यभामा स्वपितृहत्यावृत्तान्तश्रवणेन सञ्जातकोपा व्याहरति—भगवन् ! 'व्रजम्' गोष्ठानं, गोपिकानिवासस्थानं व्रजप्रदेशं 'गच्छ' प्रयाहि। गोष्ठानपदेन व्रजवासिषु तवानुरागो न मयीति सूचितम्। अलमत्र संस्थानेन। मयि तवानुरागाभावमवगत्यैव मम तातः शतधन्वना हिंसितः, अन्यथा तव त्रासात् स ईदृशं कुकृत्यं कथं कुर्वीत।

अथवा भगवत्पौरुषमुपर्युक्तवाक्येन विनिन्दति—क्षत्रियाः परापमानं न सहन्ते, त्वञ्च निर्वीर्य एव तिष्ठसि, स्वश्वशुरहन्तृतो वैरनिर्यातनाय मनागपि न प्रयतसे। अतः पुनर्मूषिका-भवनन्यायेन क्षत्रियोचितचक्रकवचधारणादिवेषं परित्यज्य गोष्ठानं व्रजं गच्छ। यथापूर्वं गोपालो भव। एषोक्तिः सत्वरं पितृवैरनिर्यातनाय भगवदुत्तेजनार्थम्। भगवान् तां सान्त्वयन् ब्रूते—हे 'पृथिवि' ! पृथिव्यवतारसत्यभामे ! 'देवयजनि' देवैरिज्यमाना देववन्द्या जगन्मातृत्वात्, तत्सम्बोधने, ते 'मूलम्' जनकं मदपवादकं स्यमन्तकमणिहरणकलङ्कदायिनं 'मा हिंसिषम्' अहं न हिंसितवानस्मि। अत्र तवानुराग एव कारणम्। नहि क्षत्रियाः स्वापवादकं क्षमन्ते, धैर्यं निधेहि, त्वत्प्रसादनाय त्वत्पितृघातिनं शतधन्वानं सपदि व्यापादयिष्यामीति भावः। 'ओषध्याः' इति विशेषणं सत्यभामायाः। 'ओषम्' मनस्तापं 'धयति' पिबति, शमयति, विनाशयतीत्योषधिशब्दव्युत्पत्तिः। अनेन प्रियादर्शनेन भर्तुर्मनस्तापः अवश्यं विनश्यतीति सूचितम्। 'द्यौः' कान्तिः, द्युतिर्द्योतनात्। 'ते वर्षतु' त्वदाननं सिञ्चतु। त्वन्मुखमण्डलं सुप्रसन्नं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कान्तिमच्च मदाश्वासनेन भवत्वित्यर्थः। प्रसन्नानना सत्यभामा भगवन्तमभ्यर्थयते—बधानेति। हे 'देव' द्योतमान देववन्मदाराध्य 'सवितः' जगत्प्रेरक जगदुत्पादक वा परमेश्वर! 'यः' शतधन्वा 'अस्मान् द्वेष्टि' अस्मासु शत्रुभावं रक्षति, अतो वयमपि 'यं' शतधन्वानं 'द्विष्मः' शत्रुत्वेन तस्मिन् वर्तामहे, तस्मै वाग्दत्तां मां मम तातः अदत्त्वा भवते दत्तवान्, इति सुप्रसिद्धमेव विद्वेषकारणम्। दृश्यते हि लोके स्वस्मै दत्तं नारीरत्नं यद्यन्यस्मै तत्पिता दद्यात्तदा तस्याः पितरं भर्तारं च स जनो विद्वेष्टि। शतधन्वास्मदनिष्टविधानाय विविधं षड्यन्त्रं विदधातीत्याह—'शतेन पाशैः' असंख्यैः अस्मद्बन्धनसाधनैर्बहुभिः प्रकारैः पक्षिवदस्मान् पाशबद्धान् कर्तुमुद्युङ्क्त इति भावः। अतः 'तं' शतधन्वानं 'मा मौक्' मा मुञ्च, अपितु बधान। बद्ध्वा करायां निक्षिप्य च सत्वरं व्यापादय। यादवकलहभयेन यदि त्वं तथा न चिकीर्षसि तदा स कारागारेऽवश्यं निक्षेप्तव्य इति भावः। इदं सर्वं वृत्तं भागवते (१०. ५६-५७) स्फुटम्।

अपाररुं पृथिव्यै देवयजनाद्वध्यासं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याᳬ शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्। अररो दिवं मा पप्तो द्रप्सस्ते द्यां मा स्कन् व्रजं० मौक्॥ २६॥

१. स्फ्यस्य पुनः प्रहारः, २. पुरीषादानम्, ३. वेदिप्रेक्षणम्, ४. मृत्प्रक्षेपणम्, ५. उत्कराभिमर्शनम्, ६. स्फ्यस्य तृतीयः प्रहारः, ७-९. पुरीषादानादि।

देवयाजिपक्षभाष्यम्

अस्यां षड्विंश्यां कण्डिकायां नव मन्त्राः। तत्र 'व्रजं गच्छ' 'वर्षतु' 'बधान' इत्यादयस्त्रयो मन्त्राः पूर्वकण्डिकायामुक्ता अत्र पुनरुपात्ताः। तेषामृषिदेवताच्छन्दांसि पञ्चविंश्याः कण्डिकाया ऊह्यानि। 'अपाररुम्' इति द्वितीयप्रहारेण पुरीषक्षेपणो मन्त्रः। अस्यासुरी गायत्री छन्दः, असुरो देवता। 'अररो दिवम्' इति उत्कराभिमर्शनः, अस्य याजुषी छन्दः, असुरो देवता। 'द्रप्सः' इति तृतीयप्रहारेणोत्करे मृत्प्रक्षेपणः। छन्दोदेवते प्राग्वत्। परमेष्ठी प्राजापत्यः सर्वेषाम् ऋषिस्तुल्यः (श० ब्रा० १. २. ४. १७-१९; का० श्रौ० २. ६. १४-१७)।

पुरीषादानादि, उत्करे मृत्प्रक्षेपणान्तं कर्म सम्पादयितुं स्फ्येन पृथिव्यां प्रथमः प्रहार उक्तः। अधुना द्वितीयेन प्रहारेण पुनरपि मृत्प्रक्षेपणान्तं कर्म चिकीर्षन् पुनः प्रहरति—अपाररुमिति।[1] 'अररुम्' तदाख्यमसुरं 'पृथिव्यै' पृथिव्याः पृथिवीसम्बन्धिनः। पञ्चम्यर्थे चतुर्थी। 'देवयजनात्' देवयजनयोग्याद् वेदिप्रदेशाद् 'अपवध्यासम्' अपनीय हनानि। अनेन

१. 'अपाररुम्' इति द्वितीयं प्रहरणादि। (का० श्रौ० सू० २. ६. १४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मे द्वितीयेन प्रहारेण वेदिस्थाः सूक्ष्माः क्रमयोऽपनीताः स्युरित्याशयः। एतावता द्वितीयप्रहारेण पञ्चविंश्यां कण्डिकायां कृतं व्याख्यानमनुसृत्य, 'व्रजं गच्छ' 'वर्षतु' 'बधान' इति त्रिभिर्मन्त्रैः पुरीषादानं, वेदिप्रेक्षणम्, उत्करे मृत्प्रक्षेपणमिति तिस्रः क्रियाः पुनरावर्तयति। अथाध्वर्युरुत्करं द्वाभ्यां पाणिभ्यामभिमृशति— अररो दिवमिति।[1] 'अररो' हे यज्ञविध्वंसकर्तः असुर! 'दिवं' द्युलोकं 'मा पप्तः' मा गमः। 'पत्लृ गतौ' (भ्वा० प० ८४५) लुङि मध्यमपुरुषैकवचने च्लेरङि 'पतः पुम्' (पा० ७. ४. १९) इति धातोः पुमागमः। नरके पत, स्वर्गलोकं न गच्छेति भावः। अथ तृतीयं प्रहारं कृत्वा पुरीषादानादि सर्वं कर्मावर्तयति— द्रप्स इति।[2] हे वेदे! 'ते' तव 'द्रप्सः' मधुरादिरसः 'द्याम्' द्युलोकं प्रति 'मा स्कन्' न गच्छतु। 'स्कन्दिर् गतिशोषणयोः' (भ्वा० प० ९७९) लुङि च्लेर्लुकि 'स्कन्द्ति' इति स्थिते 'इतश्च' (पा० ३. ४. १००) इतीकारलोपे 'हल्ङ्याब्भ्यो दीर्घात्०' (पा० ६. १. ६८) इत्यादिनाऽपृक्त-तकारस्य लोपे 'संयोगान्तस्य लोपः' (पा० ८. २. २३) इत्यनेन दकारलोपे रूपम्। माङो योगादडभावः। 'व्रजं गच्छ' इत्यादिभिस्त्रिभिर्मन्त्रैः पुरीषादानादि प्राग्वदिति।

आत्मयाजिपक्षभाष्यम्

यज्ञलक्ष्मि देवि! 'पृथिव्यै देवयजनात्' मनोहृदयरूपवेदिस्थानात् 'अररुं' लोभासुरम् 'अपवध्यासम्' अपनीय वधं करवाणि। 'गोष्ठानम्' इन्द्रियाणां स्थानं 'व्रजं' देहाभिमानिपुरुषाणां ग्रामं 'गच्छ'। हे वेदे! 'ते' त्वदर्थं 'द्यौः' गगनमण्डलं 'वर्षतु'। हे 'देव सवितः' द्योतमान मनः! 'यः' कामादिः 'अस्मान्' 'द्वेष्टि' द्वेषं करोति 'च वयं यं द्विष्मः' 'तम्' उभयविधं शत्रुं 'शतेन' परायुक्तब्रह्मणा 'पाशैः' सावित्रीविष्णुशर्मैः 'परमस्यां पृथिव्याम्' कारणरूपमूलप्रकृतौ 'बधान' 'तं माम्' आत्मानम् 'अतः' उभयविधशत्रोः 'मौक्' मुञ्च। 'अररो' हे लोभासुर! 'दिवं' भृकुटिं 'मा' न 'पप्तः' गमः। हे हृदयरूपवेदे! 'ते' तव 'द्रप्सः' उपजीव्यो रसः भोगः 'द्यां' भृकुटिं 'मा स्कन्' न स्कन्दतु, न गच्छतु। यथोक्तं गीतायाम् (२. ५९)—

'विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥'

'व्रजं गच्छ' इत्यादिमन्त्रत्रयस्य प्रयोगो व्याख्या च पूर्ववत्।

सात्वतपक्षभाष्यम्

शतधन्वा सत्यभामोत्तेजितं स्ववधोद्युक्तं श्रीकृष्णमवगत्य कृतवर्माक्रूराभ्यामुररीकृत-स्वकीयसाहाय्यप्रस्तावः स्यमन्तकमक्रूराय दत्त्वा द्वारिकातः पलायितः। सबलरामो भगवान्

१. अभिन्यस्यत्यग्नीदुत्करम् 'अररो दिवम्' इति। (का० श्रौ० सू० २. ६. १५)
२. 'द्रप्सस्ते' इति तृतीयम्। (का० श्रौ० सू० २. ६. १६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं दुर्वृत्तं धावन्तं पृष्ठतो गत्वाऽऽक्राम्यन् भर्त्सयति— 'अररो' 'ऋ गतिप्रापणयोः' (भ्वा० प० ९३६) 'अर्तेररुः' (उ० सू० ४. ७९) इत्यरुः प्रत्ययः, भीत्वा गत्वर ! शत्रो शतधन्वन् 'पृथिव्यै' पृथिवीकल्याणनिमित्त, वसुधोद्धारनिमित्तं त्वादृशो दुर्जनः पृथिव्या भारः, तव हननेन पृथिव्या भारावतरणं भविष्यतीति भावः। 'देवयजनाद्' देवपूजाप्रवणाद् द्वारिकाभिधानान्नगरात्। सत्राजित् स्यमन्तकमणिप्रभावेण लब्धप्रचुरस्वर्णो बहुभिर्यज्ञैर्देवान् यजतिस्मेति द्वारिकाया देवयजनत्वम्। अपि वा देवयजनशब्देन यागैर्देवानां यष्टा सत्राजिद् ग्राह्यस्तस्माद् 'देवयजनात्' देवानां यष्टुः सत्राजितः 'अप' अपगतं, सत्राजितं निहत्य द्वारिकातः पलायमानं त्वामहं 'वध्यासम्' निश्चितं हन्याम्। अथवा अपेत्युपसर्गस्य धातुसम्बन्धादपहननं प्रतीयते। भीतः पलायितस्ततः स्वर्गं न लप्स्यत इति तद्दुर्गतिरपहननेन सूच्यते। 'व्रजम्' इत्यारभ्य 'मा मौक्' इत्यन्ता सत्यभामोक्तिः पूर्ववद् व्याख्येया।

'अररो' हे सपत्न ! शतधन्वन् 'दिवम्' मोदम्, दिवो नानार्थेषु मोदस्यापि पाठात् 'मा पप्तः' न प्राप्नुहि 'पत्लृ गतौ' (भ्वा० प० ८४५), लुङ्। द्वारिकातः पलायनेन मम प्राणत्राणं भविष्यतीति भावनया न मोदस्व। धावमानं त्वामनुगच्छन्नहं निश्चितं त्वां व्यापादयिष्यामि, नहि विद्यते जगतीतले यो मदाक्रान्तं त्वां रक्षितुं शक्नुयादिति भावः। 'द्रप्सः' पलायनेनात्मरक्षणभावनामयो हर्षो गर्वो वा 'दृप् हर्षमोहनयोः' (दि० प० ११९६) 'ते' तव 'द्याम्' स्तुतिम्। दिव्धातुनिष्पन्नस्य द्यामितिशब्दस्य स्तुतिरप्यर्थः। 'मा' न, 'स्कन्' गच्छतु। पलायनेनात्मत्रातारं दृप्यन्तं हृष्यन्तं गर्वं कुर्वन्तं च पराक्रान्तशत्रुं मानव लोकाः प्रशंसन्ति—निपुणोऽयं प्रबलशत्रोराक्रमणादनेन स्वात्मा त्रातः। सम्प्रति निर्भयोऽसौ हृष्यति, अहो ! अस्य पुण्यातिरेकः, इत्यनेन प्रकारेण न त्वदीयं पलायनसाफल्यं मुक्तकण्ठं नीतिकोविदाः वर्णयन्त्विति भावः।

गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन त्वा छन्दसा परिगृह्णामि। सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च ॥ २७ ॥

१–३. पूर्वपरिग्रहः (खननात् पूर्वं वेद्यां त्री रेखाकरणम्), ४–६. उत्तरपरिग्रहः (खननादूर्ध्वं त्री रेखाकरणम्)।

देवयाजिपक्षभाष्यम्

अस्यां सप्तविंश्यां कण्डिकायां षण्मन्त्राः। वेदिखननात् प्राक् स्फ्येन त्री रेखाकरणं पूर्वः परिग्रहः, तदर्थं 'गायत्रेण' 'त्रैष्टुभेन' 'जागतेन' इति त्रयो मन्त्राः। तेषां प्रत्येकमासुर्यनुष्टुप् छन्दो विष्णुर्देवता। 'सुक्ष्मा' इति 'स्योना' इति 'ऊर्जस्वती' इति च त्रयो मन्त्रा वेदिखननान्तरं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्फ्येन त्री रेखाकरणाः उत्तरपरिग्रहार्थाः। तेषां वेदिर्देवता। छन्दश्च 'सुक्ष्मा' इत्यस्य प्राजापत्या गायत्री इति, 'स्योना' इत्यस्य चासुरी जगती इति, 'ऊर्जस्वती' इत्यस्य चासुरी पङ्क्तिरिति। ऋषिः परमेष्ठी प्राजापत्यः सर्वेषां समः (श० ब्रा० १. २. ५. ६-१२; का० श्रौ० २. ६. १८, २३)।

त्रिः प्रहृत्य पुरीषादान-वेदीक्षण-मृत्प्रक्षेपणानि च कृत्वाध्वर्युर्वेदेरियत्तां ज्ञातुं दक्षिणस्यां, पश्चिमायाम्, उत्तरस्यां च दिशि, एकैकेन मन्त्रेण रेखात्रयं करोति—गायत्रेण त्वेति।[1] इममेव विधिं पूर्वपरिग्रहमाचक्षते। 'ते प्राञ्चं विष्णुं निपाद्य छन्दोभिरभितः पर्यगृह्णन्' (श० ब्रा० १. २. ५. ६)। हे विष्णो! 'त्वा' त्वां 'गायत्रेण' गायत्रीछन्दोरूपेण स्फ्येन 'परिगृह्णामि' इति दक्षिणस्याम् 'त्वा' त्वां 'त्रैष्टुभेन' त्रिष्टुप्छन्दोरूपेण स्फ्येन 'परिगृह्णामि' इति प्रतीच्याम्, 'त्वा' त्वां 'जागतेन' जगतीच्छन्दोरूपेण स्फ्येन 'परिगृह्णामि' इत्युदीच्याम्। अत्रेतिहासः—देवाश्चासुराश्चोभये प्रजापतिपुत्रा भूमौ पस्पृधिरे। देवानुपेक्ष्य असुरा भूमिं परस्परं विभेजुः। देवा विष्णुं वामनरूपमग्रे कृत्वाऽसुरान् भूमिं ययाचिरे। यावति भूभागे विष्णुः शेते, तावान् वोऽस्त्वित्यसुराः प्रत्यूचुस्तेनैव सन्तुष्यन्तो देवाः प्राङ्मुखं विष्णुं निपात्य गायत्र्यादिच्छन्दोभिर्यज्ञभूमिं पर्यगृह्णन् (श० ब्रा० १. २. ५. १-७) इति। एवं त्रिभिर्मन्त्रैः पूर्वपरिग्रहेण यज्ञरूपं विष्णुं परिगृह्य तावतीं यज्ञभूमिमासाद्योत्तरेण वक्ष्यमाणेन परिग्रहेण तद्गुणविशिष्टां भूमिमकार्षुः। तदेव विवृणोति—सुक्ष्मेति।[2] 'सुक्ष्मा' खननादिना तृणाश्मादि-दोषनिरासेन हे वेदे! सु शोभना क्ष्मा भूमिर्यस्यास्तथाभूतेति बहुव्रीहिसमासे 'नञ्सुभ्याम्' (पा० ६. २. १७२) इत्यन्तोदात्तत्वम् 'असि' अत एव 'शिवा' कल्याणप्रदा। अथवाऽररुरक्षो-निरासेन शान्ता त्वमसि। चकारद्वयं समुच्चयार्थम्। खननाद् वेदेः सुक्ष्मत्वं शिवत्वं चोपपन्नमिति भावः। अनेन मन्त्रेण दक्षिणतो वेदेः रेखां कुर्यात्। हे वेदे! त्वं 'स्योना' सुखस्वरूपा च 'सुषदा' सुष्ठूपवेश्या 'षद्लृ विशरणगत्यवसादनेषु' (भ्वा० प० ८५४) 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (पा० ३. ३. १२६) इति कर्मणि खल् प्रत्ययः। कृदुत्तरपद-प्रकृतिस्वरेण च लित्त्वात् प्रत्ययात् पूर्वस्य धात्वशस्योदात्तत्वम्। च 'असि' इत्यनेन मन्त्रेण पश्चिमतो रेखां करोति।[3] हे वेदे! त्वम् 'ऊर्जस्वती' ऊर्ग् अन्नं तद्वती, सस्यादिसमृद्धा 'असि'। 'पयस्वती' दध्यादिपयोविकारैः रसवती च 'असि' इत्यनेनोत्तरतो रेखां कुर्यात्।[4] इदमेव त्री रेखाकरणमुत्तरपरिग्रहमाचक्षत इति।

---

१. पूर्वं परिग्रह परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्च स्फ्येन 'गायत्रेण' इति प्रतिमन्त्रम्। (का० श्रौ० सू० २. ६. १८)

२–४. उत्तरं परिग्रहं परिगृह्णाति 'सुक्ष्मा, स्योना, ऊर्जस्वती' इति प्रतिमन्त्रं पूर्ववत्। (का० श्रौ० सू० २. ६. २३)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मयाजिपक्षभाष्यम्

हे देहव्यापिन् देहिरूपविष्णो ! 'त्वा' त्वां 'गायत्रेण' 'छन्दसा' प्राणेन, 'गायत्री वै प्राणः' (श० ब्रा० १. ३. ५. १५) 'परिगृह्णामि'। हे आत्मस्वरूप विष्णो ! 'त्वा' त्वाम् 'त्रैष्टुभेन छन्दसा' उदानेन 'य एवायं प्रजननः प्राण एष त्रिष्टुप्' (श० ब्रा० १०. ३. १. १) 'परिगृह्णामि'। 'त्वा' त्वाम् 'जागतेन छन्दसा' अपानेन 'योऽयमवाङ्प्राण एष जगती' (श० ब्रा० १०. ३. १. १.) 'परिगृह्णामि'। च हे हृदयरूपवेदे ! त्वं 'सुक्ष्मा' 'स्' विष्णुः 'उः' योगिरूपः शिवः तयोः 'क्ष्मा' भूमिः 'असि', 'च' 'शिवा' मङ्गलरूपा वा काममोहादिरहिता शान्ता वा 'असि', 'च' 'स्योना' ब्रह्मानन्दमयी 'असि', 'च' 'सुषदा' सुष्ठु सीदन्ति नरनारायणजीवा यस्यां सा 'असि', 'च' 'ऊर्जस्वती' ज्ञानबलसम्पन्ना 'पयस्वती' रसवती 'आपो ज्योती रसोऽमृतं ब्रह्म भूर्भवः स्वरोम्' (तै० आ० १०. २७. १) इति च 'असि'।

सात्वतपक्षभाष्यम्

मध्येसभं दुर्योधनदुःशासनादिविहिततिरस्कारखिन्नमनस्कां भगवत्प्रपन्नां पाण्डवस्त्रीं द्रौपदीं समाश्वासयति श्रीकृष्णः— गायत्रेण इति। 'गायत्रम्' गानं स्तवनम्। गायत्रं गायतेः स्तुतिकर्मणः (निरु० १. ८) इति यास्कः, तेन 'छन्दसा' ह्लादकेन 'चदि आह्लादे' इत्यस्माद्धातोः 'चन्देरादेश्च छः' (उ० सू० ४. २१९) इत्यनेनासुन् प्रत्ययश्चकारस्य छकारश्च, 'त्वा' त्वां स्वभगिनीं द्रौपदीं परिगृह्णाम्यङ्गीकरोमि। त्वया तत् कार्यं विधेयं येन लोकास्त्वां स्तुवीरन्। कोपावेशादकार्यं विस्मृत्यापि नानुष्ठेयमिति भावः। नास्ति कस्यचिज्जन्तोरपराधः, दैवविजृम्भितं सर्वम्। तथा च सुभाषितम्—

'सुखस्य दुःखस्य न कोऽपि दाता, परो ददातीति कुबुद्धिरेषा।
अहं करोमीति वृथाभिमानः स्वकर्मसूत्रग्रथितो हि लोकः॥' इति।

'त्रैष्टुभेन' त्रीन् लोकान् स्तोभते स्तभ्नानीति त्रिष्टुभ्, त्रिलोक्याधारः परमात्मा, तत्सम्बन्धिना, तदीयेन 'छन्दसा' अभिलाषेण भगवदिच्छयेति यावत्। 'जागतेन' इत्यपि पूर्ववद् व्याख्येयम्। 'जगत्' सर्वं गच्छतीति सर्वव्यापकं ब्रह्म परमात्मैव तदीयेन 'छन्दसा' परमेश्वरेच्छया त्वां परिगृह्णामि। परिग्रहोऽत्र बोध्यत्वेनाङ्गीकरणम्। तच्च समाश्वासनं सान्त्वनं वा। यद्वा परिपूर्वो ग्रहधातुरत्रानेकार्थत्वात् सान्त्वनावचनः। षड्भिर्विशेषणैः स्तुवन् भगवान् निजभगिनीं प्रोत्साहयति— 'सुक्ष्मा चासि' इति। 'सु' शोभना 'क्ष्मा' जनिर्भूमिर्यस्याः सा तादृशी। 'यज्ञभूमिसमुद्भवा' इति पुराणवचनम्। जन्मना दिव्यासीति भावः। 'शिवा' कल्याणकारिणी, तत एव, कारणानुरूपमेव कार्यम्। 'स्योना' सुखरूपा, सौन्दर्यातिशयेन दर्शकानां सुखयित्री वा। येन भगवता विश्वसुन्दरी त्वमुत्पादिता स एव त्वां रक्षिष्यति, अतो न भेतव्यमिति भावः। 'सु' सुखेन सीदति, सादयति वाऽन्यानिति 'सुषदा' सदिरत्रोपवेशनार्थः। शान्तहृदयया त्वया स्वस्थाने

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुखमुपवेष्टव्यम्, समागताश्चातिथयः सादरं समुपवेश्य भोजनादिना सम्माननीया इति तात्पर्यम्। 'ऊर्जस्वती' बलवती समस्तशक्तिसनाथा दिव्यत्वादिति भावः।

अपि वा निर्वासितया मया राज्यप्रच्योतितया वने निर्धननिर्विशेषमुषितया कथमतिथिसत्कारसम्भव इत्यत आह— ऊर्जस्वतीति। 'ऊर्क्' अन्नम्, अन्नेनाद्येन तदाधारपात्रं लक्ष्यते, सूर्यदत्तस्थाली इति यावत्। तस्यां सत्यां का चिन्ता। अतिथिसहस्रमपि भोजयितुं शक्यम्। त्वद्भोजनात् पुरा भास्करप्रसादात् तत्रान्नं न न्यूनतां गच्छति। 'पयस्वती' 'पयः' पोषणं पोषणशक्तिरिति यावत्। 'ओप्यायी वृद्धौ' (भ्वा० आ० ४८८) 'पयः पिबतेर्वा प्यायतेर्वा' (निरु० २. ५) तद्वती पोषणशक्तियुक्ता विश्वपोषिका जगज्जननी साक्षादन्नपूर्णासि त्वमिति भावः।

पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम्। यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते। प्रोक्षणीरासादय द्विषतो वधोऽसि॥ २८॥

१. वेदिसमीकरणम्, २. प्रोक्षण्यासादनम्, ३. स्फ्यस्योदङ् प्रहरणम्।

देवयाजिपक्षभाष्यम्

अस्यामष्टाविंश्यां कण्डिकायां त्रयो मन्त्राः। 'पुरा क्रूरस्य' इति वेदिसमीकरणमन्त्रः। अस्य अघशंसः ऋषिः, त्रिष्टुप् छन्दश्चन्द्रो देवता। 'प्रोक्षणीः' इति प्रोक्षण्यासादनो मन्त्रः। अस्य परमेष्ठी प्राजापत्य ऋषिः, याजुषी उष्णिक् छन्दः, प्रैषो देवता। 'द्विषतः' इत्यादेः उदङ् स्फ्यप्रहरणे विनियोगः। अस्य प्राग्वद् ऋषिः, याजुषी गायत्री छन्दः, आभिचारिकं देवता[1] (श० ब्रा० १. २. ५. १९-२२; का० श्रौ० २. ६. २४, ३४)।

अस्य प्रथमस्य मन्त्रस्य संगमनार्थमेकामाख्यायिकां वदन्ति— असुरैः सह देवाः संयतमाना आसुः। देवा मन्त्रयामासुर्यदुत्क्रुष्टं देवयजनस्य तच्चन्द्रमसि निदधाम। असुरैश्चेत् जितास्तदा अनेन पुनरसुरान् जेष्याम इत्युत्क्रुष्टं भागं देवयजनस्य ते चन्द्रमसि निचिक्षिपुः। सोऽयं निक्षिप्त एवांशो दरीदृश्यमानश्चन्द्रे शशाङ्क इति (श० ब्रा० १. २. ५. १८-१९)। स्फ्येन त्री रेखितायाा वेदेः समीकरणमनेन मन्त्रेण प्रतिपाद्यते— पुरा क्रूरस्येति।[2] 'विरप्शिन्' हे महन् विष्णो! विरप्शिन्निति महन्नामसु पाठात् (निघ० ३. ३. २२) 'पुरा' प्राक् 'क्रूरस्य' संग्रामस्य 'संग्रामो वै क्रूरम्' (श० ब्रा० १. २. ५. १९)। 'विसृपः' विसर्पणात् विस्तारात्।

१. मिश्रसंस्करणे सर्वेषाम् ऋषिः अघशंसः।
२. 'पुरा क्रूरस्य' इत्यनुमार्ष्टि। (का० श्रौ० सू० २. ६. २४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'सृप्लृ गतौ' (भ्वा० प० ६८३)। ततो भावलक्षणे 'सृपितृदोः कसुन्' (पा० ३. १. १७) इति कसुन् प्रत्ययः। 'उदादाय' उत्कृष्टम् आदाय 'याम्' 'पृथिवीम्' देवयजनरूपाम् 'जीरदानुम्' जीवयित्रीं जीवनदात्रीमित्यर्थः। 'जीव प्राणधारणे' (भ्वा प० ५६२) तस्माद् रदानुः प्रत्ययः 'जीवे रदानुः' (म० भाष्य० २ आ०) इत्युक्तेः। जीवदानुम् इत्यपि पाठान्तरम्। तत्र जीवं ददातीति जीवदानुस्तां जीवस्य धात्रीं सारभूतां 'यदस्यै पृथिव्यै जीवमासीत् तच्चन्द्रमसि न्यदधत तस्मादाहोदादाय पृथिवीं जीवदानुम्' (श० ब्रा० १. १. ५. १९) 'ऐरयन्' न्यक्षिपन् देवाः 'चन्द्रमसि' चन्द्रे 'ताम्' देवयजनरूपां पृथिवीं 'धीरासः' मेधाविनः 'उ' निश्चयेन, 'स्वधाभिः' अन्नैर्हविर्लक्षणैः, अत्र त्वन्नहेतुभूता त्रयी विद्या गृह्यत इति स्वधाभिः वेदत्रय्या इत्यर्थः। तदुक्तं— 'यां चन्द्रमसि ब्रह्मणा दधुः' (श० ब्रा० १. २. ५. १९) इति। 'अनुदिश्य' सैव चन्द्रमसि निक्षिप्ता भूमिरियं वेदिरित्यनुक्रमेण दृष्ट्वा 'यजन्ते' यज्ञादिभिर्देवान् पूजयन्ति। 'प्रोक्षणीरासादय' इत्यध्वर्युणा प्रेषितः अग्नीत् (का० श्रौ० २. ६. २५-२९) वेद्यां प्रोक्षणीरपः समानयति। प्रोक्ष्यन्ते सिच्यन्ते यज्ञियपदार्था आभिस्ताः। 'उक्ष सेचने' (भ्वा० प० ६५७) करणे ल्युटि 'टिड्ढाणञ्०' (पा० ४. १. १५) इति स्त्रियां ङीप् प्रत्ययः। ततः स्फ्यम् उदञ्चं प्रहरति— द्विषत इति।[1] हे स्फ्य! त्वं 'द्विषतः' शत्रुवर्गस्य 'वधः' विनाशरूपः विनाशको वा 'असि'। व्याकरणं चतुर्विंश्यां कण्डिकायां द्रष्टव्यमिति।

अस्मिन्नवमे वेद्याख्येऽनुवाके 'देवस्य त्वा' इति चतुर्विंश्याः कण्डिकायाः 'पुरा क्रूरस्य' इत्यष्टाविंशीं यावत् क्रियाभेदेन चतुर्विंशत्या मन्त्रैः (चतुर्विंश्यां २, पञ्चविंश्यां ४, षड्विंश्यां ९, सप्तविंश्यां ६, अष्टाविंश्यां ३) इमाः क्रिया व्याख्याताः—१. स्फ्यादानम्, २. स्फ्यालम्भनम्, ३. स्फ्यप्रहरणम्, ४. पुरीषादानम्, ५. वेदिप्रेक्षणम्, ६. मृत्प्रक्षेपणम्, ७. स्फ्यस्य पुनः प्रहारः, ८-१०. पुरीषादानवेदिप्रेक्षणमृत्प्रक्षेपणानि, ११. उत्कराभिमर्शनम्, १२. स्फ्यस्य तृतीयः प्रहारः, १३-१५. पुरीषादानादयस्तिस्रः क्रियाः, १६-१८. पूर्वपरिग्रहः, १९-२१. उत्तरपरिग्रहः, २२. वेदिसमीकरणम्, २३. प्रोक्षण्यासादनम्, २४. स्फ्यस्योदङ् प्रहरणम्। नवस्वनुवाकेष्वष्टाविंशत्यां कण्डिकासु समुदिता मन्त्रसंख्या ऊनविंशत्युत्तरशतम् (११९)।

आत्मयाजिपक्षभाष्यम्

'विरप्शिन्' विविधं रपति वेदत्रयरूपेण शब्दं करोतीति विरप्शी तत्सम्बुद्धौ, हे विष्णो! 'क्रूरस्य' कामस्य 'विसृपः' विविधं सर्पन्ति योधा यस्मिन् इति विसृप् युद्धम्। तस्मान्नानायोधयुताद् युद्धात् 'पुरा' पूर्वं 'याम्' 'जीवदानुम्' नित्यं जीवनदात्रीं 'पृथिवीं' योगभूमिं 'स्वधाभिः' 'मनः पितरः' (श० ब्रा० १४. ४. ३. १३), 'स्वधा पितॄणामन्नम्' (काठ०

---

१. 'द्विषतो वधः' इति स्फ्यमुदञ्चं प्रहरति। (का० श्रौ० सू० २. ६. ३४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२६. २) मनोवृत्तीनामन्नैः सह 'उदादाय' उत्कर्षेण गृहीत्वा 'चन्द्रमसि' मानसकमले, 'मनो वै चन्द्रमाः' (श० ब्रा० १४. ४. १. १७) 'ऐरयन्' प्राक्षिपन् स्थापयामासुः । 'धीरासः' मेधाविनः 'तां' योगभूमिम् 'उ' एव 'अनुदिश्य' गुरुशास्त्रद्वारा ज्ञात्वा 'यजन्ते' ज्ञानयज्ञं कुर्वन्ति, हे हार्दान्तरिक्ष ! 'अन्तरिक्षं वा आग्नीध्रम्' (श० ब्रा० ९. २. ३. १५) 'प्रोक्षणीः' प्रोक्ष्यन्त आभिरिति प्रोक्षण्य आपः 'आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्' (तै० आ० १०. २७. १) इति श्रुतेः 'आसादय' स्वस्मिन् स्थापय । हे ज्ञानरूपवज्र ! त्वं 'द्विषतः' कामस्य 'वधः' हिंसकः 'असि' ।

सात्वतपक्षभाष्यम्

गीतावक्तारं तया (गीतया) कर्मयोगादि विविधं योगमुपदिशन्तं श्रीकृष्णं परमात्मानं परमेष्ठी प्रजापतिर्भगवद्भक्ता वा प्रशंसन्ति—पुरा इति । 'विसृपः' विविधं 'सर्पन्ति' अन्योन्यं निहन्तुं वीरा गच्छन्ति यत्रेति विसृप् तस्य 'क्रूरस्य' संग्रामस्य महाभारताभिधानस्य गदाचक्रशरादिभिर्विविधायुधैर्मिथः प्रहरणमेव युद्धस्य वैविध्यम्, 'पुरा' युद्धारम्भात् पूर्वमित्यर्थः 'यां' विद्यां, गीतात्मिकां 'जीवदानुं' जीवनदात्रीं हतोत्साहमानवप्रोत्साहिकां 'पृथिवीं' महतीं विवस्वन्मन्वादिराजर्षिपरम्परागतां भवन्मुखादर्जुनोऽनुशुश्राव, वेदवाक्यवत् श्रद्धातिरेकेण जग्राह । अनुश्रुतिकथनेन गीताया वेदतुल्यत्वं ध्वनितम् । तामेव विद्यामर्जुनापदेशेन विश्वहितायोपदिष्टाम्, 'आदाय' गृहीत्वा, अङ्गीकृत्य 'चन्द्रमसि' चन्द्राधिष्ठिते मनसि, अध्यात्माधिदैवतयोश्चन्द्रमनसोरभेदोपचाराद्, हृदि निधायेत्यर्थः । 'स्वधाभिः' स्वमात्मानं दधतीभिः 'आत्मधारिकाभिः' आत्मतत्त्वोपदेशिकाभिरुक्तिभिः कृत्वा 'धीरासः' सञ्जयादयो विद्वांसो धृतराष्ट्रादिभ्यः 'उत् ऐरयन्' उदैरयन् उदीरितवन्तः व्याहृतवन्तः । किं बहुना, भूयांसो विद्वांसो गुरुजनाः स्वशिष्येभ्य उपादिशन् । 'अनुदिश्य' विश्वश्रेयोविधात्रीं तां विद्यामभिलक्ष्य 'यजन्ते' पूजयन्ति मुक्तकण्ठं त्वां प्रशंसन्ति । अपि च त्वं 'द्विषतः' 'विद्ध्येनमिह वैरिणम्' (गी० ३. ३७) 'जहि शत्रुं महाबाहो कामरूपं दुरासदम्' (गीता ३, ४३) इति वचनाभ्यां महाशत्रोः कामस्य 'वधः' विनाशकः 'असि' भवसि । त्वत्प्रसादाद् दुर्जेयः प्रसह्य कुमार्गप्रवर्तकः कामाख्यः शत्रुः साधकैः जेतुं शक्य इति भावः । अतो हे 'प्रोक्षणीः' ! जगद्गुरो परमात्मन् ! प्राति इति प्रः 'प्रा पूरणे' (अ० प० १०६१) उक्षति सिञ्चतीति 'उक्षः' 'उक्ष सेचने' (भ्वा० प० ६५७) पूरयिता ज्ञानेन, मनोभूमिसेक्ता चेति प्रोक्षः, नयतीति नीः जगत्सञ्चालकः, प्रोक्षश्चासौ नीः प्रोक्षणीः परमेश्वरस्तत्सम्बुद्धाविति व्युत्पत्तेः । 'आसादय' मां पुनरावृत्तिशून्यं स्वकीयं वैष्णवं परं धाम प्रापय ।

अस्मत्सुहृद्वर्यास्त्वित्थं व्याख्यातवन्तः—'विरप्शिन्' ब्रह्मचारिन् बहुविधान् वेदादीन् अधीयान ! विविधं रपतीति तद्व्युत्पत्तेः । 'विसृपः' विविधं सर्पतः सर्वव्यापिनः, 'क्रूरस्य'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुविधबन्धनकर्तकस्य 'कृती छेदने' इत्यत औणादिके रक्प्रत्यये कृन्ततेः क्रूरादेशः। 'पुरा' रक्षणेन हेतौ तृतीया, रक्षणाद् हेतोः 'पृथिवीं' महतीं 'जीवदानुं' जीवनदात्रीं भगवच्छक्तिं चिन्तयेति शेषः। तां विशिनष्टि—'यां' भगवच्छक्तिं 'स्वधाभिः' आत्मधारकविद्याभिः 'चन्द्रमसि' आह्लादके परमात्मनि 'धीरासः' विद्वांसः 'ऐरयन्' प्रेरितवन्तः 'ताम् उ' तामेव भगवच्छक्तिम् 'अनुदिश्य' पुरस्कृत्य 'यजन्ते' पूजयन्ति च। अतस्तदधिगमार्थं 'प्रोक्षणीः' गुरुः। द्वितीयार्थे प्रथमा। गुरुम् 'आसादय' प्राप्नुहि गुरुमुपगच्छेरित्यर्थः। यतस्त्वं 'द्विषतः' कामादिशत्रुवर्गस्य 'वधः' हन्ता, अतो जितकामादिवर्गस्य शिष्यस्य तव गुरुमुपेत्य विद्याग्रहणेऽधिकार इति भाव इति।

१०. आज्यानुवाकः

प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः। अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि। प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः। अनिशितासि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै संमार्ज्मि ॥ २९ ॥

१–२. स्रुवप्रतपनम्, ३. स्रुवसम्मार्जनम्, ४–५. स्रुक्प्रतपनम्, ६. स्रुक्सम्मार्जनम्।

देवयाजिपक्षभाष्यम्

अस्यामूनत्रिंश्यां कण्डिकायां षण्मन्त्राः। प्रथमेन त्रिकेण स्रुवस्य प्रतपनमार्जने, द्वितीयेन च त्रिकेण स्रुचां प्रतपनमार्जने। 'प्रत्युष्टम्' इत्येकतः (पुरस्तात्) स्रुवप्रतपनार्थः, 'निष्टप्तम्' इत्यन्यतः (पश्चात्) स्रुवप्रतपनार्थः। उभयोरासुरी बृहती छन्दः। 'अनिशितः' इति स्रुवसम्मार्जनः। अस्य प्राजापत्या बृहती छन्दः। त्रयाणां स्रुवो देवता। एवमेवैकतोऽन्यतश्च स्रुचां प्रतपनार्थं पुनरपि 'प्रत्युष्टम्' इत्यस्य 'निष्टप्तम्' इत्यस्य चोपादानम्। अनयोरासुरी बृहती छन्दः, स्रुग् देवता। 'अनिशिता' इति मन्त्रस्य प्राजापत्या बृहती छन्दः, स्रुग् देवता, स्रुचां सम्मार्जनार्थश्चायं मन्त्रः। परमेष्ठी प्राजापत्य ऋषिः समानः (श० ब्रा० १. ३. १. १–१०, का० श्रौ० २. ६. ३९–४१)।

यथा शूर्पाग्निहोत्रहवण्योः प्रतपनं सप्तम्यां कण्डिकायां व्याख्यातं, तथेह स्रुवस्यापि प्रतपनमेकतः 'प्रत्युष्टं रक्षः' इत्यादिना मन्त्रेण, अन्यतश्च 'निष्टप्तं रक्षः' इत्यनेन विधत्ते। ततः कुशाग्रैः स्रुवाग्रभागस्य सम्मार्जनं चिकीर्षन् पठति—अनिशित इति।[1] हे स्रुव! त्वम् 'अनिशितः'

१. स्रुवं प्रतप्य पूर्ववद् वेदाग्रैरन्तरतः प्राक् संमार्ष्टि 'अनिशितः' इति। (का० श्रौ० सू० २. ६. ३९)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतीक्ष्णीकृतः। निशितः नितरां शितः तीक्ष्णीकृतः। 'शो तनूकरणे' (दि० प० ११४५) निष्ठायां 'शाच्छोरन्यतरस्याम्' (पा० ७. ४. ४१) इति धातोराकारस्येदादेशः। न निशितः अनिशितः 'असि'। परेषां शत्रूणां कृते निशितोऽपि त्वमस्मदाद्यर्थमनिशितः शान्त इति भावः। अनिशितोऽपि 'सपत्नक्षित्' सपत्नान् शत्रून् क्षिणोति हिनस्तीति सपत्नक्षिदसि। 'क्षि हिंसायाम्' (स्वा० प० १२७७) क्विपि ह्रस्वस्य तुगागमः। 'त्वा' त्वां 'वाजिनं' वाजोऽन्नं सोऽस्यास्ति तं वाजिनं यज्ञद्वारान्ननिष्पादकम्। अथवा वाजो यज्ञः 'यज्ञो हि देवानामन्नम्' (श० ब्रा० ५. १. १. २) यज्ञाख्यमन्नं, तद्वन्तं 'वाजेध्यायै' वाजस्य यज्ञस्येध्या दीप्तिस्तस्यै। 'ञिइन्धी दीप्तौ' (रु० आ० १४४६) 'व्रजयजोर्भावे क्यप्' (पा० ३. ३. ९८) इत्यनेन क्यप् प्रत्ययो बाहुलकाद् द्रष्टव्यः। 'संमार्ज्मि' सम्यक् शोधयामि। एवं स्रुवं सम्मृज्य जुहूपभृद्ध्रुवाणां तिसृणां स्रुचां तेनैव क्रमेण 'प्रत्युष्टं रक्षः' इत्यनेन 'निष्टप्तं रक्षः' इत्यनेन च प्रतपनं कृत्वा पश्चात्सम्मार्जनं विधित्सुराह—अनिशितेति।[1] 'अनिशितासि सपत्नक्षिद् वाजिनीं त्वा वाजेध्यायै संमार्ज्मि'। व्याख्यानं प्राग्वदूह्यम्। स्रुचां स्त्रीत्वात् स्त्रीत्वविशिष्टानि 'अनिशिता' इत्यादीनि विशेषणानि। मन्त्रे प्रथमेन त्रिकेण प्राक् स्रुवस्य प्रतपनसम्मार्जने ततः स्रुचां पुंसः प्राधान्यख्यापनार्थम्। 'स वै स्रुवमेवाग्रे सम्मार्ष्टि, अथेतराः स्रुचो योषा वै स्रुग् वृषा स्रुवः' (श० ब्रा० १. ३. १. ९) तत्र पलाशकाष्ठनिर्मिता हंसमुखप्रणालिका बाहुमात्री स्रुग् जुहूः। हूयतेऽनयेति जुहूः। अश्वत्थकाष्ठनिर्मिता जुहूसदृशी उपभृत्, जुह्वाः समीपे धारणाद् उप समीपे भ्रियते इति कर्मव्युत्पत्तेः। विकङ्कतकाष्ठनिर्मिता जुहूसदृशी ध्रुवा, यागसमाप्तिपर्यन्तं वेद्यां स्थिरत्वाद् ध्रुवति स्थिरा भवतीति व्युत्पत्तेरिति।

आत्मयाजिपक्षभाष्यम्

'रक्षः' अज्ञानं 'प्रत्युष्टं' प्रतिदग्धम् 'अरातयः' कामादिशत्रवः 'प्रत्युष्टाः' प्रतिदग्धाः। 'रक्षः' अज्ञानं 'निष्टप्तं' निःशेषेण तप्तम् 'अरातयः' कामादिशत्रवः 'निष्टप्ताः' निःशेषेण तप्ताः। हे मेधारूप वा प्राणवायुरूप वा स्रुव ! 'मेधा स्रुवः' (श० ब्रा० ११. ५. ६. ३.), 'प्राण एव स्रुवः' (श० ब्रा० १. ३. २ ३), 'अयमेव स्रुवो योऽयं पवते' (श० ब्रा० १. ३. २. ५) त्वम् 'अनिशितः' नितरां शितस्तीक्ष्णीकृतो निशितः, तथा न भवतीत्यनिशितः। योगेऽनुपद्रवकारी 'सपत्नक्षित्' कामादिशत्रूणां हन्ता, 'असि'। 'वाजिनं' वाजो ज्ञानयज्ञस्तद्वन्तं 'त्वा' त्वां 'वाजेध्यायै' इन्धनमिध्या दीप्तिः, वाजस्येध्या वाजेध्या तस्यै वाजेध्यायै ज्ञानयज्ञस्य दीप्त्यै प्रकाशनार्थं 'सम्मार्ज्मि' सम्यक् शोधयामि। शोधितेन प्राणेन इन्द्रियशक्तिषु गृहीतासु हुतासु सतीषु ब्रह्माग्निर्दीप्यते। तद्दीप्त्याहुतिफलभूतो मोक्षोऽवाप्यते। 'रक्षः' इत्यादि पूर्ववद्व्याख्येयम्। हे वाक्शक्ते ! हे चक्षुःशक्ते ! हे मनःशक्ते ! 'तस्य वा एतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन

---

१. 'अनिशिता' इति स्रुचः। (का० श्रौ० सू० २. ६. ४१)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपभृच्चक्षुर्ध्रुवा' (श० ब्रा० ११. ५. ६. ३), 'आत्मैव ध्रुवा' (श० ब्रा० १. ३. २. २.), 'असावेव द्यौर्जुहूः' (श० ब्रा० १. ३. २. ४), 'अन्तरिक्षमुपभृत्' (श० ब्रा० १. ३. २. ४)। त्वम् 'अनिशिता' योगेऽनुपद्रवकारिणी, 'सपत्नक्षित्' कामादिशत्रूणां हन्त्री 'असि' वर्तसे। 'वाजिनीं' ज्ञानयज्ञवतीं 'त्वा' त्वां 'वाजेध्यायै' ज्ञानयोगस्य दीप्त्यै 'सम्मार्ज्मि' शोधयामि। वाक्चक्षुर्मनःशक्तीनां बहुत्वेऽपि प्रत्येकान्वयेन 'अनिशिता' 'सपत्नक्षित्' 'असि' 'वाजिनीं' 'त्वा' इति शब्देषु एकवचनप्रयोगः। अथवा बहुत्वेऽपि छान्दसत्वादेकवचनं बोध्यम्।

सात्वतपक्षभाष्यम्

'प्रत्युष्टं रक्षः' इत्यारभ्य 'अरातयः' इत्यन्तं व्याख्यातपूर्वम् (१. ७)। सम्प्रति भगवान् कृष्णोऽर्जुनं ब्रूते—अनिशित इति। हे पार्थ ! निःसन्देहं व्यापादितो निवातकवचादिरक्षोगणः। राजसूययज्ञावसरे दिग्विजययात्रायां भूयांसः शत्रवो राजानश्चापि पराजितास्त्वया। अतः 'सपत्नक्षित्' बाह्यशत्रुविजेता सन्नपि 'अनिशितः' अतीक्ष्णीकृतः, अतनूकृतमनस्कः, चेतसो मलिनत्वादलब्धब्रह्मविद्यः 'असि' वर्तसे। मोहतत्कार्यविषादादिदर्शनादिति भावः। 'वाजिनं' परोक्षज्ञानाख्यधनबलादियुक्तम्। 'त्वा' त्वां 'वाजस्य' ज्ञानस्य 'इध्यायै' दीप्त्यै 'ञिइन्धी दीप्तौ' (रु० आ० १४४९) बाहुलकात् क्यपि नलोपे स्त्रियां टाप्। अपरोक्षज्ञानाय 'सम्मार्ज्मि' संशोधयामि, अन्तःकरणशुद्धौ ब्रह्मसाक्षात्कारेणाज्ञानापनयनं सम्मार्जनम्। स्वपुत्रपञ्चकहत्या-खिन्नमनस्कां द्रौपदीं प्रत्यपि भगवानाह—अयि द्रौपदि ! त्वं स्वालौकिकशक्त्या 'सपत्नक्षित्' दुर्योधनादिशत्रुवर्गविनाशिनी। एतेषां सर्वेषां शत्रूणां विनाशस्त्वत्सङ्कल्पमात्रेण, अर्जुनादि-पाण्डवास्तत्र निमित्तमात्रम्। तथापि 'अनिशिता' अशुद्धस्वान्ता 'असि' विद्यसे। अन्तःकरणस्य मलिनत्वेन ब्रह्मविद्यानुत्पत्त्या शोकादिसद्भावदर्शनात्। लिङ्गभेदमात्रम्, नार्थे कश्चिद् भेदः। अत्रापि सम्मार्जनं संसारानित्यत्वोपदेशेन विवेकवैराग्यादिसम्पत्त्या शुद्धस्वान्ताया द्रौपद्या ब्रह्मविद्योत्पादनेनाविद्याकार्यशोकादिनिवृत्तिरेव।

अपि वा गोपं स्वसखं श्रीदामादिकं व्रजवासिजनं स्वानुरक्तां गोपिकां चोद्दिश्य श्रीकृष्णोक्तिः। 'रक्षः' बकासुरादिराक्षसगणः 'निष्टप्तं' विनाशितः। 'अरातयः' ब्रह्मेन्द्रवरुणप्रमुखा व्रजानिष्टकारिणः 'निष्टप्ताः' पराजितत्वेन पश्चात्तापं नीताः। वत्सहरणस्य, गोवर्धनोद्धरणस्य, वरुणालये वरुणभृत्येन नन्दानयनस्य च चरितेषु स्पष्टमेतत्। 'सपत्नक्षिद्' गृहपतिपुत्राद्यनु-रागाख्यशत्रुजित्, इदं च विशेषणं गोपे गोपिकायाश्च समानम्।

अपि वा साधकः स्वात्मानं जीवं बुद्धिञ्च सम्बोध्याह—प्रत्युष्टमिति। 'रक्षः' राक्षसो मोहो विषयासङ्गः, 'अरातयः' कामक्रोधलोभादयः, एतेषां सर्वेषां भगवत्प्रसादाद् विनाशः संवृत्त इति 'प्रत्युष्टं रक्षः' इत्यारभ्य 'निष्टप्ता अरातयः' इत्यन्तस्य कण्डिकाभागस्य सम्पि-ण्डितोऽर्थः। अन्यच्च हे जीवात्मन् ! 'सपत्नक्षित्' शत्रुजित्। किं बहुना, बाह्याभ्यन्तराणां सर्वेषां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिपन्थिनां विजेता त्वम् । बुद्धिपक्षे विजेत्रीति लिङ्गव्यत्ययः । तथापि 'अनिशितः' असम्भावनाविपरीतभावनाख्यज्ञानप्रतिबन्धकदोषसद्भावेन 'अनिशितः' अतीक्ष्णीकृतः, अलब्धब्रह्मविद्यः । बुद्धिपक्षे, 'अनिशिता' अतीक्ष्णीकृता, अलब्धब्रह्मविद्या इति लिङ्गव्यत्ययः। 'सम्मार्ज्मि' जीवात्मानं बुद्धिश्च त्वां संशोधयामि । ज्ञानप्रतिबन्धक-प्रमाणसंशय-प्रमेयसंशय-विपरीतभावनानां निरसनमेवात्र सम्मार्जनम् ।

इदमत्रावधेयम्—वेदान्तिनां द्विविधः समयः । केचिन्मन्यन्ते—अपरोक्षज्ञानं श्रुतमहावाक्यस्यापि तावन्नोद्भवति, यावत् श्रवणमनननिदिध्यासनैरसम्भावनादिलक्षणज्ञानप्रतिबन्धो न निवर्त्तते । अतः श्रवणादिलक्षणविचारसहकृतादेव महावाक्याद् ब्रह्मात्मैक्यसाक्षात्कारात्मकमपरोक्षज्ञानं समुत्पद्यते इति । अपरे ब्रुवते—श्रुतमहावाक्यस्य सद्योभवत्यात्मदर्शनम् । परं तत् सविलासाविद्यानिवृत्तिलक्षणं कार्यं कर्त्तुं तावन्न क्षमते यावद् विचारेण श्रवणाद्यात्मकेन प्रतिबन्धो न निवर्तते । अतो विचारेण प्रतिबन्धनिवृत्तावप्रतिबद्धमात्मदर्शनं सविलासामविद्यां समुच्छिनत्तीति ।

तथाच 'वाजिनवाजिनी' पदाभ्यामाद्यमते परोक्षज्ञानं, 'वाजेध्यायै' इति पदेन च ज्ञानदीप्तिलक्षणमपरोक्षज्ञानं ध्वनितम् । द्वितीयमते वाजिनवाजिनीपदाभ्यामात्मसाक्षात्कार एव गृह्यते । ज्ञानदीप्तिश्च वाजेध्यापदसूचिता आत्मदर्शनस्य सविलासाविद्यानिवृत्तिलक्षणस्वकार्यक्षमतैव । तथा च विचारसहकृतेन महावाक्येन जातेऽपरोक्षज्ञाने, तेन बुद्धेस्तदुपाधिकजीवात्मनो वा सविलासाविद्यादूरीकरणमेव सम्मार्जनं प्रथमपक्षे । द्वितीयपक्षे जातमप्यात्मदर्शनं कार्याक्षमम्। यदा तु तत् प्रतिबन्धनिवृत्त्या स्वकार्यजननाय प्रभवति तदा तेन सविलासाविद्यानिरासः सम्मार्जनमिति ।

अदित्यै रास्नासि विष्णोर्वेष्पोऽस्यूर्जे त्वाऽदब्धेन त्वा चक्षुषावपश्यामि । अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे ।। ३० ।।

१. पत्नीसंनहनम्, २. पाशस्योर्ध्वमुद्गूहनम्, ३. आज्योद्वासनम्, ४. आज्ये पत्न्या मुखावेक्षणम् ।

देवयाजिपक्षभाष्यम्

अस्यां त्रिंशयां कण्डिकायां चत्वारो मन्त्राः । 'अदित्यै' इति मन्त्रः त्रिवृता मुञ्जयोक्त्रेण पत्नीसंनहनः । अस्य याजुषी गायत्री छन्दः, योक्त्रं देवता । 'विष्णोः' इति मन्त्रः दक्षिणं पाशमुत्तरे प्रतिमुच्य तस्योर्ध्वोद्गूहनार्थः । अस्य दैवी पङ्क्तिश्छन्दः, योक्त्रं देवता । 'ऊर्जे त्वा' इति च आज्योद्वासनः (आज्यद्रवीकरणः) मन्त्रः । अस्य दैव्यनुष्टुप् छन्दः, आज्यं देवता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'अदब्धेन' इति च पत्न्या आज्ये मुखावेक्षणार्थः। अस्य याजुषी छन्दः, आज्यं देवता। परमेष्ठी प्राजापत्य ऋषिः समानः (श० ब्रा० १. ३. १. १५-१६ ; का० श्रौ० २. ७. १-४)।

गार्हपत्यस्याग्नेः प्रत्यग्दक्षिणतः (निर्ऋतिकोणे) ईशानकोणाभिमुखीमुपविष्टां यजमानपत्नीमध्वर्युस्त्रिगुणितेन मुञ्जतृणनिर्मितेन योक्त्रेण नाभेरधः कटिप्रदेशे बध्नाति—अदित्यै इति।[1] हे मुञ्जयोक्त्र ! त्वम् 'अदित्यै' अदितिदेवतायाः पृथिव्याः। षष्ठ्यर्थे चतुर्थी। 'रास्ना' रशना 'असि'। मन्त्रं पठित्वा योक्त्रं यजमानपत्न्या परिहितस्य वासस उपरि बहिः परितो वेष्टयति। एतत् पत्नीसंनहनम्। अथ मुञ्जयोक्त्रस्य दक्षिणं पाशमुत्तरे पाशे उपरितः प्रवेश्य तं पाशमूर्ध्वमुद्गूहति, ग्रन्थिं न करोति—विष्णोरिति।[2] हे पाश ! त्वं 'विष्णोः' यज्ञपुरुषस्य 'वेष्पः' वेष्टनम् 'असि'। अत्र 'वेष्यः' इति मन्त्रपाठं मत्वोव्वट आचार्यः 'विष्लृ व्याप्तौ' इत्यस्माद् 'वेष्ट वेष्टने' इत्यस्माद् वा धातोः वेष्यशब्दं साधयति, महीधरोऽपि तमनुमनुते। अन्यत्रापि बहुत्रायं पाठः। विद्याधरस्तु कात्यायनश्रौतसूत्रीये (पृष्ठ ६४) स्वीये टिप्पणे 'वेष्प' इत्येव मन्त्रपाठमन्वमंस्त। 'विष्लृ व्याप्तौ' (जु० प० १०९५) इत्यतः 'पानीविषिभ्यः पः' (उ० सू० ३.२३) इत्युणादिसूत्रेण पप्रत्यये वेष्प इति निष्पद्यते। अथाज्यमुद्वासयति—ऊर्जे इति।[3] उद्वासनं विलापनं द्रवीकरणम्। हे आज्य ! 'त्वा' त्वाम् 'ऊर्जे' उत्तमरसलाभायोद्वासयामीति शेषः। आज्यं विलाप्य यजमानपत्नी अवेक्षते—अदब्धेनेति।[4] हे आज्य ! 'अदब्धेन' अनुपहिंसितेन 'चक्षुषा' दर्शनेन 'त्वा' त्वाम् 'अवपश्यामि' अवाचीना अधोमुखी पश्यामि। हे आज्य ! त्वम् 'अग्नेर्जिह्वा' अग्नावाज्याहुत्या जिह्वास्थानीया ज्वालोत्पद्यते अतस्त्वमग्नेर्जिह्वा 'असि'। हे आज्य ! त्वं 'देवेभ्यः' देवानाम् अर्थाय 'सुहूः' सुष्ठु हूयते इति सुहूः। 'हु दानादनयोः' (जु० प० १०८३) कर्मणि विच् प्रत्ययः। पुंस्त्वं छान्दसम्। अथवा सुहूरिति वह्निजिह्वाविशेषणम्। सुष्ठु हूयन्ते देवा अनयेति करणे प्रत्ययः। 'सुहूः' देवानामाह्वयित्री। अग्निजिह्वां ज्वालां दृष्ट्वा प्रमुदिता देवा आगच्छन्तीति भावः। 'मे' मम 'धाम्ने धाम्ने' द्विर्वचनं वीप्सार्थम्। यज्ञफलोपभोगस्थानाय 'यजुषे यजुषे' यज्ञसिद्धये च 'भव' इति।

आत्मयाजिपक्षभाष्यम्

हे बुद्धे ! संस्कारकारकात्मशक्ते ! त्वम् 'अदित्याः' परायाः प्रकृतेः 'रास्ना' लता जिह्वा वा 'असि', 'विष्णोः' 'वेष्पः' व्याप्तिशीला शक्तिः 'असि'। हे इन्द्रियशक्तिसमूह ! 'त्वा'

---

१. पत्नीं संनह्यति प्रत्यगुदक्षिणत उपविष्टां गार्हपत्यस्य, मुञ्जयोक्त्रेण त्रिवृता, परिहरत्यधोवासः 'अदित्यै रास्ना' इति। (का० श्रौ० सू० २. ७. १)
२. दक्षिणं पाशमुत्तरे प्रतिमुच्योर्ध्वमुद्गूहति—'विष्णोर्वेष्पः' इति। (का० श्रौ० सू० २. ७. २)
३. 'ऊर्जे त्वा' इत्याज्यमुद्वास्य। (का० श्रौ० सू० २. ७. ३)
४. पत्नीमवेक्षयति 'अदब्धेन' इति। (का० श्रौ० सू० २. ७. ४)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वाम् 'ऊर्जे' ज्ञानामृतरसलाभाय, आत्माग्नेरुत्तारयामि। बुद्धिः कथयति— हे इन्द्रियशक्तिसमूह! 'अदब्धेन' अनुपहिंसितेन, पूर्णेन 'चक्षुषा' ब्रह्मज्ञानरूपेण 'त्वा' त्वाम् 'अवपश्यामि' निश्चयपूर्वकं पश्यामि। हे आज्य! इन्द्रियशक्तिसमूह! 'एतद्वै देवानां प्रियं धाम यदाज्यम्' (श० ब्रा० १३. २. १. २)। त्वम् 'अग्नेः' आत्माग्नेः, 'आत्मैवाग्निः' (श० ब्रा० ६. ७. १. २०), 'जिह्वा' भोगसाधनम् 'देवेभ्यः' इन्द्रियदेवानामर्थाय 'सुहूः' सुष्ठु हूयन्ते आहूयन्ते देवा अनयेति सा सुहूरसि। सुहूरिति जिह्वाविशेषणम्। अतः 'मे' मम 'धाम्ने धाम्ने' प्रत्येककमलाय 'यजुषे यजुषे' प्रत्येकज्ञानयज्ञाय 'भव' योगैश्वर्यसम्पन्नो भव।

सात्वतपक्षभाष्यम्

अदितिः शक्रजननी, तस्याः कुण्डलद्वयीं नरकासुरापरनामधेयो भौमासुरोऽपजहार। सुरराजाभ्यर्थनया भगवान् श्रीकृष्णस्तं दैत्यराजमाचक्राम। युधि तं दुर्वृत्तं निहत्य सा कुण्डलद्वयी इन्द्रमात्रे समानीय समर्पिता। इयमेवाख्यायिकात्र वर्णिता—अदित्यै इति। हे इन्द्र! 'अदित्यै' षष्ठ्यर्थे चतुर्थी, अदितेस्त्वन्मातुः 'रास्ना' कुण्डलद्वयी 'रासृ शब्दे' (भ्वा० प० ६२६) 'रासति' कर्णयोः परिहिता शब्दं करोतीति रास्ना, रासृधातोरौणादिको नः प्रत्ययः। 'असि' अस्ति। पुरुषव्यत्ययश्छान्दसः। एनां स्वमात्रे देहीति भावः। अपि वा 'असि' इति विभक्तिप्रतिरूपकस्त्वमित्यर्थको निपातः। कारकेण क्रियाऽऽक्षेपः। तथा च त्वं प्रसीदेत्यर्थः। कुण्डलद्वयीदर्शनेन स्वशत्रुनरकासुरनिधनमवगत्य हृष्टो भवेति तात्पर्यम्। सम्प्रति 'विष्णोः' यज्ञस्य 'यज्ञो वै विष्णुः' इति श्रुतेः। 'वेष्पः' परिवेषार्हः 'असि' वर्त्तसे। सम्प्रति शत्रुवधाद् यज्ञशालायां प्रविश्य निःशङ्कं हविर्भुङ्क्ष्वेति भावः। अपि च 'ऊर्जे' बलाय रसाय वा 'त्वा' त्वामिन्द्रमहं नियुञ्जे। कारकेण क्रियाऽऽक्षेपोऽत्र ज्ञेयः। वृष्ट्या सर्वा ओषधयः सरसा भवन्ति, अत ओषधिषु रसादानाय त्वं पर्जन्यात्मना यथासमयं वर्ष। शत्रुषु हतेषु निर्भयः सन् बली भूत्वा प्रजामनुशाधि चेति भावः। 'या च का च बलकृतिरिन्द्रकर्मैव तत्' इति यास्कः (निरु० ७-३)।

इन्द्रो भगवते सस्नेहं व्याहरति— हे कृष्ण! 'अदब्धेन' अहिंसकेन प्रियेण स्नेहपरिप्लुतेन 'चक्षुषा' लोचनेन 'त्वा' त्वामहमधुना पश्यामि। सादरमवलोकयामीत्यर्थः। त्वमस्माकं महान् सुहृन्नान्यः कश्चित्त्वत्तोऽधिकः, यस्मात्तव सस्नेहावलोकने चक्षुषोः पक्ष्मपातोऽपि ममासह्य इति भावः। अपि च 'अग्नेः' वृन्दारण्ये सहसोद्भूतस्य व्रजवासित्रासकस्य प्रतिक्षणं वर्द्धमानस्य दावानलस्य। 'जिह्वा' तद्वद् भक्षकः। यथा लेह्यमालोड्य जिह्वा गलविवरस्याधो निक्षिपति तथा ज्वालाजालजटिलं दावानलं मुखं व्यादाय जिह्वयाऽऽलिह्य त्वं निःशेषं पीतवानिति भावः। उक्तञ्च— 'वृणक्ति तिग्मामतसेषु जिह्वाम्' (ऋ० ४. ७. १०)। 'अतसेषु' शुष्कतृणेषु समुद्भूतं 'शोचिः' अग्निज्वालाऽस्य कृष्णस्य जिह्वामनुप्राप्य 'वृणक्ति' विननाश। व्रजरक्षणाय भगवता जाज्वल्यमानो दावाग्निर्मुखं व्यादाय निःशेषं पीत इति पौराणिकी कथाऽत्रानुसन्धेया। किञ्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'देवेभ्यः' देवानां 'सुहूः' सुहोता प्रीणयिता, प्रसादयिता, प्रीणनमपि जुहोतेरर्थं इति महाभाष्यमतम्। 'मे' मम 'धाम्ने धाम्ने' मदनुष्ठितक्रतुशतफलोपभोगस्थानाय स्वर्गाय 'यजुषे यजुषे' यज्ञाय, यजुर्यज्ञः तस्मै, स्वर्गयज्ञादिसंरक्षणाय 'भव' प्रभव, समर्थो भव। यजुर्यजतेः (निरु० ७. १२) द्विरुक्तिरादरार्था। मम निवासस्थानं त्रिविष्टपं, तद्वासिमत्प्रजां देववर्गं, तत्पोषकं यज्ञञ्च सततं रक्षेति भावः।

सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः। तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि॥ ३१॥

१. आज्योत्पवनम्, २. प्रोक्षण्युत्पवनम्, ३. यजमानस्याज्यावेक्षणम्, ४. स्रुवेणाज्यग्रहणम्।

देवयाजिपक्षभाष्यम्

अस्यामेकत्रिंश्यां कण्डिकायां चत्वारो मन्त्राः। 'सवितुस्त्वा' इति प्रथम आज्यशोधनो मन्त्रः, अस्य साम्नी जगती छन्दः, आज्यं देवता। 'सवितुर्वः' इति प्रोक्षण्यपां शोधनो मन्त्रः। अस्य प्राजापत्या पङ्क्तिश्छन्दः, आपो देवताः। 'तेजोऽसि' इत्ययमाज्यावेक्षणमन्त्रः। अस्य याजुषी त्रिष्टुप् छन्दः, आज्यं देवता। 'धाम नामासि' इति चतुर्थः स्रुवेणाज्यग्रहणार्थः। अस्यार्षी उष्णिक् छन्दः, आज्यं देवता। परमेष्ठी प्राजापत्य ऋषिः सर्वेषां समानः (श० ब्रा० १. ३. १. २३-२८; १. ३. २. १७-१८; का० श्रौ० २. ७. ७-९)।

हे आज्य! 'सवितुः' सवितृदेवस्य 'प्रसवे' अभ्यनुज्ञायां वर्तमानोऽहम् 'अच्छिद्रेण' निरन्तरेण निर्दोषेण 'पवित्रेण' शोधनसाधनेन 'सूर्यस्य रश्मिभिः' 'त्वा' त्वाम् 'उत्पुनामि' शोधयामि।[१] द्वादश्यां कण्डिकायामपि व्याख्यातम्। हे प्रोक्षण्य आपः! 'वः' युष्मान् 'सवितुः प्रसवे' वर्तमानः 'अच्छिद्रेण पवित्रेण' 'वसोः' जगन्निवासहेतोः 'सूर्यस्य' 'रश्मिभिः' 'उत्पुनामि'।[२] अथ यजमान आज्यमवेक्षते— तेजोऽसीति।[३] हे आज्य! त्वं 'तेजः' कान्तिरूपम् 'असि' आज्यसेवनेन हि शरीरकान्तिर्वर्धते। 'शुक्रं' दीप्तम् 'असि' ओजसा च देदीप्यते मुखम्। 'अमृतम्' अविनाशि 'असि' यत आज्यसेवी पुरुषायुषाद् ऋते न म्रियते। यद्वा सुदीर्घ-

१. 'सवितुस्त्वा' इत्याज्यमुत्पुनाति। (का० श्रौ० सू० २. ७. ७)

२. 'प्रोक्षणीश्च पूर्ववत्'। (का० श्रौ० सू० २. ७. ७)

३. आज्यमवेक्षते 'तेजोऽसि' इति यजमानो वा। (का० श्रौ० सू० २. ७. ८)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालं रक्षितमपि न विक्रियसे। चतुर्थेन मन्त्रेण जुह्वां स्रुवेणाज्यं गृह्णाति—धाम नामेति।[1] हे आज्य! त्वं 'धाम' धीयते धार्यते चित्तमस्मिन् 'नाम' नामयति सर्वमात्मानं प्रति, आज्यं दृष्ट्वा सर्वो जनस्तत् प्रति नमति, तद् भक्षयितुमुत्सहते। यतस्त्वं धाम च नाम च, अत एव 'देवानाम्' 'प्रियम्' इष्टम्। अत एव च 'अनाधृष्टम्' अनधिकारिभिरसुरादिभिरप्रतिहतं 'देवयजनं' देवा इज्यन्तेऽनेनेति देवयागसाधनम् 'असि' इति।

अस्मिन् दशमेऽनुवाके तिसृषु कण्डिकासु (२९. ३०. ३१) चतुर्दशभिर्मन्त्रैः (एकोनत्रिंश्यां ६, त्रिंश्यां ४, एकत्रिंश्याम् ४) इमा निर्दिष्टाः क्रिया व्याख्याताः—१-२. स्रुवप्रतपनम्, ३. स्रुवसम्मार्जनम्, ४–५. स्रुक्प्रतपनम्, ६. स्रुक्सम्मार्जनम्, ७. पत्नीसंनहनम्, ८. पाशस्योद्गूहनम्, ९. आज्योद्वासनम्, १०. पत्न्या आज्यावेक्षणम्, ११. आज्योत्पवनम्, १२. प्रोक्षण्युत्पवनम्, १३. यजमानस्याज्यावेक्षणम्, १४. स्रुवेणाज्यग्रहणम्।

दशस्वनुवाकेष्वेकत्रिंशत्कण्डिकासु समुदिता मन्त्रसंख्या त्रयस्त्रिंशदुत्तरशतम् (१३३)।

आत्मयाजिपक्षभाष्यम्

हे इन्द्रियशक्तिसमूह! 'सवितुः' प्रेरकस्य परमेश्वरस्य गुरोर्वा 'प्रसवे' प्रेरणे सति 'त्वा' त्वाम् 'अच्छिद्रेण' 'पवित्रेण' प्राणरूपेण 'सूर्यस्य' मानससूर्यस्य 'रश्मिभिः' 'उत्पुनामि' शोधयामि। हे गगनापः! 'सवितुः' गुरोः 'प्रसवे' प्रेरणे सति 'वः' युष्मान् 'अच्छिद्रेण' 'पवित्रेण' प्राणेन 'सूर्यस्य' परमात्मनः 'रश्मिभिः' 'उत्पुनामि'। हे इन्द्रियशक्तिसमूह! त्वं 'तेजः' आत्मतेजः 'असि', 'शुक्रं' शुद्धं ब्रह्माग्नियोग्यम् 'असि'। 'अमृतम्' आत्मांशत्वाद् नाशशून्यम् 'असि', 'धाम' ज्योतिः 'नाम' संज्ञा 'असि', त्वं 'देवानां' ब्रह्मनरनारायणानां 'प्रियम्' इष्टम् 'असि', 'अनाधृष्टम्' अनभिभूतं 'देवयजनम्' देव इज्यतेऽनेनेति ज्ञानयज्ञसाधनम् 'असि'।

सात्वतपक्षभाष्यम्

गोपालवालपरिवृतो नन्दनन्दनः कस्याश्चिद् गोपिकाया गृहं प्रविश्य नवनीतपिण्डं हस्ते निधाय सम्बोधयति—सवितुस्त्वा इति। हे नवनीत! 'सवितुः' जगदुत्पादकस्य परमात्मनः 'प्रसवे' आदेशे वर्तमानः सन्। 'त्वा' त्वाम्, 'उत्' पात्रीत उद्धृत्य 'पुनामि' शुद्धं विदधे। अन्यथा चिरकालं केनचिदभुक्तं तक्रादिसंसृष्टं त्वं विकृतं स्या इति भावः। अतः सद्योभक्षणं यथावत् त्वदीयस्वरूपसंरक्षणेन नूनं पवित्रीकरणम्। त्वद्भक्षणे ईश्वरेण वयमनुज्ञाताः, न तु स्वेच्छया समायाताः। अतोऽस्मासु चौर्यं नाशङ्कनीयम्। चौर्याभावे हेत्वन्तरमाह—अच्छिद्रेणेति। 'अच्छिद्रेण' 'अच्छिद्रैः' वचनव्यत्ययश्छान्दसः। अविरलैः, इतस्ततः प्रकामं प्रसृतैः 'सूर्यस्य' भास्करस्य 'रश्मिभिः' किरणैः, तदुपेतदिवसे इत्यर्थः। चौरा नक्तमागच्छन्ति न दिवा,

१. 'स्रुवेणाज्यग्रहणं चतुर्जुह्वां 'धाम नाम' इति सकृन्मन्त्रः। (का० श्रौ० सू० २. ७. ६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयमीश्वरादेशवशंवदास्त्वद्भक्षणाय दिवसे समुपस्थिताः। अतो वयं चौराशङ्कया न प्रत्याख्यातव्यास्त्वया। त्वञ्च बालबलोपचयाय परमेश्वरेण सृष्टम्, अतः बालभोजने तव सर्जनस्य सार्थक्यम्। अतोऽस्मान् स्वभक्षणायानुजानीहीति भावः।

भूयांसः सखायस्तेभ्यो नालमेको नवनीतपिण्ड इति गोपिकागृहावस्थिता भूयसीर्घृतपात्रीः करे निधाय घृतवत् ताः सम्बोधयति—व इति। 'वः' युष्मान् घृतपात्रीः सर्वाः 'उत्पुनामि' पवित्रयामि, सदुपयोगेन सार्थकीकरणमेव वस्तुनः पावनम्। शिष्टं समानम्। बहुवचनं बहुघृतपिण्डाभिप्रायेण बहुघृतपात्राभिप्रायेण वा। स्तुत्या प्रसीदन्नवनीतं स्वभक्षणानुज्ञामवश्यं प्रयच्छेदित्यभिप्रायेण प्रशंसति—तेजोऽसीति। तेजःप्रभृतीनि विशेषणान्यष्टौ देवयाजिरीत्या सुव्याख्येयानि।

अस्मिन् समन्वये भाष्ये नैकपक्षाः प्रदर्शिताः।
यो यस्मै रोचते पक्षो बुधस्तेन स मोदताम्॥

॥ इति प्रथमोऽध्यायः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिशिष्टम्

अनुवाकसूत्राणि

इषे त्वैका[१], वसोः पवित्रं तिस्रः[३], अग्ने व्रतपते सप्त[७], पवित्रे स्थो द्वे[२], शर्मासि तिस्रः[३], धृष्टिरसि[२] शर्मासि द्विकौ[२], देवस्य त्वा तिस्रः[३], देवस्य त्वा पञ्च[५], प्रत्युष्टं रक्षस्तिस्रः[३]। दशेमेऽनुवाकाः। एकत्रिंशत् कण्डिकाः।

संग्रहश्लोकाः

आद्यो दशानुवाकाख्यस्तेषामर्थो विविच्यते।
[१]शाखानिष्पत्तिराख्याता [२]दोहनं [३]ग्रहणो[४]क्षणे॥
[५]अवघातः [६]कपालानि [७]पेषणं [८]श्रपणं तथा।
[९]वेदि[१०]राज्यग्रहश्चैतेऽनुवाकार्थाः प्रकीर्तिताः॥

प्रथमे शाखानिष्पत्त्यनुवाके कण्डिका १, मन्त्राश्च ५, तद्यथा—

इषे शाखां[१] छिनत्त्यूर्जे मार्ष्टि[२] वायेति वत्सकम्[३]।
स्पृष्ट्वा, देवः स्पृशेद्गां[४] च यज शाखोपगूहनम्[५]॥
प्रथमेऽनुवाके पञ्च मन्त्रा उक्ताः क्रियानुगाः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीये दोहनानुवाके कण्डिकाः ३, मन्त्राश्च ११, तद्यथा—

वसोः शाखापवित्रं[१] तु द्यौः स्थाल्यादानमेव[२] च ॥
मातेत्यधिश्रयेत्[३], स्थाल्यां पवित्रस्थापनं[४] वसोः ।
देवस्त्वाऽऽसेचने[५] जप्त्वा, प्रश्ने[६] कामिति संपठेत् ॥
[७–९] प्रश्नस्यास्योत्तरं ब्रूयात् सा विश्वायुरिति त्रिभिः ।
इन्द्रस्याऽऽतञ्चनं[१०] विष्णो रक्षणं हविषस्तथा[११] ॥
अनुवाके द्वितीयेऽस्मिन्नेकादश मताः क्रियाः ।

तृतीये ग्रहणानुवाके कण्डिकाः ७, मन्त्राश्च १९, तद्यथा—

अग्ने व्रतेदमित्येतौ व्रतस्योपायने[१–२] मतौ ॥
कस्त्वोदपात्रमादध्यात्[३] कर्म शूर्पाग्निसंग्रहः[४] ।
प्रत्युष्टं प्रतपेत्ते[५] द्वे उर्वन्तरिक्षमेति[६] च ॥
धुरं स्पृशेद्[७] धूरसीति देवा ईषां स्पृशेत्ततः[८] ।
विष्णुराक्रमते[९] भूय उरु हव्यं तु पश्यति[१०] ॥
तृणाद्यपहतं त्यक्त्वा[११] यच्छन्तां च स्पृशेद्धविः[१२] ।
देव गृह्णाति[१३–१४] शेषं तु भू स्पृष्ट्वा[१५] स्वरितीक्षते[१६] ॥
दृंहाऽवरुह्य[१७] शकटादुर्वन्तरिक्षमेति[१८] च ।
पृथिव्या भुवि संस्थाप्याऽनुवाकेऽस्मिन्[१९] तृतीयके ॥
मन्त्राणां च क्रियाभेदादुक्ता त्वेकोनविंशतिः ।

चतुर्थे प्रोक्षणानुवाके कण्डिके २, मन्त्राश्च ७, तद्यथा—

दर्भौ छिन्द्यात्[१] पवित्रे स्थ उत्पुनीयात्[२] सवीत्यतः ॥
ऊर्ध्वं संचालयेद्[३] देवीः प्रोक्ष्यपां प्रोक्षणं[४] मतम् ।
अग्नये त्वा हविः[५–६] प्रोक्ष्य दैव्याय पात्रप्रोक्षणम्[७] ॥

Funding by IKS-MoE

अनुवाके चतुर्थेऽस्मिन् सप्त मन्त्रा उदीरिताः ।

पञ्चमेऽवघातानुवाके कण्डिकाः ३, मन्त्राश्च १५, तद्यथा—

शर्मेत्यजिन[1]मादायाऽवधूतमवधूनन[2]म् ॥
अदित्यास्तस्यास्त[3]रणमद्रिर्धेये ह्युलू[4]खले ।
अग्नेरि[5]ति हविःक्षेपो मुसलग्रह[6]णं बृहत् ॥
स इत्यवदधा[7]त्येतद् हविः पत्नीमिहा[8]ह्वयेत् ।
आ[9]हन्याद् दृषदे कुक्कु वर्षं शूर्पपरिग्रहः[10] ॥
प्रति त्वा हवि[11]रुद्धापो निष्पु[12]नाति परेत्यतः ।
तुषान्नि[13]रस्येदपह वायुर्वस्तद्विवेचनम्[14] ॥
देवः पात्र्यां ह[15]विः स्थाप्यं मन्त्राः पञ्चदश स्मृताः ।

षष्ठे कपालानुवाके कण्डिके २, मन्त्राश्च १०, तद्यथा—

उपवेषग्र[1]हो धृष्टिरपाऽङ्गारवियोजनम्[2] ॥
पुनरा[3]दानम् आ देव कपालं स्था[4]पयेद् ध्रुवम् ।
अग्ने[5]ऽङ्गारं समारोप्य धरु धर्त्रमिति द्वयात् ॥
प्रत्य[6]क्प्राची[7] कपाले द्वे विश्वा दक्षिणत[8]स्तथा ।
चित उत्त[9]रतोऽङ्गारैर्भृगूणामूह[10]नं ततः ॥
अनुवाके तु षष्ठेऽस्मिन् दश मन्त्रा उदीरिताः ।

सप्तमे पेषणानुवाके कण्डिके २, मन्त्राश्च १३, तद्यथा—

श[1]र्मावि[2]धूतादित्या[3]स्त्वगित्येते पूर्ववत् त्रयः ॥
धिषेति दृषदं तत्र स्था[4]पयेद् दिव इत्यतः ।
शम्या[5]मधः स्थापयित्वा धिषणेत्युपलां[6] ततः ॥
समोप्य तण्डु[7]लान् धान्यं पि[8–10]ष्यात् प्राणेति तत् त्रिभिः ।
दीर्घां कृष्णाजिने[11] पिष्टं चक्षुषे च तदीक्ष[12]ते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महीनाम् आज्यनिर्वापो[१३] मन्त्रा: प्रोक्तास्त्रयोदश ।

अष्टमे श्रपणानुवाके कण्डिका: ३, मन्त्राश्च १५, तद्यथा—

पिष्टावापो[१] देव पात्र्यां समापो जलमानयेत्[२] ।।
जनयत्यै च संयौति[३] स्पृशेद् द्वेधा[४-५] त्विदंद्वयात् ।
इषे त्वाऽऽज्यमधिश्रित्य[६] पुरोडाशं[७] घर्मेत्यत: ।।
उरु तं प्रथयेद्[८], अग्निस्तस्याभिमर्शनम्[९] ।
देवस्त्वा श्रपयेद्धव्यं[१०], मा भे: स्पृष्ट्वाऽतमेरु[११] तत् ।।
भस्माऽभिवासनं[१२] चैव नीत्वाप्त्याऽपश्रितात्रयात्[१३-१५] ।
निलये क्षालनजलं मन्त्रा: पञ्चदश स्मृता: ।।

नवमे वेद्यनुवाके कण्डिका: ५, मन्त्राश्च २४, तद्यथा—

देवस्य स्फ्यं समादत्ते[१] इन्द्राऽऽलभ्य जपेदमुम्[२] ।
तृणं पृथिव्यां संस्थाप्य पृथिवि प्रहरेदिदम्[३] ।।
व्रजं पुरीषमादत्ते[४] वर्षं वेदिमवेक्षते[५] ।
बधोत्करे न्यसेत् पांसुं[६] द्वितीयप्रहृतिस्तत:[७] ।।
व्रजं[८-१०] त्रय: पूर्ववत् स्युररोत्करमभिमृशेत्[११] ।
तृतीया प्रहृति:[१२] स्फ्यस्य पूर्ववत्[१३-१५] स्युर्व्रजं त्रय: ।।
वेदे: पूर्वपरिग्राहो[१६-१८] गायत्रेण त्रिभिर्भवेत् ।
उत्तरस्तु परिग्राह:[१९-२१] सुक्ष्मा चेत्यादिभिस्त्रिभि: ।।
अनुमार्ष्टि[२२] पुरा वेदिं प्रोक्षणीरानयत्यपि[२३] ।
द्विषते स्फ्यं[२४] त्यजेदेवं चतुर्विंशतिरीरिता ।।

दशमे आज्यानुवाके कण्डिका: ३, मन्त्राश्च १४, तद्यथा—

स्रुवं[१-२] तपेत् प्रत्यु निष्ट संमृज्याद्[३] अनिशीत्यत: ।
पुन: प्रत्युस्त्रिभिस्तापो[४-५] मार्जनं च स्रुचीष्यते[६] ।।

Bhawan's Sri Sankaracharya ... Sanskrit
1042

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अदित्यै नह्यते पत्नी[७] विष्णोस्तत्पाशगूहनम्[८] ।
ऊर्जे त्वेत्याज्यमुद्वास्या[९]ऽदब्धे पत्नी[१०]मवेक्षयेत् ॥
सवितुस्त्वा[११]ऽऽज्यमुत्पूय प्रोक्षणीः शोधयेत्[१२] सवि ।
तेजोऽस्याज्यमवेक्ष्या[१३]ऽथ जुह्वां गृह्णीत[१४] धामना ॥
दशमे चाऽनुवाकेऽस्मिन् मन्त्राः प्रोक्ताश्चतुर्दश ।
मन्त्राणां सकला संख्या त्रयस्त्रिंशत् शतं मता ॥

Bhawan's Sri Sankaracharya ... Bharatiya Vidya ... Mahavidyalaya

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राप्तिस्थानम्—
'श्रौत मुनि निवास'
वृन्दावन, मथुरा.
भारत

Funding by IKS-MoE